Sri mumukshu sarvashwa-sar-sangraha-vidhogranthа: samapt;
Kashi, 1913

25427

ॐ श्रीगणेशाय नमः। सच्चिदानन्दरूपाय रामाय प्रत्यगात्मने। वेदान्तप्रतिपाद्याय दशास्यघातिने नमः ॥ १ ॥
संसारसागरेमग्नं कामादिनक्रसंहृतम्। मांसमुद्धृतवन्तो येतान्वन्देस्वगुरूनपि ॥ २ ॥ आप्तवाक्यं। अल्पेभ्यश्च महद्भ्यश्च
ग्रन्थेभ्योमतिमान्नरः। सर्वतः सारमादद्यात्पुष्पेभ्यइवषट्पदः ॥ ३ ॥ वाक्यसङ्ग्रहकृद्वाक्यानि। इत्येवमादिवाक्यानामर्थं बुद्ध्वा
द्यसादरम्। सञ्जातातुचिकीर्षामे श्रुत्यादिवाक्यसङ्ग्रहे ॥ ४ ॥ त्रिकाण्डात्मकशास्त्रस्य गीताख्यस्यतथामया। शारीरकस्यचा
प्यर्थस्सङ्क्षेपेणेहवच्यते ॥ ५ ॥ शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरेस्थितम्। इति लक्षणयोगोत्रनिःसन्दिग्धमवस्थितः ॥ ६ ॥
एवं वेदान्तशास्त्रीयैरनुबन्धैर्भवेदिदम्। अनुबन्धियतस्तस्य प्रकरणंत्विदंस्मृतम् ॥ ७ ॥ शास्त्रीयाः केनुबन्धाःस्युरितिचे
च्छृणुतानपि। अधिकार्य्यभिधेयौद्वौ सम्बन्धश्च प्रयोजनम् ॥ ८ ॥ इत्येतेह्यनुबन्धावैचत्वारः सन्तिशास्त्रगाः। एतान्दृष्ट्वातु
बुद्धिमान् शास्त्रादौ सम्प्रवर्त्तते ॥ ९ ॥ चतुर्भिःसाधनैर्युक्तोयोऽधिकारीस कथ्यते। जीवस्य ब्रह्मणैक्यं यत्तद्विषयइहो
च्यते ॥ १० ॥ अशेषानर्थनाशोयो नित्यानन्दस्य चाप्तिता। प्रयोजनमिहोक्तं तत्सम्बन्धो वहुधास्मृतः ॥ ११ ॥ वेदान्तैः

प्रतिपाद्येन चक्येन ब्रह्मजीवयोः। तेषांचविदुः सम्बन्धंवोध्यवोधकतांवुधाः॥ १२॥ वेदान्तैश्चैक्यवोधस्योत्याद्योत्यादकतांवि
दुः। शास्त्रमुक्त्योस्तुसम्बन्धः प्रयोजकप्रयोज्यता॥ १३॥ वोधमुक्त्योश्च सम्बन्धः साधनसाध्यताह्वयः। एवञ्चतुर्विधः
प्रोक्तः सम्वन्धोचवुधैःखलु॥ १४॥ ननुभेदस्य सत्यत्वाद्वन्धस्याप्यमृषात्वतः। नस्याद्विषयसंसिद्धिः सिद्ध्योच्चनप्रयोजनम्॥ १५॥
तदसिद्धौ चनैवस्यात्प्रवृत्तिर्धीमतामिह। भेदस्यविषयत्वेतु न वेदान्तनिवन्धता॥ १६॥ मैवम्वन्धो भिदाचापिनसत्यः
कल्पितत्वतः। ततो विषयसिद्धिः स्यात्फलसिद्धिश्च सम्भवेत्॥ १७॥ भेदवन्धद्वयोश्चापि कल्पितत्वंत्वविद्यया।
सातुचिन्मात्रमाच्छाद्य करोत्यत्रभिदादिकम्॥ १८॥ आच्छादितं परंब्रह्म स्वाज्ञानेन वलीयसा। विचित्रंतत्पुनस्तेन जी
वेशजगदात्मना॥ १९॥ आवरणादिशक्त्या तत्समथमात्मसंसृतौ। अपरञ्चवलंतस्यात्माश्रयत्वादिकंमहत्॥ २०॥ एव
मात्मास्वयाथात्म्यमखण्डाद्वयरूपकम्। अज्ञात्वात्मन्यनात्मानमध्यस्यायं प्रवर्त्तते॥ २१॥ जगदिदमसावीशो जीवोहंविधि
नोदितः। काम्यादि कर्मणांकर्त्ता भोक्तास्मितत्फलस्य च॥ २२॥ द्रष्टाहंस्वेष्टरूपादेः श्रोतास्मि गीतवाद्ययोः। वक्ता

हंसाङ्ग्वेदस्य गन्तास्मिस्वगुरुंप्रति ॥ २३ ॥ मनुष्योहं पितायंमेमातेयं मेसुतोस्तिमे। युवास्म्यहंतथावृद्धो ब्राह्मणोहं बहुश्रु
तः ॥ २४ ॥ क्षत्रियोहं महांश्शूरो वैश्यश्चाहं सुखादिमान्। शूद्रोस्मि द्विजभक्तोहं ब्रह्मचार्य्यस्मिनैष्ठिकः ॥ २५ ॥ गृह
स्थः पुत्रवानस्मि पुत्रेसुखिन्यहंसुखी। पुत्रनाशेच नष्टोहं धनाढ्योहंचवैसुखी ॥ २६ ॥ पुत्रादीन्परिहायाहं वनेस्मिन्फल
पर्णभुक्। तपस्व्यहं वनस्थोस्म्य ऽग्निहोत्रीह्यतिथिप्रियः ॥ २७ ॥ यतिश्चाहंपरोहंसो मुण्डोदण्डकुसुम्भवान्। मोक्षायैव
प्रवृत्तोहं संसाराभिधपाशतः ॥ २८ ॥ इत्यादिव्यवहारोयंपण्डितमूढयोरपि। अध्यासमन्तरेणास्यनान्यत्कारणमी
च्यते ॥ २९ ॥ अध्यासजननेऽज्ञानंसमर्थमेकमस्ति च। सादृश्यस्यत्वनैकान्त्यमात्मनिजातिकल्पने ॥ ३० ॥ करणस्य
दोषस्यव्यभिचारोपि दृश्यते। घटज्ञानं ममोत्पन्नंनष्टमित्यादिकेभ्रमे ॥ ३१ ॥ तस्मादाविद्यकौबन्धभेदौप्रतीचिनस्वतः।
स्वतस्त्वात्मासदाशुद्धः स्वप्रकाशोद्वयात्मकः ॥ ३२ ॥ नन्वज्ञानंकुतः शुद्धेस्वप्रकाशेचिदात्मनि। नहिसूर्येतमोदृष्टं स्वच्छिमतातु
केनचित् ॥ ३३ ॥ अज्ञानेन विनानस्यादावृतिश्च चिदात्मनि। तामृतेच क्वदाध्यासः कथमात्मनि सम्भवेत् ॥ ३४ ॥

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 25427
Date 9.8.68
SIMLA

मु० सा० रूप्यस्यमिथ्यात्वे शुक्तिरेवावशिष्यते ॥ ४६ ॥ तथाऽद्वयात्मबोधेनाऽहङ्कारादेर्मृषात्मता। बुद्धायदातदात्मैवाऽवशिष्यते सुखा
३ द्वयः ॥ ४७ ॥ अतोनशून्यतावादप्रसङ्गोचकथञ्चन। बाधाऽवधितयाशिष्टे चितिशून्यङ्कथंभवेत् ॥ ४८ ॥ एवमाविद्यकः
सर्वोभोग्यादिलक्षणश्चिति। अध्यस्तत्वात्स्वरूपेण मिथ्यास्याच्छुक्तिरूप्यवत् ॥४९॥ नन्वध्यस्तस्यमिथ्यात्वं सिद्धेऽध्यासेहिसम्भ
वेत्। सोऽसिद्धोलक्षणादृष्टे रितिचेतद्वदामिते ॥५०॥ अध्यासोचद्विधाज्ञेयो ज्ञानार्थाध्यासभेदतः। अन्यचान्यावभासादिज्ञाना
ध्यासादिलक्षणम् ॥ ५१ ॥ ततो ऽज्ञानेन सञ्छन्नेचिन्मात्रे परिकल्पितम्। भोक्तृभोग्यादिकंसर्वमज्ञानंचापिकल्पितम् ॥ ५२ ॥
अज्ञानमपिचिन्मात्रे ऽस्त्यध्यस्तंनैववस्तुतः। स्वाध्यासेऽपेक्षतेनान्यत्संवित्स्वप्रकाशनेयथा ॥ ५३ ॥ स्वविषयं यथैवात्मा स्वस्वाप्य
यंप्रकाशते। परमतेतथाऽज्ञानंस्वंस्वकार्यञ्च निर्वहेत् ॥ ५४ ॥ चिद्रूपेऽज्ञानसिद्धौहिमानंनैवोपलभ्यते। अज्ञोहमिति
बोधात्तु व्यतिरेकेण किञ्चन ॥ ५५ ॥ ततोऽज्ञानं सकार्यंस्यान्मिथ्यैव शुक्तिरूप्यवत्। एवं ह्यात्मास्वतः शुद्धोऽतोविषयादिसि
ध्यति ॥ ५६ ॥ जीवस्य ब्रह्मणाऽभेदज्ञानं मोक्षस्यसाधनम्। तयोर्भेदस्तुमिथ्यवाऽध्यस्तत्वाच्चन्द्रभेदवत् ॥ ५७ ॥ नत

द्वितीयमस्तीति भेदासत्वं श्रुतिर्जगौ । स्वल्पं यःकुरुते भेदं तस्यापराभयंजगौ ॥ ५८ ॥ नास्तिद्वैतं कुतोमर्त्यमित्याहस्मा
पराश्रुतिः । पञ्चधाभेदमिथ्यात्वेऽनुमानान्यपिसन्तिच ॥ ५९ ॥ विवादाऽध्यासितो भेदोमिथ्याभवितुमर्हति । भेदत्वाद्दर्पणा
ऽवादौ गतमुखादिभेदवत् ॥ ६० ॥ विमताभेदसम्वित्त्च मिथ्याभवितुमर्हति । भेदसंवेदनत्वाद्धि स्वप्नार्थभेदधीयथा ॥ ६१ ॥
एवंहि भेदमात्रस्य तज्ज्ञानस्यापिदर्शितम् । मिथ्यात्वंतद्विशेषाणां निषेधोप्यद्यकथ्यते ॥ ६२ ॥ जीवात्मा ब्रह्मणोनैव तात्विक
भेदवान्सदा । सच्चिदानन्दरूपत्वादात्मत्वाच्च परेशवत् ॥ ६३ ॥ जीवात्मा सच्चिदानन्दो वेदवाक्यप्रमाणतः । तस्मान्नहेत्व
ऽसिद्ध्यादेः शङ्कायुक्तेहकाचन ॥ ६४ ॥ विवादाध्यासिता जीवास्तत्त्वतः प्रतिवादिनः । नभिन्ना जीवभावेनात्मत्वाद्वाप्रतिवा
दिवत् ॥ ६५ ॥ जगज्जीवात्मनोर्भेदो नसत्यःस्यात्तुवस्तुतः । भेदत्वादिन्द्रजालान्तर्गतपदार्थभेदवत् ॥ ६६ ॥ ईशप्रपञ्चयोश्चा
पिभेदः सत्योनवस्तुतः । भेदत्वात्स्वप्नभावानां परस्परंभिदायथा ॥ ६७ ॥ विवादाध्यासितोभेदो जगतोपीतरेतरम् । नता
त्विकोहिभेदत्वान्मनोराज्यार्थभेदवत् ॥ ६८ ॥ तत्त्वमस्यादिवाक्यानां बहूनांखलुबाधतः । प्रत्यक्षादिप्रसिद्धत्वादफल

मु० सा० त्वान्मृषात्वतः ॥ ६९ ॥ द्वैत्यादिभेदवाक्यानां नभित्तात्पर्य्यगोचरा। जीवादीनांततोभेदोमिथ्यैवनच संशयः ॥ ७० ॥ प्रकाशा
४ दिवदित्यादिसूत्रेष्वौपाधिकीभिदा। दर्शिता सूत्रकारेणभाष्येभाष्यकृतातथा ॥७१॥ ननुभेदस्यमिथ्यात्वे साङ्कर्य्यंसुखदुःखयोः
स्यादितिचेन्नभेदस्याप्यङ्गीकारादुपाधिना ॥ ७२ ॥ औपाधिकेन भेदेनस्याद्व्यवस्था सुखान्ययोः। प्रकाशेत्यादिसूत्रैश्चतामप्याह
स्मसूत्रकृत् ॥ ७३ ॥ तस्माद्भेदश्रुतिर्बाध्या बाधिकाऽभेदगाश्रुतिः। एवमुक्तंभिदाऽसत्वं वन्धस्याप्यतदुच्यते ॥ ७४ ॥ कर्त्तृ
त्वादिकवन्धोऽसन्नऽध्यस्तत्वाद्भवेत्खलु। यदित्थंतत्तथादृष्टं शुक्तिरूप्यादिकं यथा ॥ ७५ ॥ तस्माद्बुद्ध्यविवेकेनैवात्मावद्ध
इवेच्यते। खतस्तु सर्वदामुक्तस्तत्त्वज्ञैरवधार्यते ॥ ७६ ॥ औपाधिकन्तु कर्त्तृत्वाद्यात्मनिनैववास्तवम्। तद्गुणेत्यादि
सूत्राभ्यां सूत्रकृतापि दर्शितम् ॥ ७७॥ स्यादात्मासुखरूपश्च परप्रेमास्पदत्वतः। यएवंनभवेन्नासौ प्रियतमोयथाघटः। ७८।
सजातीयादिभेदस्य दुःखादेश्चनतत्त्वतः। ह्यात्मीयतायतस्तस्यसुप्तौक्लृप्तासुखात्मता ॥ ७९ ॥ सुखमचाहमस्वाप्समिति
सुप्तेः समुत्थिताः। स्मरन्तिच निजानन्दं प्रत्यहं सर्वमानवाः ॥ ८० ॥ स्मृतेस्त्वनुभवाज्जन्मसंस्कारद्वारतोमतम्। अतः स्मृते

घृणुतमोयथासूयप्पुलूकदृष्टिकल्पितम् । स्वप्रकाशे तथाज्ञानमज्ञानुभूतिकल्पितम् ॥ ३५ ॥ यथाचाभ्रावृतः सूर्योऽ
भ्रादीनपि प्रकाशते। तथाऽज्ञानावृतोप्यात्मा सकायाज्ञानभासकः ॥ ३६ ॥ अज्ञानंस्वाश्रयानन्यविषयंस्यात्तमस्त्वतः ।
वाह्यंतमोयथादृष्टं तथाचेदंततस्तथा ॥ ३७ ॥ आत्मस्थं सत्तदज्ञानमात्मनोऽनात्मनस्तथा । अन्योन्यन्तु मृषाऽध्या
संजनयत्येवबन्धदम् ॥ ३८ ॥ नन्वितरेतराध्यासेत्वात्मापिस्यान्मृषाध्रुवम् । अध्यस्तत्वाद्यथाशुक्तिरूप्यंरज्जूरगादिकम् ।
॥ ३९ ॥ आत्मनः सतिमिथ्यात्वे शून्यवादः समापतेत् । मैवंवदशृणुष्वात्र व्यवस्थांतेवदाम्यहम् ॥ ४० ॥ नीलपृष्ठत्रिको
णत्वं यथा शुक्तेर्नभासते । तथाऽखण्डाद्वितीयत्वं भ्रान्तौनात्मनईक्ष्यते ॥ ४१ ॥ शुक्तेरेवेदमंशत्वं शुक्तिरूप्येयथेक्ष्यते । तथा
त्मनोपिचैतन्यमनात्मनिसमीक्ष्यते ॥ ४२ ॥ यथा रूप्यस्यरूप्यत्वं शुक्तीदमिप्रपश्यति । भ्रान्तोनरस्तथात्मापि कर्तृत्वाद्या
त्मनीक्षते ॥ ४३ ॥ रूप्यंयथास्वरूपेण शुक्त्यऽध्यस्ततयामृषा । तथाहमादयोभावाः स्वरूपेण मृषाचिति ॥ ४४ ॥ इदमंशस्यसं
सर्गो रूप्येऽध्यस्ततयामृषा । यथातथात्मसंसर्गोऽनात्माध्यस्ततयामृषा ॥ ४५ ॥ नीलपृष्ठत्रिकोणस्ययथासम्यक्प्रबोधतः । ज्ञाते

ओं। विवेकादिचतुर्भिर्हिसाधनैः श्रुतिनोदितैः। सम्पन्नस्यैवशुद्धान्तःकरणस्ययतेरिह ॥ १ ॥ अधिकारोस्ति वेदान्त
श्रवणेश्रुतिचोदिते। सम्यग्ब्रह्मात्मनोरैक्यंतुर्य्यस्य ज्ञातुमीप्सतः ॥ २ ॥ अन्तःकरणसंशुद्धेः साधनानीहभूरिशः। वक्ष्यन्तेता
न्विनासिद्धिर्विवेकादेर्यतोनहि॥३॥ नन्वन्तःकरणस्यस्याच्छुद्धिः केनेहहेतुना। रागादिमलदिग्धस्य पङ्केनेवपटस्यवै ॥४॥
तदभावेविवेकादिस्यादन्तःकरणेकथम्। पङ्कलिप्तेयथावस्त्रे दुर्लभारागरञ्जना ॥ ५॥ विवेकादेरभावेचन तत्त्वज्ञानसम्भवः।
तदभावेमुधैवस्याद्वेदोक्तं सर्वसाधनम् ॥ ६ ॥ याज्ञवल्क्यस्मृतिः। मलिनोहि यथादर्शो रूपाऽऽलोकस्यनक्षमः। तथाऽवि
पक्वकरण आत्मज्ञानस्य नक्षमः। वाक्यसं०। इति स्मृत्याचसम्प्रोक्तो ज्ञानाऽभावोहितांविना ॥ ७ ॥ शृणुत्वं सत्वशु
द्धेस्तु साधनं वेदसम्मतम्। फलाशांपरिहायादौ यत्स्वधर्माभिसेवनम् ॥ ८ ॥ पापादीनिनरस्येह सत्वाऽशुद्धिकराणिवै।
धर्मेणेत्यादिवाक्यानि धर्मंतन्नाशकंविदुः ॥ ९ ॥ कार्यंसत्वविशुद्ध्यर्थं स्ववर्णाश्रमकर्मणाम्। अनुष्ठानं यथात्याज्यं तथादुष्टान्नभक्ष
णम् ॥ १० ॥ अन्नमाश्रित्यतिष्ठन्ति पुंसांपापानिवैयतः। तस्मात्सत्वविशुद्ध्यर्थी दुष्टान्नस्याशनन्त्यजेत् ॥ ११ ॥ दुष्टान्नभक्षण

स्यापि सत्वाशुद्धेर्हिहेतुता। पराशरादिभिः प्रोक्तातद्वाक्यानि लिखाम्यतः॥ १२॥ पराशरस्मृ०। अन्नदोषेणचित्तस्य कालुष्यं सर्वदाभवेत्। कलुषाकृष्टचित्तानां धर्मःसम्यङ्नभासते॥ १३॥ दुःकृतंनिखिलंनृणामन्नाधारेव्यवस्थितम्। तस्य प्रतिग्रहं कुर्यान्नाऽपरीक्ष्यकथञ्चन॥ १४॥ अकर्त्तव्यमकर्त्तव्यंप्राणःकण्ठगतैरपि। कर्त्तव्यमेवकर्त्तव्यं प्राणैकण्ठगतैरपि ॥ १५॥ याज्ञवल्क्य स्मृ०। कर्त्तव्याशयशुद्धिस्तु भिक्षुकेणविशेषतः। ज्ञानोत्पत्तिनिमित्तत्वात्स्वातन्त्र्यकरणायच॥ १६॥ वाक्यसं०। दुष्टान्नान्यपिचोक्तानि धर्मशास्त्रेहिमानवे। भारतेपि तथोक्तान्यनुवदाम्यचतान्यपि॥ १७॥ मनुः०। राजान्नंतेजआदत्ते शूद्रान्नं ब्रह्मवर्चसम्। आयुर्हिस्वर्णकारान्नं यशश्चर्मावकर्त्तिनः॥ १८॥ कारुकान्नंप्रजांहन्ति वलंनिर्णेजकस्यच। गणान्नंगणिकान्नञ्च लोकेभ्यःपरिकृन्तति॥ १९॥ पूयञ्चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम्। विष्टावार्द्धुषिकस्यान्नं शस्त्रविक्रयिणोलमम्॥ २०॥ नराज्ञःप्रतिगृह्णीयाद राजन्यप्रसूतितः। सूनाचक्रध्वजवतां वेशेनैवचजीवताम्॥ २१॥ दशसूनासमंचक्रं दशचक्रसमोध्वजः। दशध्वजसमोवेशो दशवेशसमोनपः॥ २२॥ दशसूनासहस्राणि योववहतिसौनिकः। तेन

तुल्यःस्मृतोराजा घोरस्तस्यप्रतिग्रहः॥ २३॥ योराज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्त्तिनः। सपर्य्यायेणयातीमान्नर कानेकविंशतिम्॥ २४॥ भारत०। दीक्षितस्यकदर्य्यस्य क्रतुविक्रयिकस्यच। तक्षणश्चर्म्मावकर्त्तुश्चपुंश्चल्यारजकस्यच॥ २५॥ वामहस्ताहृतंचान्नं भुक्तंपर्युषितंचयत्। सुरानुगतमुच्छिष्ट मभोज्यंशेषितंचयत्॥ २६॥ समानमेकपंक्त्यांतु भोज्यमन्नंनरेश्वर। विषंहलाहलंभुङ्क्ते योऽप्रदायसुहृज्जने॥ २७॥ मनु०। यएतेत्वभोज्यान्नाःक्रमशः परिकीर्त्तिताः। तेषांत्वगस्थिरो माणिवदन्त्यन्नंमनीषिणः॥ २८॥ वाक्यसं०। क्षुधयापीड्यमानस्य मरणमापतेद्यदि। तदादुष्टान्नभुक्तौ नदोषोस्तीत्यब्रवीन्मनुः॥ २९॥ मनु०। जीविताऽत्ययमापन्नो योन्नमत्तियतस्ततः। आकाशमिवपङ्केन नसपापेनलिप्यते॥ ३०॥ वाक्यसं०। येनकेनाप्युपायेन स्वधर्म्मंपरिपालयेत्। इतिमन्वादितात्पर्य्यं मतोनात्रविरोधता॥ ३१॥ नन्वन्तःकरणस्य प्राग्युक्तंशुद्धिसाधनम्। स्वधर्म्मस्याभिसेवाख्यं तत्सम्यक्स्यात्कथंन्विह॥ ३२॥ यतोलक्षणमानाभ्यां वस्तुसिद्धिःप्रभण्यते। धर्म्मस्यलक्षणंचातो धर्म्मे मानंचसंवद॥ ३३॥ लक्षणंशृणुधर्म्मस्य तत्रमानंतथाशृणु। जैमिन्याद्यृषिवाक्याभ्यां तद्द्वयंह्यवदामिते

निदानस्यानुभवस्यापि मानता ॥ ८१ ॥ सौषुप्तानुभवेनेत्थं सिद्धात्मनः सुखात्मता। दुःखादिश्च भवेन्मिथ्या सुप्तावनुपलब्धितः ॥ ८२ ॥ इत्थंवैवेदमूलेनानुमानेनेहदर्शिता। भेदमात्रस्य भेदानांवन्धस्य च मृषात्मता ॥ ८३ ॥ जीवस्य ब्रह्मणाऽभेदएवंसत्युपपद्यते। ज्ञातेतस्मिं स्तदज्ञानं सविलासम्विनश्यति ॥ ८४ ॥ तस्मिन्नष्टेतुशास्त्रस्य विषयः सप्रयोजनः। सिद्ध्यत्येवंहि शास्त्रेस्मिन्धीमत्प्रवृत्तिकारणम् ॥ ८५ ॥ शास्त्रीययोस्तयोःसिद्धौ ग्रन्थस्यास्यापिसिध्यति। सफलो विषयोयस्मात्तस्यप्रकरणंत्वयम् ॥ ८६ ॥ विषयादिविचाराख्यं ग्रन्थारम्भोपपादकम्। आद्यंप्रकरणंपूर्णं जातं रामप्रसादतः ॥ ८७ ॥

इति श्रीमुमुक्षु सर्वस्वसारसङ्ग्रहाभिधेग्रन्थे विषयाद्युपपादकं प्रथमं प्रकरणं समाप्तम् ॥ ० ॥ ० ॥

तयोर्मुख्येतिनिश्चिनु ॥ ४५ ॥ ननुचतद्यथेत्याद्यैर्वाक्यैर्हिनिन्दितत्वतः। सत्त्वशुद्धेस्तुहेतुत्वं कर्मणांनोपपद्यते ॥ ४६ ॥ मैवमु
क्तायतःश्रुत्या भगवद्गीतयातथा। निष्कामकर्मणांपुंसः सत्त्वशुद्ध्यादिहेतुता ॥ ४७ ॥ तद्यथेत्यादिकानिन्दा साफलांशनिषे
धिका। धर्मेणेत्यादिवाक्यानि स्मृत्वाचाशंकितोभव ॥ ४८ ॥ अविद्ययामृत्युंतीर्त्वेतिश्रुत्येत्यवगम्यते। फलेच्छांतुविनाकर्म
कृतंसत्त्वस्यशुद्धिकृत् ॥ ४९ ॥ कर्मण्येवाधिकारस्ते माफलेषुकदाचन। इत्यादिस्मृतिभिश्चापि फलांशैवनिषिध्यते ॥ ५० ॥
हृच्छुद्ध्यादेर्हिनव्यस्तु कर्मजत्वंश्रुतेर्बलात्। नात्मज्ञानस्यतद्युक्तं प्रमाणजंयतोस्तितत् ॥ ५१ ॥ विमतंह्यात्मनोज्ञानं नैवकर्मा
ण्यपेक्षते। स्वोत्पत्तिंप्रतिमात्वेन घटज्ञानादिकंयथा ॥ ५२ ॥ वाक्यश्रवणमात्रात्स्या त्तत्त्वज्ञानंयतोनृणां। तेनमोक्षोपिसंसिध्ये
ज्ज्ञानायातःक्रियावृथा ॥ ५३ ॥ सत्यंप्रमाणजन्यत्वं ज्ञानस्यास्माकमीप्सितम्। कर्मजत्वंतथाप्यस्य यज्ञेनेतिश्रुतेर्बलात् ॥ ५४ ॥
उत्पन्नमात्मनोज्ञानं त्वनपेक्षंफलंप्रति। स्वोत्पत्तिंप्रत्यपेक्षेत कर्मयोग्यतयाश्ववत् ॥ ५५ ॥ अज्ञानस्यनचोच्छेदे ज्ञानाद्भिन्न
मपेक्ष्यते। तस्योत्पत्तौतुनैवान्य द्विवेकादेरपेक्ष्यते ॥ ५६ ॥ विवेकादेस्तुसंजन्यै सत्वशुद्धिरपेक्ष्यते। सत्वशुद्धौतुनिष्काम

कर्मभ्योनान्यदिष्यते ॥ ५७ ॥ पारंपर्येणयुक्तैवं ज्ञानस्यकर्मजन्यता । साधनंस्यादतःकर्म तत्साध्यमात्मवेदनम् ॥ ५८ ॥ स्मृतिः । कषायपक्तिःकर्माणि ज्ञानंतुपरमागतिः । कषायेकर्मभिःपक्वे ततोज्ञानंप्रवर्त्तते ॥ ५९ ॥ वाक्यसं० । इत्यादि स्मृतिभिःप्रोक्ता कर्मणांज्ञानहेतुता । तस्माज्ज्ञानार्थिनातावत्कार्यायागादिकाःक्रियाः ॥ ६० ॥ वेदव्यासोपिविद्यायाः कर्मजन्यत्वमुक्तवान् । सर्वापेक्षाचयज्ञादि श्रुतेरश्ववदित्यतः ॥ ६१ ॥ अशुद्धचेतसोभ्रान्त्या ज्ञानेभोगादिनाशके । भवेत्पापवतोद्वेषः प्रतिबन्धस्यसत्वतः ॥ ६२ ॥ यागाद्यैःशुद्धचित्तस्य विवेकःसत्वशुद्धिजः । जिज्ञासांसत्वलोका दौव्यनक्त्येवाशुनिर्मलाम् । तस्मात्पापौघनाशाय कार्योधर्मोमुमुक्षुभिः ॥ ६३ ॥ ननुचित्तस्यकाऽशुद्धिर्यास्वधर्मेणनाश्यते । पापोपलेपरूपावा विषयाकारताथवा ॥ ६४ ॥ किल्बिषानामनंतत्वा द्विनाज्ञानादिनाक्षयः । नसम्भवतियस्माद्धि तस्मान्नाद्यस्यसम्भवः ॥ ६५ ॥ जलादेर्द्रवतादीनां तत्सत्वेनयथाक्षयः चित्तसत्वेनतद्वत्स्या द्विषयाकारताक्षयः ॥ ६६ ॥ धर्मिणिसतिधर्मस्य ननाशोस्तिस्वभावतः । तस्मिन्नष्टेत्वयत्नेन धर्मनाशोपिसम्भवेत् ॥ ६७ ॥ द्वितीयासम्भवश्चैव मतोधर्माभिसेवने । राजान्नादेश्चसन्त्यागेजिज्ञासोःस्यात्क्र

मु० सा० मोवृथा ॥ ६८ ॥ सत्यंकिल्बिषबाहुल्यं यत्त्वयोक्तंतथापितु । विनाब्रह्मात्मविज्ञानंयद्वद्ब्रह्मवधादिकाः ॥ ६९ ॥ अधर्मा
८ नाशमायान्ति प्रायश्चिताख्यकर्मणा । तद्वद्धर्मेणसंनश्येत्पापंचित्तप्रदूषकम् ॥ ७० ॥ अतश्चित्तप्रसादस्य जनकत्वेनहेतुना ।
धर्मोजिज्ञासुनाकार्यो यावज्ज्ञानंनसंभवेत् ॥ ७१ ॥ भोगेनाप्यखिलाघानां यश्चादिनोदितःक्षयः । सनास्त्यभिनवंयस्मा
द्भोगकालेऽघमुद्भवेत् ॥ ७२ ॥ विषयाकारताख्याया चित्तस्याशुद्धिरीरिता । सापिनाशयितुंशक्या स्वाभाविकीयतोनसा
॥ ७३ ॥ स्वार्थसंगोयथास्थूल विषयाकारतांप्रति । चित्तस्यजागरेहेतुर्हृदःस्वप्नेतथापुनः ॥ ७४ ॥ विषयाकारताहे
तुर्मनोगताहिवासना । तदुभयात्ययेचित्तं सुप्तौनिविषयंयतः ॥ ७५ ॥ सुप्तौनलीयतेचित्तं विषयाकारतातदा । नि
मित्तापगमादेव नाशंयातिह्यतिस्फुटम् ॥ ७६ ॥ सुप्तौलीयेतचेच्चित्तं नोत्थितस्यपुनर्भवः । तर्हिचित्तस्यसत्ताऽतः सुप्ता
वस्तीतिगम्यते ॥ ७७ ॥ तदापीतेर्हिसंसारव्यप देशादितीरयन् । श्रीव्यासोपिजगौसुप्तौ मनःसत्तांभवोद्भवाम् ॥ ७८ ॥
अपञ्चीकृतभूतानां सात्विकांशाद्धिनिर्मलात् । उत्पन्नंचित्तवस्तुस्या त्स्वतस्तुमलिनंकथम् ॥ ७९ ॥ सितेभ्यद्दृढतन्तुभ्यो

॥ ३४ ॥ चोदनालक्षणोधर्म इति धर्मस्यलक्षणम्। श्रीमज्जैमिनिनाप्रोक्तं मानंतुमनुनेरितम् ॥ ३५ ॥ मनु०। वेदोखि
लोधर्ममूलं स्मृतिशीलेचतद्विदाम्। आचारश्चैवसाधूना मात्मनस्तुष्टिरेवच ॥ ३६ ॥ वाक्यसं०। स्वधर्मोऽनुष्ठितः सम्य
ङ्निष्कामः सत्वशुद्धिदः। स्ववर्णाद्यनुसारेण कामोह्यनर्थकारणम् ॥ ३७ ॥ कामात्मतानप्रशस्तेत्युक्तवांश्चयतोमनुः। तस्मा
त्काममपरित्यज्य कार्यंस्वधर्मसेवनम् ॥ ३८ ॥ सदाचारस्तथासेव्यो धर्ममूलोयतोस्तिसः। आचारप्रभवोधर्म इति वाक्या
त्स्मृतीरितः ॥ ३९ ॥ तथान्तःकरणस्यात्र शुद्धिंकर्त्तुमभीप्सता। निष्कामकर्मकर्त्तव्यं गीताशास्त्रानुसारतः ॥ ४० ॥ गीता०।
कायेनमनसाबुद्ध्या केवलैरिन्द्रियैरपि। योगिनःकर्मकुर्वन्ति सङ्गंत्यक्त्वाऽऽत्मशुद्धये। युक्तःकर्मफलन्त्यक्त्वाशान्तिमाप्नोतिनै
ष्ठिकीम् ॥ ४१ ॥ वाक्यसं०। नन्वेवङ्कर्मणांचास्तु सत्वशुद्धेर्हिहेतुता। तच्छुद्धेःकिंफलंप्रोक्तं यदर्थंकर्मचोद्यते ॥ ४२ ॥ शृणु
विविदिषाज्ञानं वामुख्यंकर्मणांफलं। तमेतमितिवाक्येन संयागस्यपृथक्त्वतः ॥ ४३ ॥ स्याद्वारंसत्वशुद्धिस्तु विविदिषादिसम्भ
वे। द्वारत्वात्कर्मजत्वेन तस्यास्तत्फलतेरिता ॥ ४४ ॥ सत्वशुद्धिप्रसूतत्वं विविदिषात्मसंविदोः। अतस्तत्फलताप्यस्ति

हिता: ॥ ९१ ॥ तेतुकुर्वंतिचेद्धर्मंख्यात्याद्यर्थंनचेतस: । शुद्ध्येतंपरेशार्थं मर्पयंतिकलेर्वशात् ॥ ९२ ॥ नन्वल्पोपियथाव
ह्निर्दहतितृणकूटकम् । तथास्वल्प:कृतोधर्मो ऽधर्मंसनाशयेद्ध्रुवम् ॥ ९३ ॥ सत्यमेवंत्वयोक्तंस्याद्यदिधर्म:सुसाधित: । भवे
त्तंहिनसम्यङ्गाकलौसाधयितुंक्षम: ॥ ९४ ॥ धर्मसंकरताचापि दृश्यतेहियत:कलौ । धर्मैर्वर्णाश्रमाणांस्याच्चित्तशुद्धिरत:
कथम् ॥ ९५ ॥ ज्ञानशुद्धिस्तुयाप्रोक्ता सापीश्वरकृपांविना । नास्त्यल्पधर्मकस्याच युगेह्यच्छुद्धिसाधनम् ॥ ९६ ॥ पराशरा
दिसर्वज्ञै: कलेर्वलंनिरूपितम् । स्वीयेषुधर्मशास्त्रेषु तद्वाक्यान्यनुसंब्रुवे ॥ ९७ ॥ पराशरवा० । जितोधर्मोह्यधर्मेण
जितंसत्यमनृतेनच । जिताश्चौरैश्चराजान: स्त्रीभिश्चपुरुषा:कलौ ॥ ९८ ॥ विश्नुपुराणवा० । भैक्षवृत्त्यातथाशूद्रा:
प्रव्रज्यालिंगिनोऽधमा: । पाखण्डसंश्रयांवृत्ति माश्रयिष्यंत्यसंस्कृता: ॥ ९९ ॥ सर्वेब्रह्मवदिष्यन्ति सम्प्राप्तेतुकलियुगे ।
नानुतिष्ठन्तिमैत्रेयशिश्नोदरपरायणा: ॥ १०० ॥ भविष्यत्पु० । गृहेगृहेपुस्तकभार भारंपुरेपुरेपण्डितयूथयूथम् । मठेमठे
तापसवृन्द वृन्दंनचब्रह्मवेत्तानच कर्मकर्त्ता ॥ १०१ ॥ भागवतपु० । तप:शौचंदयासत्य मितिपादा:कृतेकृता: । अध

र्मांशैस्त्रयोभग्नाः स्मयसंगमदैस्तव ॥ १०२ ॥ इदानींधर्मपादस्ते सत्यंनिर्वर्त्तयेद्यतः । तंजिघृक्षत्यधर्मोय मनृतेनैधितःक
लिः ॥ १०३ ॥ वाक्यसं० । इत्थंपराशरादीनां वाक्यैर्वर्णाश्रमाश्रितम् । धर्मंतिरस्करोत्येवा धर्मेणावर्द्धितःकलिः ॥ १०४ ॥
अतोन्यत्साधनंवाच्यं यत्कलिनाऽतिरस्कृतं । सर्वाधिकारकंयच्च सुकरंशास्त्रसंमतम् ॥ १०५ ॥ चित्तस्यशोधकंचाशुद्धिवि
धाऽशुद्धिनाशकम् । तादृक्तुसाधनंनास्तिस्याद्धृच्छुद्धिरतःकथम् ॥ १०६ ॥ मैवंभगवतोभक्ति योगोस्त्येवेश्वरेरितः । द्विवि
धाशुद्धिनाशाय श्रीमद्भागवतेखलु ॥ १०७ ॥ भक्तेश्चमहिमानैव कलिनाप्यभिभूयते । इत्युक्तंधर्मराजेन यमस्मृतौतुवैस्फु
टम् ॥ १०८ ॥ प्राणिमात्रोधिकार्य्यस्याः श्रीगीतायांसमीरितः । सुकरत्वंचभक्तेर्वै श्रीभारतेसमीरितम् ॥ १०९ ॥ पाप
कर्मादिभिश्चित्तं मालिन्यमुपढौकते । भक्तेश्चाघविरोधित्वाद्भवेद्धृच्छुद्धिहेतुता ॥ १०१० ॥ यथाऽपांक्षारयुक्तानां वस्त्रादिशुद्धि
हेतुता । इतियुक्तिस्तथैवोह्या भक्तेश्चित्तप्रशोधने ॥ १११ ॥ प्रोक्तेयंनवधात्वेन पुराणेवेदसंमता । कैर्वाक्यैरुदितंचैतदितिचे
च्छृणुतान्यपि ॥ ११२ ॥ भागवतवा० । यथाऽग्निनाहेममलंजहातिध्मातंपुनःस्वंभजतेस्वरूपं । आत्मातुकर्मानुशयंविधूय । मद्भ

क्तियोगेनभजत्यथोमाम् ॥ ११३ ॥ प्रोक्तेनभक्तियोगेन भजतोमामसकृन्मुने: । कामाहृदय्यानश्यंति सर्वेमयिहृदिस्थिते ॥ ११४ ॥
यमस्मृति: । घोरेकलियुगेप्राप्ते सर्वधर्मविवर्जिते । वासुदेवपराराजंस्तेकृतार्थानसंशय: ॥ ११५ ॥ गीता ० । मांहिपार्थव्यपा
श्रित्ययेपिस्यु:पापयोनय: । स्त्रियोवैश्यास्तथा शूद्रास्तेपियांतिपरांगतिम् ॥ ११६ ॥ किंपुनर्ब्राह्मणा:पुण्या: भक्ताराजर्षयस्तथा ।
अनित्यमसुखंलोक मिमंप्राप्यभजस्वमाम् ॥ ११७ ॥ भारत० । पत्रेषुपुष्पेषुफलेषुतोये । ष्वक्रीतलभ्येषुसदैवसत्सु । भक्त्यैकलभ्ये
पुरुषेपुराणेमुक्त्यैकथंनक्रियतेप्रयत्न: ॥ ११८ ॥ भागवतवा ० । श्रवणंकीर्त्तनंविष्णो: स्मरणंपादसेवनम् । अर्चनंवंदनंदास्यं
सख्यमात्मनिवेदनं ॥ ११९ ॥ इतिपुंसार्पिताविष्णौभक्तिश्चेन्नवलक्षणा । क्रियतेभगवत्यद्धातन्मन्येऽधीतमुत्तमम् ॥ १२० ॥ वाक्य
सं ० । संकीर्त्तनाख्यभक्तेस्तु महिमाब्रह्मणोदित: । कलिसंतरणाख्यायामुपनिषद्यपिस्फुटम् ॥ १२१ ॥ तामर्थत:पठामीह तस्या
मन्त्रौचपाठत: । पठामिनु:प्रवृत्त्यर्थंभक्तौहृच्छुद्धिमीप्सत: ॥ १२२ ॥ द्वापरांतेसमभ्येत्यनारद:परिपृष्टवान् । ब्रह्माणंस्वोपदेष्टा
रंकलिसंतरणेविधिम् ॥ १२३ ॥ कथन्नुभगवंश्चाहं पृथिवीं पर्यटन्सदा । संतरेयंकलिंघोरं सर्वधर्मप्रणाशकं ॥ १२४ ॥ साधुपृ

नाऽसितोजायतेपटः। विषयाकारताशुद्धिर्हृद्दोऽतोनैववास्तवी॥ ८०॥ अतःसमोनदृष्टान्तः पूर्वपक्षीयमुक्तवान्। द्रव
त्वादेर्द्धवादीनां स्वभावताऽप्यगोचरा॥ ८१॥ प्रथमाऽशुद्धिनाशाय धर्मानुष्ठानमीरितम्। द्वितीयाशुद्धिनाशाय ज्ञान
शुद्धिंनिबोधत॥ ८२॥ आहारस्यैवसंशुद्धौ सत्वशुद्धिर्भवेद्ध्रुवम्। इतिछांदोग्यवाक्येन ज्ञानशुद्धिःप्रदर्शिता। ८३। हेतु
तासत्वशुद्धेर्हि तथाभाष्यकृतापिच। आहारोविषयज्ञानं भोक्तुर्भोगाययद्भवेत्। ८४। रागद्वेषादिराहित्यं तच्छुद्धिरिहो शु
च्यते। तस्यांसत्यांचसत्वस्थांतःकरणस्यशुद्धिता॥ ८५॥ इतिछांदोग्यवाक्यार्थः संक्षेपेणेहदर्शितः। ज्ञानशुद्धिश्चकर्त्त
व्या चित्तशुद्धौ ह्यतोबुधैः॥ ८६॥ रागद्वेषादिनाचित्तं द्रुतंसद्विषयाकृतिम्। यात्यतस्तत्परित्याज्यं चित्तशुद्ध्यर्थिनासदा
॥ ८७॥ रागद्वेषौविहायैवं दुष्टान्नभक्षणंतथा। स्वधर्मश्चसदासेव्य श्चित्तशुद्ध्यर्थिभिर्जनैः॥ ८८॥ ननुघोरेकलौकाले
सर्वधर्माभिभावके। वर्णाश्रमाश्रितोधर्मः प्रयेणाऽल्पत्वमागतः॥ ८९॥ तेनचित्तस्यशुद्धिःस्यान्नैव कलियुगेनृणां। यथा
त्यल्पेनक्षारेणचक्लिन्नवस्त्रंनशुद्ध्यति। ९०। जनायतःकलावद्य प्रायेणस्त्रीपराजिताः। नानुतिष्ठंतिधर्मान्स्वान्दैवीमायाविमो

मु० सा० मिते। विष्णोःशिवस्यवाभक्तिर्विधेयाश्रद्धयास्वया ॥१३७॥ नरःसत्वविशुद्ध्यर्थी कलौनामानिकीर्त्तयेत्। शिवस्यवाथवाविष्णोः
११ स्वस्वप्रीत्यनुसारतः ॥ १३८ ॥ नतयोर्भेदद्दष्टिस्तुकर्त्तव्याह्निकदाचन। तद्भेदज्ञस्यशास्त्रेषुदुःखाऽवाप्तिश्रुतायतः ॥ १३९ ॥ ना
रदीयपु० वा०। हरिरूपीमहादेवो लिंगरूपीजनार्द्दनः। ईषदप्यंतरंनास्तिभेदकृन्नरकंव्रजेत् ॥ १४० ॥ कर्मविपाकवा०।
योब्रह्मविष्णुरुद्राणां भेदमुत्तमभावनः। साधयेदुदरव्याधियुक्तोभवतिमानवः ॥ १४१ ॥ भविष्यपु०। विष्णोरन्यंतुपश्यंतियेमां
ब्रह्माणमेवच। कुतर्कमतयोमूढाः पच्यंतेनरकेष्वधः ॥ १४२ ॥ वाक्यसं०। यथाभेदंपरित्यज्य कार्याभक्तिर्हरीशयोः। यस्यदे
वइतिश्रुत्याभक्तिःकार्यागुरोस्तथा ॥ १४३ ॥ शिवेरुष्टेगुरुस्त्राता गुरौरुष्टेनकश्चन। इत्यादिस्मृतिवाक्यैश्चसाकार्याचित्तशुद्धये
॥ १४४ ॥ ननुलक्षणमानाभ्यांवस्तुसिद्धिर्भवेद्यतः। लक्ष्म भक्तेरतोब्रूहिमानंचाप्यघनाशने ॥ १४५ ॥ शृणुवस्यालक्षणंप्रोक्तंग्रंथेभ
क्तिरसायने। पापाद्यशुद्धिदग्धत्वंभागवतेसमीरितं ॥ १४६ ॥ मधुसूदनसरस्वतीवा०। द्रुतस्यभगवद्धर्माद्धारावाहिकतांगता।
सर्वेशेमनसोवृत्तिर्भक्तिरित्यभिधीयते। १४७। भागवतपु०। यथाऽग्निःसुसमिद्धार्चिःकरोत्येधांसिभस्मसात्। तथामद्विषया

भक्तिरुद्धवैनांसिकृत्स्नशः ॥ १४८ ॥ वाध्यमानोपिमद्भक्तो विषयैरजितेन्द्रियः । प्रायःप्रगल्भयाभक्त्याविषयैर्नाभिभूयते ॥ १४९ ॥
वाक्यसं ० । तस्माद्विश्वेशयोर्भक्तिर्गुरुभक्तिस्तथैवच । वाक्कायमानसैःकार्यासत्वशुद्ध्यर्थिनासदा ॥ १५० ॥ पारंपर्येणमोक्षस्य साध
नत्वंसमीरितं । हृच्छुद्धेस्तुयतःश्रुत्याऽऽदौतांसंपादयेत्ततः ॥ १५१ ॥ श्रुतिः । चित्तस्यहिप्रसादेनहंतिकर्मशुभाऽशुभम् । प्रस
न्नात्मात्मनिस्थित्वासुखमव्ययमश्नुते ॥ १५२ ॥ वाक्यसं ० । फलाशांसर्वथाहित्वानित्यादिकर्मणांकृतिः । भगवतोगुरोस्तद्वदृ
जुभावेनसेवनम् ॥ १५३ ॥ दुष्टान्नाशनसंत्यागो ज्ञानशुद्धिस्तथैवच । चत्वार्य्येतानिसत्वस्यशुद्धिहेतुतयामया ॥ १५४ ॥ साधना
निद्वितीयेऽस्मिन्श्रुतिस्मृत्यनुसारतः । निरूपितानिसेव्यानि सत्वशुद्धिमभीप्सुभिः ॥ १५५ ॥ एवंमुमुक्षु सर्वस्वसारसंग्रहनाम
के । हृच्छुद्धिसाधनानांहिग्रन्थेपूर्णंनिरूपणं ॥ १५६ ॥ २४३ ॥ इति श्रीमुमुक्षु सर्वस्वसारसंग्रहाख्येनिबंधे सत्वशुद्ध्याख्यं
द्वितीयंप्रकरणं समाप्तम् ॥ ० ॥ ० ॥

मु० सा० ॐ शुद्धसत्वाःपुमांसोहि विवेकादीन्प्रकुर्वते। यत्स्वरूपविचारायतं श्रीराममहंभजे ॥ १ ॥ निष्कामकर्मसेवाद्यैर्हृच्छु
१२ द्धिर्यस्यजायते। नष्टाघौघस्यतस्यैवविवेकादेर्हियोग्यता ॥ २ ॥ नित्यानित्यविवेकस्तु सुदृढोयस्यजायते। इहामुत्रार्थवैराग्यं
सम्यक्तस्यैवसम्भवेत् ॥ ३ ॥ ततःशमादिनासार्द्धंसंन्यासस्तस्यसम्भवेत्। शमादीनांहिसंपत्तेर्मोक्षेच्छातस्यसम्भवेत् ॥ ४ ॥ वेदां
तश्रवणस्यैवंसूचकृदधिकारिणाम्। अथातइतिशब्दाभ्यामाद्यसूत्रेह्यसूचयत् ॥ ५ ॥ सहेतुकामनःशुद्धिर्द्वितीयेप्रागुदीरिता।
प्रकरणेतृतीयेस्मिन्विवेकादिप्रपंच्यते ॥ ६ ॥ मलिनमनसःपुंसोविवेकादिसुदुर्लभम्। अतस्त्वेतत्त्वधीत्वाद्धीशुद्धिस्तज्जनिका
ततः ॥ ७ ॥ कारणंहिभवेत्पूर्वंकार्यंतदनंतरम्। हृच्छुद्ध्यादिनिबंधोद्वौपौर्वापर्य्यमतोऽर्हतः ॥ ८ ॥ नित्यंदृगात्मतत्त्वंहिदृश्यं
त्वनित्यमुच्यते। परोक्षोनिश्चयोह्येवंयःसविवेकउच्यते ॥ ९ ॥ श्रुतयस्तद्यथेत्याद्याविवेकेयांतिमानताम्। यत्कृतकंतदेवासदि
तिन्यायसमन्विताः। १०। नित्याऽनित्यविवेकस्याऽभ्यासःसम्यगनुष्ठितः। जनयत्याशुवैराग्यंशमादिषट्ककारणम्। ११। इहा
मुत्रार्थभोगेषुसत्कारस्यचनाशकम्। सूतेऽरणिर्यथावह्निंमथितादारुदाहकम्। १२। विवेकस्यसमावृत्तिर्वसिष्ठेनप्रदर्शिता।

ष्टोऽस्मिसर्वासांश्रुतीनांसुरहस्यकम्। शृणुयेनकलिंत्वंत्वऽनायासात्संतरिष्यसि ॥ १२५ ॥ नारायणस्यविष्णोर्वै नाम्नाभगवतोमु
ने। पप्रच्छनारदोभूयस्तन्नामभगवन्वद ॥ १२६ ॥ सहोवाचशृणुष्वाद्यविष्णोनामानिनारद। यानिपठन्नरोयाति सलोकतादिकं
हरेः ॥ १२७ ॥ मन्त्रौ। हरेराम हरेराम रामराम हरेहरे। हरेकृष्णहरेकृष्णकृष्णकृष्णहरेहरे ॥ १२८ ॥ इतिषोडशकं
नाम्नांकलिकल्मषनाशनम्। नातःपरतरोपायः सर्ववेदेषुदृश्यते ॥ १२९ ॥ काक्यसं०। इतिषोडशकंजप्त्वं जीवात्मानंविनाश
येत्। ततःप्रकाशतेब्रह्म मेघापायेरविर्यथा ॥ १३० ॥ पप्रच्छनारदोभूयः कोऽस्यविधिर्जपेपितः। सहोवाचचनैवास्ति विधिरस्य
जपेसुत ॥ १३१ ॥ शुचिःसन्नऽशुचिर्वासन्यठन्नेतिसलोकताम्। सामीप्यंब्रह्मणस्तद्वत्सायुज्यंचेतिवैनरः ॥ १३२ ॥ षोडशक
स्यचेत्सार्द्धंत्रिकोटिंजपतीहयः। तरतिब्रह्महत्यांसवीरहत्यांतथैवसः ॥ १३३ ॥ मुच्यतेहेमचौर्य्यात्स वृषलीगमनात्तथा। पितृ
देवमनुष्याणामृणाऽनपनयात्तथा ॥ १३४ ॥ स्वस्वधर्मपरित्यागपापात्सद्यःसमुच्यते। इत्युक्तवांस्त्रिवारंत्वऽब्जयोनिर्नारदायवै ॥ १३५
भक्तेर्हिर्महिमायस्मा द्वेदेनापीत्थमीरितः। तस्माद्धृच्छुद्धयेकार्याकलौसासर्वथाबुधैः ॥ १३६ ॥ कस्यभक्तिर्विधेयेतिचेत्कृणुष्ववदा

यम्यते। वायुरप्येत्यऽवायुत्वंकैवास्थाममजीवने ॥ २६ ॥ परमेष्ठ्यपिनिष्ठावान्ह्रियतेहरिरप्यजः। भवोप्यऽभावमायातिकैवास्था
ममजीवने ॥२७॥ अद्योत्सवोऽयंमृत्युरेषतथेहयात्रा। तेवन्धवःसुखमिदंसविशेषभोगं। इत्थंमुधैवकलयन्सुविकल्पजाल। मा
लोलपेलवमतिर्गलतीहलोकः। २८ ॥ पर्णानिजीर्णानियथातरूणां। समेत्यजन्माशुलयंप्रयांति तथैवलोकाःस्वविवेकहीनाः
समेत्यगच्छंतिकुतोप्यहोभिः ॥ २९ ॥ कास्ताद्दशोयासुनसंतिदोषाः कास्तादिशोयासुनदुःखदाहः। कास्ताःप्रजायासुनभंगुरत्वं
कास्ताःक्रियायासुननाममाया ॥३०॥ स्वदंतेतावदेवैतेभावाजगतिधीमते। यावत्स्मृतिपथंयातिनविनाशःकुराक्षसः ॥३१॥ विषं
विषयवैषम्यंनविषंविषमुच्यते। जन्मांतरघ्नाविषयाएकदेहहरंविषम् ॥ ३२ ॥ मोक्षधर्मेवा ०। श्वःकार्यमद्यकुर्वीतपूर्वाह्णेचापरा
ह्णिकं। नहिप्रतीक्षतेमृत्युःकृतमस्यनवाकृतम् ॥ ३३ ॥ तंपुत्रपशुसंपन्नंव्यासक्तमनसंनरं। सुप्तंव्याघ्रंमहौघेवमृत्युरादायगच्छति
॥ ३४ ॥ इदंकृतमिदंकार्यमिदमन्यत्कृताकृतं। एवमीहासुखासक्तंकृतांतःकुरुतेवशे ॥ ३५ ॥ जरामृत्यूहिभूतानांखादितारौ
वृकाविव। वलिनांदुर्वलानांचह्रस्वानांमहतामपि ॥ ३६ ॥ एवंभूतेषुभूतात्मानित्यभूतोऽध्रुवेषुच। कथंहिहृष्येज्जातेषुमृतेषुच

नसंज्वरेत् ॥ ३७ ॥ फेनमात्रोपमेदेहेजीवेशकुनिवत्स्थिते । अनित्येप्रियसंवासेकथंस्वपिषिपुत्रक ॥ ३८ ॥ अप्रमत्तेषुजाग्रत्सु
नित्ययुक्तेषुशत्रुषु । अंतरंलिप्समानेषुकथंत्वंनावबुध्यसे ॥ ३९ ॥ पुराशरीरमंतकोभिनत्तिरोगसारथिः । प्रसह्यजीवितक्षयेतपो
महत्समाचर ॥४० ॥ वाक्यसं ० । वैराग्यकारणत्वेनविवेकःसंमतोविदाम् । तदभ्यासस्यसंसिद्धौवाक्योदाहरणंमुहुः ॥ ४१ ॥
अनित्यत्वादिदोषाणामालोचनंमुहुर्मुहुः । भवेनुभूतियुक्तिभ्यांविवेकाभ्यसनंस्मृतम् ॥ ४२ ॥ वैराग्यस्ययतोहेतुर्विवेकाभ्यास
उच्यते । तस्मादुक्तप्रकारेणसकार्योऽर्थजिहासुना ॥ ४३ ॥ विवेकाभ्यासचिह्नादिवसिष्टेनोदितंतुयैः । तद्वाक्यानिलिखामीह
विवेकाद्यवबुद्धये ॥ ४४ ॥ वसिष्टवा ० । विचारःसफलस्तस्यविज्ञेयोयस्यसन्मतेः । दिनानुदिनमायातितानवंभोगगृध्नुता ॥४५॥
यथास्पर्शेनपवनःसत्तामायातिनोगिरा । तथेच्छातानवेनैवविवेकोस्यविबुध्यते ॥ ४६ ॥ यथादेहोपयुक्तंहिकरोत्यारोग्यमौष
धम् । तथेन्द्रियजयेभ्यस्तोविवेकःफलितोभवेत् ॥ ४७ ॥ विवेकोस्तिवचस्येवचित्तेऽग्निरिवभासुरः । यस्यतेनाऽपरित्यक्तादुःखाये
वा विवेकिता ॥ ४८ ॥ चित्तामृतंनामृतमेवविद्धि चित्तानलंनानलमेवविद्धि । चित्तांगनानूनमनंगनेति वाचाविवेकस्त्वविवेक

एव ॥४९॥ येहिप्राज्ञाःस्वऽनियताविदग्धाःशास्त्रशालिनः। रागद्वेषमयास्तेवैजम्बुकास्तेधिगस्तुतान्। ५०॥ श्रूयतांज्ञानसर्वस्वं श्रुत्वाचैवाऽवधार्य्यतां। भोगेच्छामात्रकोवंधस्तत्यागोमोक्षउच्यते॥ ५१॥ किमन्यैःशास्त्रसंदर्भैःक्रियतामिदमेवतु। यद्यत्स्वादि ष्टतत्सर्वंदृश्यतांविषवद्धिवत्॥ ५२॥ पूर्वंविवेकेनतनुत्वमेति रागोथवैरंचसमूलमेव। पश्चात्परिक्षीयतएवयत्नः सपावनीयत्र विवेकितास्ति॥ ५३॥ महाजडत्ववाधारेसंसारविषमार्णवे। इन्द्रियग्रामगहनेविवेकःपोतकोमहान्॥ ५४॥ धनानिनाभि वांछ्यंतेतमांसीवविवेकिना। त्यज्यंतेविद्यमानानिसंशुष्काऽमेध्यपर्णवत्॥ ५५॥ वाक्यसं०। एवंविवेकचिह्नादिवसिष्टोक्त्ये हदर्शितम्। विवेकजंतुवैराग्यमधुनाग्रेप्रदर्श्यते॥ ५६॥ भोग्येषुवीततृष्णत्वंवैराग्यमितिकथ्यते। त्यक्तेषुतेष्वदैन्यंयत्तद्वैराग्य फलंविदुः॥ ५७॥ स्वांचोच्चारइवार्थेष्वनादरोयश्चसर्वथा। वैराग्यस्यावधिंप्राहुस्तंविरक्ताःयतीश्वराः॥ ५८॥ परीक्ष्येत्येवमा द्यास्वश्रुतयोयांतिमानतां। वैराग्येमुंडकादीनांलोकादिदोषदर्शिकाः॥ ५९॥ तदिदंशुक्रमित्याद्यागर्भोपनिषदःश्रुतिः। वैरा ग्यार्थंजगादोच्चैर्देहजन्मक्रमंस्फुटं॥ ६०॥ तथागर्भस्थचिंतापितन्मंत्रैश्चप्रकाशिता। देहाद्विरागसंसिद्ध्यैभोगाधिष्ठानतोऽस्थि

मोक्षधर्मेषुचाप्युक्तंविवेकाभ्यसनंमुहुः ।१३। वासिष्ठवा०। अद्ययेमहतांमूर्ध्नितेदिनैर्निपतंत्यधः। हंतचित्तमहत्तायांकेयंविश्व
स्ततातव।१४। कोटयोब्रह्मणोयातागताःसर्गपरंपराः। प्रयाताःपांशुवद्भूपाःकाधृतिर्ममजीवने।१५। येषांनिमेषणोन्मेषौज
गतांप्रलयोदयौ। तादृशाःसंतिवैनष्टामादृशांगणनैवका॥१६॥ उत्पातवायुरेवायुर्मित्राण्येवातिशत्रवः। वन्धवोवन्धनान्येवध
नान्येवातिनैधनम्॥१७॥ सुखान्येवातिदुःखानिसंपदःपरमापदः। भोगाभवमहारोगारतिरेवपराऽरतिः॥१८॥ भोगावि
षयसंभोगाभोगाएवफणावतां। दशंत्यपिमनाक्स्पृष्टादृष्टानष्टाःप्रतिक्षणम्॥१९॥भोगाशावद्धतृष्णानामपमानःपदेपदे। आलान
मवलीनानांवन्यानामिवदंतिनाम्॥२०॥ संपदःप्रमदाश्चैवतरंगोत्संगभंगुराः। कस्तास्वहिफणाछत्रछायासुरमतेवुधः२१॥ संसा
राचिदुःस्वप्नेशून्येदेहमयेभ्रमे। आस्थांचेदनुवघ्नामितन्ममास्तुधिक्स्थितिम्॥२२॥ संसारएवदुःखानांसीमातःकिलकथ्यते।
तन्मध्यपतितेदेहेसुखमासाद्यतेकथम्॥२३॥ नतदस्तीहयदयंकालःसकलघस्मरः। ग्रसतेनजगज्जातंप्रोत्थाब्धिमिववाडवः
॥२४॥ येरम्यायेशुभारंभाःसुमेरुगुरवोपिये। कालेनविनिगीर्णास्तेगरुडेनेवपन्नगाः॥२५॥ शक्रोप्याक्रम्यतेवचैर्यमोपिह्निनि

मु० सा० शुक्रशोणितसंयोगस्तस्मिन्नेवभवेद्यतः ॥ ७४ ॥ तत्रगर्भोभवेद्यस्मात्तेनप्रोक्तोजरायुजः । अंडजाःपक्षिसर्पाद्याःस्वेदजामशकाद
१५ यः ॥ ७५ ॥ उद्भिज्जावृक्षगुल्माद्यामानसाश्चसुरर्षयः । जन्मकर्मवशादेवनिषक्तंस्मरमंदिरे ॥ ७६ ॥ शुक्रंरजःसमायुक्तंप्रथ
मेमासितद्द्रवं । बुद्बुदंकलिलंतस्मात्ततःपेशीभवेदिदं ॥ ७७ ॥ पेशीघनंद्वितीयेतुमासिपिंडःप्रजायते । करांघ्रिशीर्षिकादी
नितृतीयेसम्भवन्तिहि ॥ ८७ ॥ अभिव्यक्तिश्चजीवस्यचतुर्थेमासिजायते । ततश्चलतिगर्भोपिजनन्याजठरेस्वतः ॥ ७९ ॥ मातु
र्यद्विषयेलोभस्तदार्त्तोजायतेसुतः । प्रवृद्धंपंचमेचित्तंमांसशोणितपुष्टता ॥ ८० ॥ षष्ठेऽस्थिस्नायुनखरकेशलोमविविक्तता । बल
वर्णौचोपचितौसप्तमेत्वंगपूर्णता ८१ ॥ पादांतरितहस्ताभ्यांश्रोत्ररंध्रेपिधायसः । उद्विग्नोगर्भसंवासादस्तिगर्भभयाऽन्वितः
॥ ८२ ॥ आविर्भूतप्रबोधोसौगर्भदुःखादिसंयुतः । हाकष्टमितिनिर्विण्णःस्वात्मानंशुशोचत्यथ ॥ ८३ ॥ अनुभूताःपुराऽसह्या
मयामर्मच्छिदोऽसकृत् । करम्भवालुकास्तप्तायादहंत्यशुभाशयान् ॥ ८४ ॥ जठरानलसंतप्ताःपित्ताख्यारसविप्रुषः । गर्भाशये
निमग्नंतुदहंत्यतिभृशंतुमाम् ॥ ८५ ॥ औदर्यक्रिमिवक्त्राणिकूटशाल्मलिकंटकैः । तुल्यानिचतुदंत्यार्त्तंपार्श्वास्थिक्रकचार्दितं

तम् ॥ ८६ ॥ गर्भेदुर्गंधिभूयिष्टेजठराग्निप्रदीपिते। दुःखंमयाऽऽप्तंयत्तस्मात्कनीयःकुंभिपाकजम् ॥ ८७ ॥ पूयाऽसृक्श्लेष्मपा
यित्वंवाताशित्वंचयद्भवेत्। अशुचौक्रिमिभावश्चतत्प्राप्तंगर्भशायिना ॥ ८८ ॥ एवंस्मरन्युराप्राप्तानानाजातीश्चयातनाः। मो
क्षोपायमपिध्यायन्वर्त्ततेऽभ्यासतत्परः ॥ ८९ ॥ अष्टमेत्वक्श्रुतीस्यातामोजस्तेजश्चहृद्भवम्। शुद्धमापीतरक्तंचनिमित्तंजीवनेमतम्
॥ ९० ॥ किंचित्कालमवस्थानंसंस्कारात्पीडितांगवत्। समयःप्रसवस्यस्यान्मासेषुनवमादिषु ॥ ९१ ॥ मातुरसवहानाडीमाश्रि
त्यावताडितः नाभिस्थानाडीगर्भस्यमाचाहाररसावहा ॥ ९२ ॥ तेनजीवतिगर्भोपिमाचाहारेणपोषितः। अस्थियंत्रविनिष्पिष्टःप
तितःकुक्षिवर्त्मना ॥ ९३ ॥ मेदोऽसृग्दिग्धसर्वांगोजरायुपुटसंवृतः। निष्क्रामन्भृशंदुःखार्त्तोरुदन्नुच्चैरधोमुखः ॥ ९४ ॥ यन्त्रा
दिवचनिर्मुक्तःपतत्युत्तानशाय्यऽधः। जातःसवायुनास्पृष्टोनस्मरतिशुभाऽशुभम् ॥ ९५ ॥ वाक्यसं०। तदेवंगर्भदुःखानितस्यदो
षाश्चदर्शिताः। देहाद्वैराग्यसंसिद्धैतद्बीभत्साप्यथोच्यते ॥ ९६ ॥ भोगानामाश्रयोदेहःसचदोषगणाऽन्वितः। विण्मूत्रास्थ्या
दयोदोषायतःसंतिशरीरगाः ॥ ९७ ॥ तस्मिन्विष्टादिसंघातेभोक्तुंनेच्छतिबुद्धिमान्। गर्त्तेविण्मतिभुंक्तेकःस्थित्वाभ्रष्टादीन्वि

मु० सा० नापुमान् ॥ ९८ ॥ मूढस्तु तच्च भुंक्ते हि प्रत्युत विषयान्मुदा । संमूढोऽतिशिशुर्यद्वद्भुंक्ते स्वीयं मलादिकम् ॥ ९९ ॥ अस्यैवार्थस्य
१६ दार्ढ्याय श्रीरामवचनान्यहं । तथा व्यासशुकादीनां संगृह्णामि समासतः ॥ १०० ॥ वासिष्ठे श्रीरामवा० । मांसस्नाय्वऽस्थिव
लिते शरीरपटहेऽदृढे । मार्जारवदहं तात तिष्ठाम्यन्त्रगतध्वनौ ॥ १ ॥ कलेवरमहंकारगृहस्थस्य महागृहं । लुठत्वप्येतु वा स्थै
र्यं किमनेन मुने मम ॥ २ ॥ पंक्तिवद्धेन्द्रियपशुं चलत्तृष्णगृहागनम् । रागरञ्जितसर्वांगं नेष्टं देहगृहं मम ॥ ३ ॥ चित्तभृत्यकृ
तानंतचेष्टाऽवष्टब्धसंस्थितिम् । मिथ्यामोहमहास्थूणं ने० ॥ ४ ॥ दुःखार्भककृताक्रंदं सुखशय्यामनोरमं दुरीहादग्धदासीकं ने०
॥ ५ ॥ जिह्वामर्कटिकाऽऽक्रांतवदनद्वारभीषणम् । दृष्टदन्तास्थिशकलं नेष्टं देहगृहं मम ॥ ६ ॥ मानाऽवमानबहुलावहुला
भमनोरमाः । शरीरमात्रबद्धास्थं घ्नंति दोषदृशो नरम् ॥ ७ ॥ कायोयमचिराऽपायो बुद्बुदोंबुनिधाविव । व्यर्थं कार्यपरावर्त्तेप
रिस्फुरति निष्फलः ॥ ८ ॥ वद्धाऽऽस्थायेशरीरेषु वद्धास्थायेजगत्स्थितौ । तान्मोहमदिरोन्मत्तान्धिगस्तु पुनःपुनः ॥ ९ ॥ व्या
सवा० । सर्वाऽशुचिनिधानस्य कृतघ्नस्य विनाशिनः । शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥ १० ॥ यदि नामास्य कायस्य यदन्त

रात् ॥ ६१ ॥ अस्थिपंजरतोऽनित्यादसृग्विण्मूत्रभाजनात् । संगृह्णामीहतान्मंत्रान्याठक्रमानुसारतः ॥ ६२ ॥ गर्भोपनिषन्मं
त्राः । आहाराविविधाभुक्ताःपीतानानाविधाःस्तनाः । जातश्चाहंमृतश्चैवंजन्मजन्मपुनःपुनः ॥ ६३ ॥ मृतश्चाहंपुनर्जातोजातश्चा
हंपुनर्मृतः । नानायोनिसहस्राणिमयोषितानियानिवै ॥ ६४ ॥ मातरोविविधादृष्टाःपितरःसुहृदस्तथा । अर्वाङ्मुखपीडितो
हंजंतुभिश्चसमन्वितः ॥ ६५ ॥ यन्मयापरिजनस्यार्थेकृतंकर्मशुभाऽशुभं । एकाकीतेनदह्येहंगतास्तेफलभोगिनः ॥ ६६ ॥ यदि
योन्याःप्रमुच्येहंतत्प्रपद्येपरमेश्वरं । अशुभक्षयकारकंपरिमुक्तिप्रदायकम् ॥ ६७ ॥ यदियोन्याःप्रमुच्येहंतत्प्रपद्येनारायणं । अशु
भक्ष० ॥ ६८ ॥ यदियोन्याःप्रमुच्येहंतत्सांख्यंयोगमभ्यसेत् । अशुभक्ष० ॥ ६९ ॥ वाक्यसं० । गर्भोपनिषदोह्यर्थंरामायभगवां
च्छिवः । प्रोक्तवांच्छिवगीतासुतद्वचांस्यनुब्रुवे ॥ ७० ॥ शिवगी० । पञ्चभूतैःसमारभ्योदेहोयंपांचभौतिकः । तत्रप्रधानंपृथिवी
शेषाणांसहकारिता ॥ ७१ ॥ जरायुजोंडजश्चैवस्वेदजश्चोद्भिजस्तथा । एवंचतुर्विधःप्रोक्तोदेहोयंपांचभौतिकः ॥ ७२ ॥ मान
सोपिपरंप्रोक्तोदेवानामेवसस्मृतः । तत्रवक्ष्येप्रथमंतुप्रधानत्वाज्जरायुजं ॥ ७३ ॥ यास्त्रीचर्मावृतिःसूक्ष्माजरायुःसानिगद्यते ।

मु० सा० त्वंहिशास्त्रेषुदेहस्ययत्प्रकीर्त्तितम्। तद्भवान्तरणायैवनात्मत्वेनानुपेक्षया॥ २२॥ आत्मत्वेनचतंमत्वायोभोगार्थंसमीहते।
१७ देहस्यैवेहपुष्ट्यर्थंपशुतुल्यस्सनरःस्मृतः॥२३॥ यदुक्तंविषयाश्चापिनोपेक्ष्याइतितन्मृषा। यतस्तदनुपेक्षायांहेतुर्नैवोपलभ्यते॥२४॥
ननुकैश्चिन्महाभाग्यैर्लभ्यन्तेविषयायतः। अतस्तदनुपेक्षायांस्याद्दौर्लभ्यस्यहेतुता॥ २५॥ मैवंश्वशूकरैश्चापिपापिष्ठैःसुरतादि
काः। लभ्यन्तेविषयायस्मादतस्तेनैवदुर्लभाः॥ २६॥ नृदेहंदुर्लभंलब्ध्वाभोगायतंयुनक्तियः। आप्तैःप्रत्युतनुस्तस्यदर्शितामन्दभा
ग्यता॥ २७॥ आप्तवा०। स्थाल्यांवैदूर्य्यमय्यांपचतितिलखलश्चांदनैरिन्धनौघैः। सौवर्णैर्लांगलाग्रैर्विलिखतिवसुधामर्कमूल
स्यहेतोःछित्वाकर्पूरखंडान्वृतिमिहकुरुतेकोद्रवाणांसमंतात्। प्राप्येमांकर्मभूमिंविचलतिमनुजः कस्ततोमन्दभाग्यः॥ २८॥
वाक्यसं०। एवंसिद्धंह्युपेक्ष्यत्वंविषयदेहयोर्ध्रुवम्। मुमुक्षुस्तचरागस्योच्छित्यैस्याद्दोषदृक्तदा॥ २९॥ बाल्याद्याश्रपिदेहस्याव
स्थायादुःखहेतवः। ताभ्यस्तथाविरक्तःस्यादिच्छेच्चेदात्मनोहितम्॥ ३०॥ ननुबाल्याभिधाऽवस्थासुखरूपाहिसंभवेत्। सर्वप्री
त्यास्पदत्वाद्वियथात्मासुखरूपकः॥ ३१॥ सयथेत्याद्ययाश्रुत्याबृहदारण्यसंस्थया। सुप्तौदृष्टान्तभावेनबाल्यस्यसुखतोदिता

॥ ३२॥ सर्वंप्रीत्यास्पदत्वाद्धिबाल्यस्यसुखतेतियत्। तन्नयस्मान्नसर्वंचभ्रान्तप्रेमसुखान्वितम्॥ ३३ ॥ वातादिदोषदुष्टानांस्व
देहमहंनादिकाम्प्रीतिर्यथातथाबाल्येनसासुखत्वसाधिका ॥ ३४ ॥ हेतुर्विशेषणाऽसिद्धोविवेकिनाञ्चसायतः। स्वात्मान्यदृश्य
मात्रेहिक्वापिप्रीतिर्नदृश्यते ॥ ३५ ॥ बाल्यस्यसुखरूपत्वेश्रुतिर्योदाहृतात्वया। नबाल्यस्यसुखात्मत्वंवक्तिसापिकथंचन ॥ ३६ ॥
विक्षेपाऽभावमात्रांशेबालोपमातयोदिता। वक्तुंयस्मात्प्रवृत्तासाजीवस्यब्रह्मरूपताम्॥ ३७ ॥ सास्वार्थंहिकथन्त्यक्त्वाबाल्यस्यसु
खतांवदेत्। उभयोर्बोधमेदोषोवाक्यभेदःसमापतेत्॥ ३८ ॥ विक्रियतेसदाबाल्यंविकारिणिचशंकुतः। तस्माद्वाल्यंहिदुःखा
यसुखायनकदाचन ॥ ३९ ॥ बाल्यदुःखानिदोषांश्चरामायप्राब्रवीच्छिवः। रामचन्द्रोपिवासिष्टेबाल्यदुःखानिचोक्तवान्॥४०॥
तद्वाक्यानिलिखामीहबाद्याशंकापनुत्तये। वाक्यमानविचारेणवैराग्यस्यचसिद्धये ॥ ४१ ॥ शिवगीतावा०। अकिंचिदज्ञस्तदाबा
लोमांसपेशीसमास्थितः। श्वमार्जारादिदंष्ट्रिभ्योरक्ष्यतेदंडपाणिभिः ॥ ४२ ॥ पितृवद्राक्षसंवेत्तिमातृवड्डाकिनीमपि। पूयंप
योवदश्नातिधिक्पापिष्ठंहिशैशवं ॥ ४३ ॥ श्लेष्मणापिहितानाडीसुषुम्नायावदेवतत्। व्यक्तवर्णंवचनंवैतावद्वक्तुंनशक्यते ॥ ४४ ॥

अतएवचगर्भेपिरोदितुंनैवशक्यते ॥ वाक्यसं ०॥ एवंवालोमहादुःखीतद्वक्तुमपिनक्षमः ॥ ४५ ॥ वासिष्ठ ०। नमृतौनजरा
रोगेनचापदिनयौवने। ताश्चिन्ताविनिकृंतंतिहृदयंशैशवेषुयाः ॥ ४६ ॥ सर्वाणिदुःखभूतानिसर्वेदोषादुराधयः। वालमेवोप
जीवन्तिश्रीमंतमिवमानवाः ॥४७॥ वाल्यंरम्यमितिव्यर्थवुद्धयःकल्पयन्तिये। तान्मूर्खपुरुषान्ब्रह्मन्धिगस्तुहतचेतसः ॥ ४८ ॥
शैशवेगुरुतोभीतिर्मातृतःपितृतस्तथा। जनतोज्येष्टवालाच्चशैशवंभयमंदिरम् ॥ ४९ ॥ वाक्यसं ०। एवंवहुविधंदुःखंवाल्येनुभू
यतेजनैः। तस्माद्वाल्याद्विरज्येतस्वश्रेयश्चेदिहेच्छति ॥ ५० ॥ वाल्यान्नाययौवनंयातिप्रायेणदोषसंयुतम्। यद्दोषैर्नरकंयातिरति
मचाप्यतस्त्यजेत् ॥५१॥ दुःखान्यप्यत्रलभ्यन्तेयेषांसंख्यानविद्यते। तस्मात्ततोविरज्येतश्रेयोर्थीनरकादिव ॥५२॥ यौवनस्यचये
दोषास्तस्यदुःखानियानिच। त्यागार्यशिवरामाभ्यांसंक्षेपात्तेपिदर्शिताः ॥ ५३ ॥ तद्वाक्यानिलिखामीहविरत्यैयौवनादपि।
सर्वतःसारसंचित्यैप्रयत्नोयंयतोमम ॥ ५४ ॥ शिवगीता ०। दृप्तोऽथयौवनंप्राप्यमन्मथज्वरविह्वलः। गायत्यऽकस्मादुच्चैस्तुत
थाऽकस्मात्तुवल्गति ॥ ५५ ॥ आरोहतितरून्वेगाच्छांतानुद्वेजयत्यपि। कामक्रोधमदांधःसन्नकिंचिदपिवीक्षते ॥५६॥ अस्थि

स्तद्वहिर्भवेत्। दण्डमादायलोकोयंशुनःकाकांश्चवारयेत्॥११॥ शुकदेववा०। अमेध्यपूर्णेक्रिमिराशिसंकुलेस्वभावदुर्गंधितमेऽलम
ध्रुवे। कलेवरेमूत्रपुरीषभाजनेरमंतिमूढाविरमंतिपण्डिताः॥१२॥ वृहद्विष्णुपु०। मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ।
देहेचेत्प्रीतिमान्मूढोभवितानरकेपिसः॥१३॥ स्वदेहाऽशुचिगन्धेननविरज्येतयःपुमान्। वैराग्यकारणंतस्यकिमन्यदुपदिश्यते
॥१४॥ व्यासवा०। स्थानाद्बीजादुपष्टंभान्निष्यन्दान्निधनादपि। कायमाधेयशौचत्वात्पण्डिताःह्यशुचिंविदुः॥१५॥ वाक्य
सं०॥ मैत्रायणीयशाखायामपिदोषाःप्रदर्शिताः। भगवन्नस्थिचर्मस्नायुमज्जेत्यादिवाक्यतः॥१६॥ एवंभोगाश्रयाङ्गस्यगर्भेज
नौतथास्थितौ। दोषादुःखानिवेदादिप्रमाणेनेहदर्शिताः॥१७॥ तस्मात्सर्वैरुपेक्ष्योयंदेहःस्वाख्यादिपञ्जरः। तत्पुष्टिहेतुभो
ग्येषुत्याज्याचेछामुमुक्षुभिः॥१८॥ नन्वात्मत्वेनसर्वेषांप्रसिद्धोदेहकोयतः। दुर्लभश्चोदितस्तस्मान्नोपेक्ष्योविषयास्तथा॥१९॥
भागवते०। नृदेहमाद्यंसुलभंसुदुर्लभम् प्लवंसुकल्पंगुरुकर्णधारम्। मयानुकूलेननभस्वतेरितं पुमान्भवाब्धिंनतरेत्सआत्महा
॥२०॥ वाक्यसं०। सत्यंहिदुर्लभःसोस्तूपेक्ष्यस्तथापिसंभवेत्। अनात्मत्वाद्यथानौकानौनिमेस्यात्स्वधीःकथम्॥२१॥ दुर्लभ

म:सपुत्राद्यैर्दु:खीस्यान्नकथंचन। वार्द्धिक्यान्नुरतोनैवविराग:स्यात्तुधीमत: ॥ ६९ ॥ मैवंयतोह्विवृद्धानामपिदोषास्तुचित्तगा:।
कामाद्यानैवनश्यन्त्यऽर्थविचारादिभिर्विना ॥ ७० ॥ विनावस्तुविचारेणवार्द्धिक्यमागतोयदि। नश्येयुस्तेतदावृद्धानवांछेयूरसा
दिकान् ॥ ७१ ॥ वृद्धानांप्रत्युतवांछाद्दृश्यतेह्विविशेषत:। भोगै:शाम्यतिसानैवेतिभारतेसमीरितम् ॥ ७२ ॥ भारतवा०।
नजातुकाम:कामानामुपभोगेनशाम्यति। हविषाकृष्णवर्त्तमेवभूयएवाभिवर्द्धते॥ ७३ ॥ पूर्णंवर्षसहस्त्रंमेविषयासक्तचेतस:। तथा
प्यऽनुदिनंतृष्णाममैतेष्वभिजायते ॥ ७४ ॥ जीर्यंतिजीर्यत:केशादंताजीर्यंतिजीर्यत:। गात्राणिशिथिलायंतेतृष्णैकातरुणायते
॥ ७५ ॥ वाक्यसं०। जरायांवह्वबोदोषा:शिवादिभिरपीरिता:। श्लोकांस्तन्निर्मितानद्यविरत्यैसंलिखाम्यहम् ॥ ७६ ॥ शिव
गीतावा०। महापरिभवस्थानंजरांप्राप्यातिदु:खित:। श्लेष्मणापिहितोरस्कोजग्धमन्नंनजीर्यति ॥ ७७ ॥ भग्नदंतोमंददृष्टि:
कटुतिक्तकषायभुक्। वातभग्नकटिग्रीवाकरोरुचरणोऽवल: ॥ ७८ ॥ गदायुतसमाविष्ट:परिभूत:स्ववंधुभि:। वाक्यसं०।
इतिशिवेनसंप्रोक्तापुत्राद्यैर्वृद्धतिरस्कृति: ॥ ७९ ॥ वृद्धस्यपुत्रपौत्राद्यै:स्यात्सुखमितियद्वच:। तन्मृषेतिशिवोक्त्याहिज्ञायतेपूवप

स्त्रिया: ८० दृश्यतेचाद्यलोकेपिप्रायेणापितरौसुता:। वृद्धौह्यशक्तिकौत्यक्त्वासेवंतेस्त्रीसुतादिकान् ८१ वृद्धंयथावलीवर्दंस्वदासं
चाऽप्यऽशक्तिकं। स्वामीत्यजतितद्वच्चवृद्धंदारसुतादिका: ८२ वृद्धंपितामहंदृष्ट्वापौत्राद्यावालका:खलु। प्रत्युतोपहसन्त्येनंसेव
न्तेप्रीततोनच ८३ आसवा०। अध:पश्यसिकिंवृद्धेकिन्तवपतितंभुवि। अरेमूढनजानासिगतंमेयौवनमौक्तिकम् ८४ वाक्यसं०।
इतिहासोपिवृद्धस्याऽऽर्तै:संप्रदर्शितस्तथा। जरायाश्चविरागायदोषारामेणदर्शिता: ८५ वाशिष्ठवा०। दु:प्रेक्ष्यंजठरंदीनंहीनं
गुणपराक्रमै:। गृध्रोवृक्षमिवाऽऽदीर्घगर्द्धोह्यभ्येतिवृद्धकम् ८६ दैन्यदोषमयीदीर्घाहृदिदाहप्रदायिनी। सर्वाऽऽपदामेकसखी
वार्द्धकेवर्द्धतेस्पृहा ८७ कथंकदामेकिमिवस्वादुस्याद्भोजनंजनान्। इत्यजस्रंजराचैषाचेतोदहतिवार्द्धके ८८ काचिदस्तिज
गत्यस्मिन्नामंगलकरीतथा। यथाजराऽऽक्रोशकरीदेहजंगलजंबुकी ८९ वाक्यसं०। एवंदृष्ट्वाजरादोषान्विरज्यैवतत:सुधी:।
स्वदेहाद्धिविरागायमृत्युदु:खंतथास्मरेत् ९० मृत्युदु:खानिचोक्तानिरामायश्रीशिवेनवै। तथैवात्मपुराणेपिमृत्युदु:खंप्रदर्शितम्
९१ संगृह्णामितयोश्चात्रश्लोकानप्यत्रकांश्चन। मृत्युदु:खान्यपिश्रुत्वाविराग:स्याद्यथैवनु: ९२ जरथाकार्श्यमापन्नोमृत्यौसंनिहि

मु० सा० तेसति। इमंदेहंपरित्यज्याऽन्यंदेहंगंतुमीप्सति ९३ यथैवशकटःसूर्पपिठरोलूखलादिभिः। संभृतोह्येतिमुंचन्वैवहूंच्छब्दांस्तथा
२० नरः ९४ वासनाभारसंपूर्णःऊर्द्धोच्छ्वासीभवेद्यदा। तदाकुर्वन्वहूंच्छब्दान्यातिदेहादितःपरम् ९५ शिवगीता०। दृष्टावाचीय
माणायांसंज्ञयाह्रियमाणया। मृत्युपाशेनबद्धस्यत्रातानैवोपलभ्यते ९६ संरुध्यमानस्तमसामहच्छ्वभ्रमिवाविशत्। अरोदन्तौदात्ता स्त
तीनीक्षतेदीनचक्षुषा ९७ हाकांतेहाधनंपुत्राःक्रंदमानःसुदारुणम्। मंडूकइवसर्पेणमृत्युनागीर्यतेनरः ९८ अयःपाशेनकालेनस्ने
हपाशेनबंधुभिः। आत्मानंकृष्यमाणंतमीक्षतेपरितस्तथा ९९ हिक्कयाबाध्यमानस्यश्वासेनपरिशुष्यतः। मृत्युनाऽऽकृष्यमाणस्यनख
ल्वस्तिपरायणम् १०० मातापितागुरुःसुतःस्वजनोममेति मायोपमेजगतिकस्यभवेत्प्रतिज्ञा। एकोपदाव्रजतिकर्मपुरःसरोयं वि
श्रामवृक्षसदृशःखलुजीवलोकः १ सायंसायंवासवृक्षंसमेताःप्रातःप्रातस्तेनतेनप्रयांति। त्यक्त्वाऽन्योऽन्यंतंचवृक्षंविहंगाःयद्वत्तद्वज्ज्ञा
तयोऽज्ञातयश्च २ मर्मसूत्कृत्यमानेषुमुच्यमानेषुसंधिषु। यद्दुःखंम्रियमाणस्यस्मर्यतांतन्मुमुक्षुभिः ३ आत्मपुराणवा०। द्वासप्ततिसह
स्राणिवृश्चिकाएकहेलया। यथादशंतिगात्रेषुपुच्छैःसूच्यग्रसंनिभैः। तथातज्जायतेदुःखंमुमूर्षोर्देहमोचने ४ कोट्यर्द्धसहितास्तिस्रः २०

मांसशिरास्नायुवामानांमन्मथालये। उत्तानपूतिमंडूकपाटितोदरसंनिभे आसक्तःस्मरबाणाऽऽर्त्तःआत्मनादह्यतेभृशम् ॥५७॥
वासिष्टवा०। असत्यंसत्यसंकाशमचिराद्विप्रलंभदम्। स्वप्नांगनासंगसमंयौवनंमेनरोचते ॥ ५८ ॥ आपातमात्ररमणंसद्भाव
रहितांतरम्। वेश्यास्त्रीसंगमप्रख्यंयौ०॥५९॥ संनिर्मलापिविस्तीर्णापावन्यपिचयौवने। मतिःकलुषतामेतिप्रवृषीवतरंगिणी
॥ ६० ॥ तावदेवविवल्गन्तिरागद्वेषपिशाचकाः। नास्तमेतिसमस्तैषायावद्यौवनयामिनी ॥ ६१ ॥ हार्दान्धकारधारिण्याभैर
वाऽकारवानपि। यौवनाऽज्ञानयामिन्याविभेतिभगवानपि ॥ ६२ ॥ हर्षमायातियोमोहात्पुरुषःक्षणभंगिना। यौवनेनमहामु
ग्धःसवैनरमृगःस्मृतः ॥ ६३ ॥ तेपूज्यास्तेमहात्मानस्तएवपुरुषाभुवि। येसुखेनसमुत्तीर्णासाधोयौवनसंकटात् ॥६४॥ वाक्यसं०।
यौवनंभोक्तुमभ्येतिजरानुःशक्तिनाशिका। सपःसर्पांतरंयद्वद्भोक्तुमभ्येतिवैरतः ॥ ६५ ॥ यौवनेऽस्तियथादुःखन्दोषाश्चसंतिभू
रिशः। जरायांतेतथासंत्यऽतस्तचापिरतिंन्त्यजेत् ॥६६ ॥ ननुकामादिर्भिर्दोषैर्नु मास्तुयौवनेसुखम्। वार्द्धिक्येतदभावाद्वैनतद्दुः
खस्यसंभवः ॥ ६७ ॥ कार्याशक्त्याभवेद्दुःखमितिचेन्नयतःसुताः। पौत्राद्याश्चापिवृद्धस्यसन्तिकार्यकराःप्रियाः ॥ ६८ ॥ सेव्यमा

इत्यादिवचनान्युक्तावध्वापाशैःसुदारुणैः। कशादिभिश्चसंताड्यनयन्तियमसादनम्॥ १७॥ वाक्यसं०। एवंमृत्योर्हिदुःखानि
यैर्वाक्यैर्दर्शितानिवै। संक्षेपात्सङ्गृहीतानिविरत्यैतानिदेहतः॥ १८॥ पापिनोंऽगाद्विरागायदुःखानिनरकस्यच। उक्तान्यात्म
पुराणेयैःश्लोकैस्तानप्यऽनुब्रुवे॥ १९॥ आत्मपुराण०। अनेकशतकोटीनांयोजनानियमालयम्। स्वल्पेनैवसकालेननीयतेयम
किंकरैः॥ २०॥ अन्नदुःखान्यनेकानिमृतानांयमशासनात्। भवन्तितानिकोनामवक्तुंश्रोतुञ्चवाक्षमः॥ २१॥ दंष्ट्रिणांशूकरादी
नांकाकगृध्रादिपक्षिणाम्। उपद्रवोमहान्मार्गेयमराजपुरस्यहि॥ २२॥ पूयविष्ठादिपूर्णानांनदीनामपिलंघनम्। निमज्जनञ्च
तत्रैवक्वचिन्नक्रादितोभयम्॥ २३॥ वह्निशस्त्रजलेलानांवायोश्चापिविकारतः। यमालयेहिनरकादुःखदाःपापकारिणाम्
॥२४॥ अनेककल्पपर्यन्तमसिपत्रवनादिषु। क्रूरेषुनरकेष्वेवंदुःखान्याप्नोतिदुष्कृती॥ २५॥ एवंसनारकंदुःखमनुभूयाथकाल
तः। दुष्कृतीबीजतांप्राप्यलोकमेतंपुनर्व्रजेत्॥ २६॥ सुकृतीचतथास्वर्गेह्यनुभूयसुखंमहत्। सुकृतान्तेपतत्यस्मिल्लोकेपर्जन्य
धारया॥ २७॥ वाक्यसं०। फलञ्चैवंप्रसंगेनपुण्यस्यापीहदर्शितम्। विरत्यैभवचक्रस्यरूपञ्चाप्यत्रदर्श्यते॥ २८॥ योगत

स्त्वोपनिषन्मंत्रा: । य:स्तन्यंपूर्वंपीत्वापिनिष्पीड्यचपयोधरान्। यस्मिन्जातोभगेपूर्वंतस्मिन्नेवभगेरमेत्॥ २९ ॥ यामातासापुन
र्भार्यायाभार्याजननीहिसा । य:पितासपुन:पुत्रोय:पुत्र:सपुन:पिता ॥ ३० ॥ एवंसंसारचक्रेणकूपचक्रघटाइव । वाक्यसं ० । भ्रमं
तोयान्तिजन्मानीतिश्रुतयोपिसंजगु:॥३१॥ एवंदेहादिरागेणजगच्चक्रस्यशान्तये। गर्भादिनिरयान्तेषुभवेद्दोषादिदृक्सुधी: ॥३२॥
तथामृत्योश्चचिह्नानितस्याऽऽगमनत:पुरा । ज्ञात्वायतेतमोक्षार्थंसुधी:शास्त्रप्रमाणत: ॥ ३३ ॥ स्कन्दपुराण ० । सूतउ ० । अथा
त:संप्रवक्ष्यामिसमासेननविस्तरात्। येनज्ञानविशेषेणमृत्युंपश्यन्तिदेहिन: ॥ ३४ ॥ सोमच्छायांध्रुवञ्चैवमहापथमरुंधतीम्।
अपश्यन्वत्सरादूर्द्ध्वंनजीवतिनसंशय: ॥ ३५ ॥ कपोतोवाथगृध्रोवाकाकोवाथदिमूर्द्धनि। स्थित:क्रव्यादसंज्ञोवाषण्मासेनविन
श्यति ॥ ३६ ॥ दर्पणेवाजलेवाऽपिपरेषांवाऽथचक्षुषि। अशिरस्कंतथात्मानंपश्यन्मासंनजीवति ॥ ३७ ॥ कृष्णा:कृष्णांबरा:स्वप्ने
श्यामवस्त्रधरा:स्त्रिय: । येनैवसहगच्छंतिदक्षिणांसनजीवति ॥३८॥ कृष्णैर्विकेशै:पुरुषै:स्वप्नेय:पीडित:पुमान्। पाषाणैस्ताड्यते
यस्तुमृत्युस्तस्यगृहंगत: ॥ ३९ ॥ घोषंनशृणुयात्कर्णेज्योतिर्नेत्रेनपश्यति। श्वभ्रेयोनिपतेत्स्वप्नेतस्यमृत्युर्गृहंगत: ॥ ४० ॥ यस्यवै

भुक्तमात्रस्यहृदयंपीडतेक्षुधा। जायतेदन्तघर्षश्चगतायुरन्ननसंशयः ॥ ४१ ॥ वाक्यसं०। इत्यादिस्कान्दगैःश्लोकैर्मृत्युश्चाऽऽगमनवो
धकैः। मृत्युकालाऽपरिज्ञानाच्चिरजीवितवांछया ॥ ४२ ॥ विरागःस्यात्कथंपुंसइतिशंकानिराकृता। तस्माद्देहादितःशीघ्रंविर
जेदिहबुद्धिमान् ॥ ४३ ॥ विनैवारिष्टबोधंयःप्राग्जन्माऽभ्यासतोनरः। मोक्षायभुक्तदेवादिवद्यतेतोत्तमःसवै ॥ ४४ ॥ विवि
धारिष्टबोधाद्यःपरीक्षितादिवत्पुमान्। यततेदुःखनाशायविज्ञेयःसतुमध्यमः ॥ ४५ ॥ ज्ञात्वापिमृत्युचिह्नानिभोग्यान्योनजिहा
सति। सचाऽधमोनरोज्ञेयःपितृविट्क्रिमिसंनिभः ॥ ४६ ॥ यानिदुःखानिजीवस्यप्रागिहदर्शितानितु। तानिदेहाभिमानेन
तस्मिन्नेवातिरागिणः ॥४७॥ भवन्तिदेहिनोयस्मात्तस्माद्देहेरतिंत्यजेत्। भोगाश्रयेरतिंत्यक्त्वाभोग्येष्वपिचतांत्यजेत् ॥४८॥ सोऽ
कामयतजीवात्माजायामेस्यादथांगजः। मेस्याद्वित्तमितिश्रुत्याभोग्येषूक्तोरतेःक्रमः ॥ ४९ ॥ एवंविविधभोग्येषुप्राथम्यंयोषितां
श्रुतं। तस्मात्ताभ्योविरागार्थंस्त्रीनिन्दातावदुच्यते ॥ ५० ॥ योषितोरूपवत्यानुर्डाकिनीभ्योऽधिकंभयम्। डाकिन्योघ्नन्तिवैबा
लान्सातुहन्त्याऽऽत्तयौवनान् ॥ ५१ ॥ स्त्रीसंगादुद्विजेद्व्याघ्रीसंगादप्यऽधिकंबुधः। व्याघ्रीहन्त्येकवारंस्त्रियोषिद्धंतिनरंमुहुः ॥५२

कोष्ठ्यःसूच्यःसुतीक्ष्णकाः। यादृक्शरीरिणःकुर्युस्तादृग्दुःखंमृतौनृणां ॥ ५ ॥ हस्तौपादौक्षिपंतश्चभूमिष्ठङ्गतचेतनं। स्वज
नास्तंतुशोचंतिकाकंकाकायथातुरम् ॥ ६ ॥ बांधवेषुभृशंशब्दान्मुंचत्सुयमकिंकराः। नयंत्येनंयथाराजभृत्याजातापराधकम्
॥ ७ ॥ एवमेतदनौपम्यंदुःखंदुर्मार्गवर्त्तिनाम्। यथानरकजंदुःखंतादृग्वापिततोधिकम् ॥ ८ ॥ मुमूर्षुर्मूर्च्छामभ्येतिक्वचित्क्वा
पिप्रबुध्यते। बिभेतिचभृशंदृष्ट्वादारुणान्यमकिंकरान् ॥ ९ ॥ तएनंभर्त्सयन्त्यादावागत्यपुरतोभटाः। धिक्त्वांमनुष्यदेहस्थंपापिनं
स्वात्मघातकं। येनत्वयाशरीरेणनकृतंस्वहितंक्वचित् ॥ १० ॥ परदोषास्त्वयायत्नात्सावधानेननिश्चिताः। सर्वदैवतथात्माकिंच
णामाचंननिश्चितः ॥ ११ ॥ अपिचेन्निर्गुणंब्रह्मज्ञातुंनैवभवान्क्षमः। कस्मादुपासनंतस्यनकृतंसुखदंत्वया ॥ १२ ॥ त्वत्कृतंसकलं
विश्नोदुष्कृतंयमकिंकराः। वासरादिभिरत्यर्थंश्रावितंयमसंसदि ॥ १३ ॥ वासरेणससूर्येणकथितंदिवसाकृतं। चंद्रादिनात
थाराज्याकथितंनिश्यऽनुष्ठितं। संध्ययोरपिसंध्याभ्यांसर्वदाभूतपंचकैः ॥ १४ ॥ इदंत्वयाकृतंपापमेकांतेचलतात्विदं। इतिते
मर्मसदृशंपापंसर्वेवदंतिहि ॥ १५ ॥ वासराद्यायमचराःसर्वैःसहचराःसदा। त्वादृशायान्नजानन्तिमोहितादेवमायया ॥ १६ ॥

सन्धावन्कामार्त्तःशुक्रमत्यजत् ॥ ६४ ॥ एवञ्चेष्टायदाजातातत:क्लेशोऽधिकोऽस्यकः । इतिस्त्रीभ्योविरत्यर्थंभागवतेसमीरि
तम् ॥ ६५ ॥ ब्रह्माचस्वसुतांदृष्ट्वाकामाद्व्याकुलतांगतः । मृगरूपेणतान्धावन्सशिवेननिवारितः । इतीशमहिमस्तोत्रेगंधर्वनि
र्मितेश्रुतम् ॥ ६६ ॥ अहल्यागमनादिंद्रःसहस्रभगवानऽभूत् । इत्यप्युक्तंपुराणेश्रीभागवतेशुकेनवै ॥ ६७ ॥ चंद्रश्चेन्द्रगुरोःपत्नीं
मातृसमांसमागमत् । तन्निमित्तंमहायुद्धमिंद्रादीनांसहासुरैः ॥ ६८ ॥ चन्द्रपक्षाश्रितैःक्रूरैश्चन्द्रेणापितथाश्रुतम् । भारतेऽ
तोमनुष्याणांस्त्रीसंगिनान्तुकाकथा ॥ ६९ ॥ ऋष्यशृङ्गस्तथावाल्याद्ब्रह्मचारीवनेवसन् । भ्रंशितोब्रह्मचर्यात्सनारीभिरित्यपिश्रु
तम् ॥ ७० ॥ नारदोब्रह्मचारीसन्सृञ्जयाऽपत्यरागतः । शापितःपर्वतेनासौवानरमुखतांगतः ॥ ७१ ॥ भृगुपुत्रस्तथाशुक्रोमह
तितपसिस्थितः । स्वर्गस्त्रीदर्शनादेवसभ्रष्टोब्रह्मचर्य्यतः ॥७२ ॥ ब्रह्मचर्यात्परिभ्रष्टःभुक्त्वास्वर्गस्त्रियन्ततः । लब्धवान्बहुजन्मा
नीतिवासिष्ठेसमीरितम् ॥ ७३ ॥ विश्वामित्रस्तपोनिष्ठोनुभूतस्त्रीसुखोपिसन् । स्त्रीसङ्गात्तपसोभ्रष्टःसोऽजीजनच्छकुन्त
लाम् ॥ ७४ ॥ शतभिषाभिधोराजारागाद्गंगांगदर्शनात् । ब्रह्मणाशापितस्तस्यलोकाद्भ्रष्टोभुवंगत ॥ ७५ ॥ भुवंप्राप्यससञ्जातः

शंतनुनामकोनृपः। इतिगाथाद्वयञ्चोक्तंभारतेह्यादिपर्वणि ॥ ७६ ॥ षष्टिसहस्रसंख्याकाऋषयश्चतपोधनाः। स्वर्गस्त्रीदर्शनादे
वमुष्टिभिर्मरणंगताः ॥ ७७ ॥ मदीयेयंमदीयेयमितिवादात्परस्परम्। गीतायादशमाध्यायमहात्म्यइतिकीर्त्तितम् ॥ ७८ ॥
वृन्दायाःसङ्गतोविष्णुःसाक्षादपीश्वरःस्वयम्। पाषाणत्वंगतोहीतिश्रुतंपद्मपुराणके ॥ ७९ ॥ रामावतारमापन्नोविष्णुःस्त्रीसं
गिनास्वयम्। संदर्शयन्महाक्लेशंहासीतइतिचाब्रवीत् ॥ ८० ॥ श्रीकृष्णोपिस्वयंविष्णुर्गोपीं स्कन्धेनसंवहन्। स्त्रीसंगिनांमहा
दुःखन्दर्शयामासलीलया ॥ ८१ ॥ इत्येवमादिकागाथावह्व्यःशास्त्रेषुसंश्रुताः। तासामिदंहितात्पर्य्यंस्त्रीसंगंनात्यजेत्सुधीः ॥
८२ ॥ स्त्रीणान्दोषास्त्वनंतास्तान्वक्तुंशक्येतकःपुमान्। संक्षेपेणतथाप्यामैस्तेवैराग्यायदर्शिताः ॥ ८३ ॥ तद्वाक्यलेखनेना
चनारीदोषप्रदर्शनम्। क्रियतेहिस्वतोनाहन्तद्दोषगणनेपटुः ॥ ८४ ॥ आमवा०। अनृतंसाहसंमायामूर्खत्वमतिलोभता।
अशुचित्वंनिर्दयत्वंचस्त्रीणान्दोषाःस्वभावजाः ॥ ८५ ॥ दर्शनाद्धरतेचित्तंस्पर्शनाद्धरतेबलम्। मैथुनाद्धरतेवीर्यंनारीप्रत्यक्ष
राक्षसी ॥ ८६ ॥ भगेनचर्मखंडेनदुर्गंधेनव्रणेनवै। खंडितंहिजगत्सर्वंसदेवाऽसुरमानुषम् ॥ ८७ ॥ तन्मुग्धारमन्तेयेसदेवा

सुरमानवाः। तेयांतिनरकंघोरंसत्यमेवनसंशयः ॥ ८८ ॥ गौडीपैष्टीतथामाध्वीविज्ञेयात्रिविधासुरा। चतुर्थीस्त्रीसुराज्ञे
यायये दंमोहितंजगत् ॥ ८९ ॥ चर्मखंडंद्विधाछिन्नमपानोद्गारवासितम्। तत्रमूढारमन्तियेप्राणैरपिधनैरपि ९० ॥ स्त्रीणा
मवाच्यदेशस्यक्लिन्ननाडीव्रणस्यच। अभेदेपिमनोभेदाज्जनःप्रायेणवंच्यते ॥ ९१ ॥ वासिष्टवा०। सत्कारोच्छ्वासमात्रेणभुजं
गदलनोत्कया। कांतयोड्रियतेजंतुःकरभ्येवोरगोविलात् ॥ ९२ ॥ जन्मपल्वलमत्स्यानांचित्तकर्दमचारिणाम्। पुंसांदुर्वा
सनारज्जुर्नारीवडिशपिंडिका ॥ ९३ ॥ ज्वलतामतिदूरेपिसरसाअपिनीरसा। स्त्रियोनरकाऽग्नीनामिन्धनंचारुदारुणं ॥
९४ ॥ इतःकेशाइतोरक्तमितीयंप्रमदातनुः। किमेतयानिंदितयाकरोतिविपुलाशयः ॥ ९५ ॥ वासोविलेपनैर्यानिलालिता
निपुनःपुनः। तान्यंगान्यंगलुंठंतिक्रव्यदाःसर्वदेहिनाम् ॥ ९६ ॥ आपातरमणीयत्वंकेवलंकल्प्यतेस्त्रियः। ममतदपिनास्त्यत्र
मुनेमोहैककारणम् ॥ ९७ ॥ सर्वेषांदोषरत्नानांसुसमुद्गिकयानया। दुःखशृङ्खलयानित्यमलमस्तुममस्त्रिया ॥ ९८ ॥ यस्यस्त्री
तस्यभोगेच्छानिःस्त्रीकस्यक्वभोगभूः। स्त्रियंत्यक्त्वाजगत्यक्तंजगत्यक्त्वासुखीभवेत् ॥ ९९ ॥ वाक्यसंग्रहकृद्दा •। सर्वै रेवाप्तवाक्यैः

व्याघ्रऽस्तिहिनरन्दन्तैर्नार्य्योऽस्तितैर्विनापितम्। योनिरंध्रेणचाऽदन्तमदन्तमितिवैश्रुतेः॥ ५३॥ व्याघ्राहतोननायातिनरका
दीन्परस्त्रियः। संभोगाद्यातितान्कामीत्यादिकंभारतेस्मृतम्॥५४॥ भारत०। परदारानगंतव्याःसर्ववर्णेषुकर्हिचित्। नहीदृ
शमनायुष्यंलोकेकिंचनविद्यते॥५५॥ यादृशंपुरुषस्येहपरदारोपसेवनम्। यावन्तोरोमकूपाःस्युःस्त्रीणांगात्रेषुनिर्मिताः। तावद्वर्षस
हस्राणिनरकंपर्युपासते॥५६॥ परदाराऽभिमर्षंतुकृत्वाजायतेवैवृकः। श्वशृगालस्ततोगृध्रोव्यालःकंकोवकस्तथा॥५७॥ स्मर
णाज्जायतेकामोवधूनांधैर्यनाशनः। दर्शनाद्वचनात्स्पर्शात्तस्मादेषनसंभवेत्॥५८॥ कृत्याह्येताघोररूपामोहयन्त्यविचक्षणा
न्। रजोह्यन्तर्हितामूर्त्तिरिन्द्रियाणांसनातनी॥५९॥ अन्तकःपवनोमृत्युःपातालंवडवामुखम्। क्षुरधाराविषंसर्पोवह्निरि
त्येकतःस्त्रियः॥६०॥ नाग्निस्तृप्यतिकाष्ठानांनाऽपगानांमहोदधिः। नान्तकःसर्वभूतानांनपुंसांवामलोचना॥६१॥ वाक्य
सं०। वहुनाकिमिहोक्तेनस्त्रीसंगात्सर्वदेहिनाम्। प्रायेणजायतेदुःखंस्त्रीसंगंसन्त्यजेदतः॥६२॥ स्त्रीमूलाःपण्डितैःप्रोक्ताःक्ले
शाःप्रायेणदेहिनाम्। शंभुब्रह्मादिदेवानामन्येषांकाकथानृणाम्॥६३॥ सन्धृतमोहिनीवेशंविष्णुंदृष्ट्वैववशंकरः। मोहिनीमनु

शुपण्डितान्। ज्योतिःशास्त्रस्यसंवेत्तॄन्पृच्छत्ययंमुमुक्षुवत्॥ १२॥ येनोपायेनभोविप्राश्चिरायुर्मेसुतोभवेत्। तमुपायंवदध्वंमेज्यो
तिःशास्त्रानुसारतः॥ १३॥ चिरायुर्यत्प्रसादाद्वःसुतोमेसम्भविष्यति। तमहंपूजयिष्यामिधनवाक्कायमानसैः॥ १४॥ इत्यन्तद्व
चनंश्रुत्वाग्रहपूजांवदन्तिते। वहुधनादिभिःसाध्यांतदेत्थश्चिन्तयत्ययम्॥ १५॥ इमेतुलोभिनोविप्रामद्धनसंजिहीर्षवः। यतो
वहुधनैःसाध्यांपूजांवदन्तिमेछलात्॥ १६॥ इतिसंचिन्त्यतांस्त्यक्त्वाधनव्ययभयादयम्। सेवतेऽन्नादिदानेनभिक्षून्मुचाश्रयाऽनि
शम्॥ १७॥ तेभ्योऽपिनसुताऽऽप्तिश्चेत्परित्यक्त्वाथतानपि। कुरुतेचव्रतादीन्सपुत्राश्रयैवसंयुतः॥ १८॥ तैरपिनसुताप्तिश्चे
त्तदाक्षुद्रान्पिशाचकान्। वेदेश्रद्धांपरित्यज्यश्मशानेष्वपिसेवते॥ १९॥ स्वद्विजत्वंसविस्मृत्यसुतोत्पत्त्यऽभिलाषया। पिशा
चसेवकानीचायद्वदन्तिकरोतितत्॥ २०॥ मांसमद्यादिकन्तेभ्योददात्यऽयंयथेप्सितम्। तदाज्ञयापिशाचान्नंश्रद्धयास्वयमत्ति
च॥ २१॥ एवंवहुविधोपायैःकश्चिद्विलभतेसुतम्। कश्चिच्चनैवमभ्येतिहीत्थंचिंन्तासुतर्थिनाम्॥ २२॥ संजातेप्यंगजेतेषाञ्चि
न्ताप्रत्युतवर्द्धते। तज्जीवनायवह्निवत्पुचिणोदहतेतुसा॥ २३॥ भैरवशीतलादीन्स्तेभ्वादीन्स्तदाहनांस्तथा। अर्चन्त्यात्म

जरत्त्वार्थं द्विजाश्चापि परेशवत्॥ २४ ॥ ननु यौवनमापन्नाः पुत्राः स्युः सुखदायिनः । इति चेन्नियमो नायं व्यभिचारस्य दर्शनात्॥ २५ ॥
कंसो वद्ध्वा हि वृद्धं स्वपितरमुग्रसेनकम् । भूराज्यमकरोद्दुष्ट इति भागवते स्मृतम्॥ २६ ॥ दीर्घतमऋषेः पुत्रास्तं वद्ध्वा रज्जुभिर्दृढम्। नद्यां चिक्षिपुराक्रूराः स्वल्पापराधकारणात्॥ २७ ॥ इति च भारते प्रोक्तं मार्कण्डेयपुराणके। तथोक्तवान्स्ववृत्तान्तं समाधिनामको वणिक् ॥ २८ ॥ देवीमहात्म्ये। समाधिर्नाम वैश्योहमुत्पन्नो धनिनां कुले। पुत्रदारैर्निरस्तश्च धनलोभादसत्तमैः ॥ २९ ॥ विहीनः स्वजनैर्दारैः पुत्रैरादाय मे धनं। वनमभ्यागतो दुःखी निरस्तश्चाप्तवन्धुभिः ॥ ३० ॥ वाक्यसं०।
युवानः सूनवोप्येवं पित्रोः प्रायेण दुःखदाः । तथापि तेषु नो प्रीतिं त्यजन्ति रागिणो जनाः ॥ ३१ ॥ यथा पुत्रास्तथैवान्येवान्धवाश्च पिदुःखदाः । तस्मात्प्राज्ञ उपेक्ष्येत यूकादिवत्सुतादिकान् ॥ ३२ ॥ नन्वीशं तपसाऽऽराध्य व्यासः सुतमवाप्तवान्। सगरश्च तथा पुत्रान्सौमदत्तिश्च तत्पिता ॥ ३३ ॥ भगवांश्चाऽऽप्तवान्कृष्णस्तपसेशप्रसादतः । पुत्रौ प्रद्युम्नसांवाख्यावित्यादि भारते स्मृतम्॥ ३४ ॥ पुत्रस्य पितुरात्मत्वात्स उपेक्ष्यः कथं भवेत्। पित्रात्मा पुत्रनामेतीत्यैतरेयश्रुतिर्जगौ ॥ ३५ ॥ सोस्यात्माऽयं सुपु

यज्ञेभ्यः कर्मभ्यः प्रतिधीयते। अथास्येतर आत्माऽयंकृतकृत्योजहात्यऽसून्॥ ३६॥ श्रुतिश्चान्यातथैवास्तिस्मृतिश्चापियतोऽत्यतः।
कार्योधर्मःसुतोत्पत्त्यैनोपेक्ष्याऽस्यकदाचन॥ ३७॥ मंत्रः। पतिर्जायांप्रविशतिगर्भोभूत्वास्वमातरम्। तस्यांपुनर्नवोभूत्वादशमेमा
सिजायते॥ ३८॥ स्मृतिः। अपुत्रस्यगतिर्नास्तिस्वर्गेनैवचनेहच। येनकेनाप्युपायेनकार्यंजन्मसुतस्यवै॥ ३९॥ वाक्यसं०।
मैवंत्वदुक्तगाथानांश्रुतिस्मृत्योस्तथापुनः। पुत्रेष्टेरऽर्थवादत्वात्स्वार्थेतात्पर्यतानहि॥ ४०॥ पितुरात्मैवपुत्रश्चेत्तदाकंसादिभिः
कथम्। स्वदुःखायोग्रसेनाद्यावद्धादृतित्वमीरय॥ ४१॥ गतिशब्देनमोक्षोवालोकद्वयसुखंहिवा। नाद्यःपुत्रवतांमुक्तौमुक्ताःस्युः
श्वादयोखिलाः॥ ४२॥ शुकदेवगुहादीनांबंधश्चत्वन्मतेभवेत्। पुत्राभावाच्छुकादीनांश्वादीनांपुत्रसत्त्वतः॥ ४३॥ नद्वितीयः
कुपुत्रेषुव्यभिचारस्यदर्शनात्। धर्मेणपुत्रलाभःस्यादित्यपिनियमोनहि॥ ४४॥ श्वादीनामपिदृश्यंतेसूनवोबहवोयतः। तैस्ते
भ्यःकःकृतोधर्मइतिनिर्णयतोवद॥ ४५॥ धर्मात्सत्पुत्रलाभःस्यादितिचेन्नयतःकिल। व्यभिचारस्त्वदुक्तेस्तुभारतेस्फुटमीरितः॥
४६॥ भारतवा०। देवानिष्ट्वातपस्तप्त्वाकृपणैःपुत्रगृद्धिभिः। दशमासान्परिधृताजायन्तेकुलपांसनाः॥ ४७॥ प्रसक्तःपुत्रपशुषु

प्रागेवमेवाचनिश्चितं। प्रायेणदेवमुख्यानांभवार्णवनिमज्जने॥ ३०० ॥ नार्योऽत्युदकचक्राणिह्यतोविवेकदारुजम्। भवाब्धेः
संतितीर्षुर्नास्त्रीत्यागप्लवमाश्रयेत्॥ ३०१ ॥ प्रायस्त्रीसङ्गिनान्दुःखंनैवतत्त्यागिनान्तुतत्। क्वचिच्छ्रुतंगुहादीनामावाल्या
द्ब्रह्मचारिणाम्॥ २ ॥ अन्वयव्यतिरेकाभ्यामेवंप्रायेणयोषिताम्। सङ्गाद्भवन्तिसंक्लेशाःपुंसांविकृतचेतसाम्॥ ३ ॥ तत्सान्निध्यं
ततस्त्यक्त्वाश्रेयोर्थीदूरतोवसेत्। नारीतत्संगिसङ्गेनचित्तंविक्रियतेयतः॥ ४ ॥ स्त्रीनिन्दादर्शिताह्येवंपुत्रनिन्दाथकथ्यते।
चितातोऽधिकचिन्तायाहेतुःपुत्रैषणायतः॥ ५ ॥ यावद्यस्यनजायेतसुतस्तावदहत्यमुम्। जन्मोत्तरंतथाताताताबरत्वार्थोहिचि
न्तया॥ ६ ॥ अपुत्रःपुत्रिणोदृष्ट्वाचेत्थन्दन्दह्यतेऽनिशम्। कृतपुण्याइमेधन्याःपाप्यऽस्म्यहमऽपुत्रकः॥ ७ ॥ स्यादुपायेनयेनैवसुतो
ममापितंत्वहम्। करिष्याम्यद्ययत्नेनैवंचिन्तयतिनित्यशः॥ ८ ॥ सुतेच्छयासदास्तौतिविष्ण्वादीन्मोचदानपि। याचतेचसुतन्ते
भ्योमूर्खस्तक्रंनृपाद्यथा॥ ९ ॥ तत्प्रसादात्सुतोजातोयदिस्वारब्धसंचयात्। नष्टोवालस्तदामोहात्तेषुश्रद्धांत्यजत्ययम्॥ १० ॥
सात्विकेषुसदेवेषुश्रद्धान्तत्वाथराजसान्। यक्षादींस्सेवतेमूढःसुतेच्छयात्वहर्निशम्॥ ११ ॥ तेभ्योपिनसुताऽऽप्तिश्चेत्तत्रक्वाताना

मु० सा० पिसुतादीनियतोधनेननैतिना ॥ ६० ॥ सृंजयश्चित्रकेतुश्चराजानौचक्रवर्त्तिनौ । पुत्रंधनेननाऽऽप्तौतंप्राप्तौनारदवाक्यतः ॥ ६१ ॥
२७ धनेनगाधिपुत्रश्चब्राह्मण्यंनैवलब्धवान् । महतातपसातेनतत्त्वाऽवाप्तमितिश्रुतम् ॥ ६२ ॥ परीक्षितस्तथाराजानष्टायुर्ऋषिशाप
तः । धनेनलब्धवान्नायुरित्येवंभारतेश्रुतम् ॥ ६३ ॥ आरोग्यंचापिकश्चिन्नानप्राप्नोतिधनेनवै । विचित्रवीर्यआसीद्धिरोगार्त्तः
शन्तनोःसुतः ॥ ६४ ॥ नाप्नोतिकाञ्चिकांयेनतेनामृतंलभेत्कथम् । प्रयत्नेनेतिदृष्टांतोप्यत्रबोध्यःकुवादिभिः ॥ ६५ ॥ दृश्यन्तेधनि
नोलोकेपुत्राभावादिपीडिताः । दोषाश्चधनतद्वतांभारतादिषुहीरिताः ॥ ६६ ॥ भारतवा० । ईहाधनस्यनसुखालब्धाचिन्ता
चभूयशी । लब्धनाशोयथामृत्युर्लब्धंभवतिवानवा ॥ ६७ ॥ धननाशेमहद्दुःखंमन्येसर्वमहत्तरम् । ज्ञातयोह्यवमन्यन्तेमित्राणिच
धनाच्च्युतम् । धनेसुखकलायातुसापिदुःखायकेवलम् ॥ ६८ ॥ धनवान्क्रोधलोभाभ्यामाविष्टोनष्टचेतनः । तिर्यगीक्षःशुष्कमुखः
पापकोभ्रुकुटीमुखः ॥ ६९ ॥ निदशन्नऽधरोष्ठञ्चक्रुद्धोदारुणभाषिता । कस्तमिच्छेत्परिद्रष्टुंदातुमिच्छतिचेन्महीम् ॥७०॥ वासि
ष्ठवा० । नतादृशंजगत्यस्मिन्दुःखंनरककोटिषु । यादृशंयावदायुष्कमर्थोपार्जनशासनम् ॥ ७१ ॥ भागवतवा० । अर्थस्यसा

धनेसिद्धेउत्कर्षेरक्षणेव्यये। नाशोपभोगआयासस्त्रासश्चिन्ताभ्रमोनृणाम् ॥ ७२ ॥ स्तेयंहिंसाऽनृतन्दंभःकामःक्रोधःस्मयोमदः।
भिदोवैरमविश्वासःसंस्पर्द्धाव्यसनानिच ॥ ७३ ॥ एतेपञ्चदशाऽनर्थाह्यर्थमूलामतानृणाम्। तस्मादर्थमनर्थाख्यंश्रेयोऽर्थीदूरत
स्त्यजेत् ॥ ७४ ॥ वाक्यसं०। धनिनोरोगिणःप्रायोदृश्यन्तेक्षुद्विवर्जिताः। राजचोरादिभ्योभीताअन्योन्यंवैरिणोभृशम् ॥७५॥
तस्माद्वित्तैषणात्याज्यापुत्रैषणेवसर्वथा। मोक्षाख्यसुखलाभायमुमुक्षुभिःप्रयत्नतः ॥ ७६ ॥ ननुविशांधनाढ्यानांराजचौरादितो
स्तुभीः। राज्ञांनास्तिततोभीतिर्यतस्तेवलिनःस्वयम् ॥ ७७ ॥ तस्माद्राज्याद्विरागस्तुनकर्त्तव्यःसुखेप्सुना। इतिचेन्नयतोराज्ञां
भारतेदुःखमीरितम् ॥ ७८ ॥ भारतवा०। परतन्त्रःसदाराजास्वल्पेसोपिप्रसज्जते। संधिविग्रहयोगेषुकुतोराज्ञःस्वतन्त्रता ॥
७९ ॥ स्वप्तुकामोनलभतेस्वप्तुंकार्यार्थिभिर्जनैः। शयनेवाप्यनुज्ञातःसुप्तउत्थाप्यतेऽवशः ॥ ८० ॥ स्नाह्याऽऽलभपिवप्राशजुहु
ह्यग्नीन्यजेत्यपि। ब्रवीहिशृणुचापीतिविवशःकार्यतेपरैः ॥ ८१ ॥ अभिगम्याऽभिगम्यैनंयाचन्तेसततंनराः। नचाप्युत्सहतेदातुं
वित्तरक्षीमहाजनान्। ८२ ॥ दानेकोशक्षयोप्यस्यवैरञ्चोऽप्रयच्छतः। क्षणेनास्योपवर्त्तेतदोषोवैराग्यकारकः ॥ ८३ ॥ प्राज्ञां

स्ना

च्छूरांस्तथैवान्यानेकस्थानेऽपिशङ्कते। भयमप्यऽभयेराज्ञोयैश्चनित्यमुपास्यते ॥ ८४ ॥ हतोदेशःपुरन्दग्धंप्रधानःकुञ्जरोमृतः।
लोकसाधारणेष्वेषुमिथ्याज्ञानेनतप्यते ॥ ८५ ॥ अमुक्तोमानसैर्दुःखैरिछाद्वेषभयोद्भवैः। शिरोरोगादिभीरोगैस्तथैवाभिनि
मंचिभिः ॥ ८६ ॥ द्वंद्वैस्तैस्तैरुपहतःसर्वतःपरिशङ्कितः। वहुप्रत्यर्थिकंराज्यमुपास्तेगणयन्निशाः ॥ ८७ ॥ तदल्पसुखमत्यर्थं
वहुदुःखमसारवत्। तृणाऽग्निज्वलनप्रख्यंफेनवुद्बुदसंनिभम्। कोराज्यमभिपद्येतप्राप्यचोपशमंलभेत् ॥ ८८ ॥ साहमेतानिक
र्माणिराजदुःखानिमैथिल। समर्थाशतशोवक्तुमऽथवापिसहस्रशः ॥ ८९ ॥ ततोऽब्रवीत्कुण्डधारोदिव्यन्तेचक्षुरुत्तमम्। पश्य
राज्ञांगतिंविप्रलोकांश्चैवतुचक्षुषा ॥९०॥ ततोराजसहस्राणिमग्नानिनिरयेतदा। दूरादपश्यद्विप्रःसदिव्ययुक्तेनचक्षुषा ॥९१॥
वाक्यसं०। इत्थंवित्तस्यदुष्टत्वंविज्ञायभारतादितः। सन्त्यजेदैहिकंभोग्यन्तद्वच्चपारलौकिकम् ॥९२॥ नन्वैहिकस्यभोग्यस्यदुष्ट
त्वादस्तुहेयता। अदुष्टत्वान्नहेयत्वंस्वर्गभोग्यस्यसंभवेत् ॥९३॥ अपामसोमममृताअभूमेत्याद्याःश्रुतयोजगुः। स्वर्गभोग्यस्यनित्यत्व
न्तथादिव्यसुखात्मताम् ॥ ९४ ॥ श्रुतिः। स्वर्गेलोकेनभयंकिंचनास्तिनतत्रत्वंजरयाविभेति। उभेतीर्त्वाऽशनायापिपासेशोका

धनधान्यसमाकुलः। स्नेहपाशसितोमूढोनमोक्षायकल्पते ॥ ४८ ॥ स्नेहेनतिलवत्सर्वंसर्गचक्रेनिपीड्यते। तिलपीडैरिवाऽऽ
क्रम्यक्लेशैरज्ञानसंभवैः ॥ ४९ ॥ जीवन्तमपिचैवैनंभरणेरक्षणेतथा। असमाप्तेपरित्यज्यपश्चादपिमरिष्यति ॥ ५० ॥ एवंविजा
नंल्लोकेऽस्मिन्कःकस्येत्यभिनिश्चितः। मोक्षेनिवेशयमनइतिराज्ञेद्विजोव्रवीत् ॥ ५१ ॥ वाक्यसं०। पुत्रायस्मादिसर्वेषांजायंते
स्वशुभाऽशुभैः। पित्रोर्धर्मंविनातस्मादुपेक्ष्यास्तेमुमुक्षुभिः ॥ ५२ ॥ तस्मान्नृदेहमासाद्यस्वमोक्षस्याभिवांछया। यूकादिवत्सुतास्त्या
ज्याःशृङ्खलावच्चवांधवाः ॥ ५३ ॥ सुतवांधवनिन्देवंप्रागिहसमुदीरिता। श्रौतक्रमानुसारेणवित्तनिन्दाथवक्ष्यते ॥ ५४ ॥ ननुमो
क्षोधनेनस्याच्छ्रीमतांकिन्नुदुर्लभम्। इत्यादेर्लौकिकाद्वादात्किमर्थन्त्यागमाश्रयेत् ॥ ५५ ॥ मैवंमोक्षस्यसिद्धत्वान्नकेनाप्यस्तिसाध्य
ता। मोहाऽऽवृतोऽद्वयानन्दःकैश्चित्त्यागेनलभ्यते ॥ ५६ ॥ ननुज्ञानस्यवित्तेनमानजत्वान्नसाध्यता। मुक्तेस्तुधनसाध्यत्वंस्यात्सुख
त्वेनहेतुना ॥ ५७ ॥ मैवमारण्यकेश्रुत्यामैत्रेयीब्राह्मणेयतः। मोक्षस्यवित्तसाध्यत्वंसाक्षादेवनिराकृतम् ॥ ५८ ॥ अमृतत्वस्यना
शास्तिवित्तेनेत्यादियातथा। नधनेनाऽमृतत्वमानशुरितिजगौश्रुतिः ॥ ५९ ॥ यत्तूक्तंश्रीमतांकिन्नुदुर्लभमितितन्मृषा। क्षुद्राण्य

स्सुताम् ॥ ६ ॥ स्वर्गसुखस्यदिव्यत्वंयत्पूर्वपच्चिणेरितम्। किंस्यात्त्तस्यदिव्यत्वंवक्तव्यमितितेनवै ॥ ७ ॥ किंदेवैरेवभोग्यत्वंसा
त्विकत्वमथापिवा। उत्कर्षोऽन्यसुखाद्दास्याद्दिविभवत्वमेववा ॥ ८ ॥ नाद्योदैत्यायतोदेवान्जित्वास्वर्गसुखंगताः। हिरण्या
च्चादयःशूराइतिपौराणिकाजगुः ॥ ९ ॥ राच्चसारावणाद्याश्चस्वर्गसुखमवाप्नुवन्। मनुष्यानहुषाद्याश्चभुंजतेस्मदिवःसुखम् ॥
१० ॥ नद्वितीयोयतस्तस्यराजसत्वमुदीरितम्। भगवतास्वगीतासुखार्थसंयोगजत्वतः ॥ ११ ॥ गीतावा०। विषयेन्द्रियसंयो
गाद्यत्तदग्रेऽमृतोपमम्। परिणामेविषमिवतत्सुखंराजसंस्मृतम् ॥ १२ ॥ वाक्यसं०। नतृतीयोयतोनैवाप्युत्कर्षोऽस्मत्सुखाद
णुः। स्वर्गसुखस्यनिस्तृष्णैर्विचारेणोपलभ्यते ॥ १३ ॥ तैतरेयेतुयत्प्रोक्तंन्यूनाऽधिक्यंसुखस्यवै। तत्तुरागिदृशासिद्धंवैराग्यायह्य
नूदितम् ॥ १४ ॥ तत्त्वदृष्ट्यातुनैवास्तिविशेषोह्यैहिकात्सुखात्। स्वर्गभोगसुखस्यापिस्वार्थजत्वाऽविशेषतः ॥ १५ ॥ आत्मपुराण
उक्तोयमर्थोवैराग्यसिद्धये। दध्यंगाथर्वणस्योक्तेर्व्याजेनैवसमासतः ॥ १६ ॥ आत्मपुराणवा०। उत्पद्यतेसुखंयादृग्ब्रह्मणःपरमे
ष्ठिनः। विष्टाक्रिमेस्तादृगेवस्याद्योगादिन्द्रियार्थयोः ॥ १७ ॥ विट्क्रिमेरपिसंत्येवह्यन्नंदाराःसुतास्तथा। ब्रह्मणोपिविशेषःस्याद

नयोः केनहेतुना ॥ १८ ॥ जायतेम्रियतेब्रह्माविट्क्रिमिश्चतथैवहि । सुखदुःखकरंतद्वत्समदेहत्वंसमंद्वयोः ॥ १९ ॥ किंवहूक्तेन देवेन्द्रसंक्षेपेणावधारय । समः संसारआत्माचममतेपिशुनोपिच ॥ २० ॥ वाक्यसंग्रहकृद्दा ० । नतुरीयोयतःस्वर्गेसन्तिदोषाभयादयः । सुखवत्तेप्यहेयाःस्युःस्वर्गभवत्वमाचतः ॥ २१ ॥ तेषामहेयतानेष्टाप्राणिमात्रस्यकस्यचित् । एवंदिविभवत्वंनदिव्यत्वमपिसंभवेत् ॥ २२ ॥ तस्माद्दैहिकवद्धेयंस्वर्गभोगसुखंवुधैः । वहुनाकिमिहोक्तेनसर्वान्शब्दादिकांस्त्यजेत् ॥ २३ ॥ नचैकान्तेनशब्दाद्याकुत्रापिसुखदायतः । स्वल्पसुखप्रदत्वेपिप्रायेणदुःखदाःसदा ॥ २४ ॥ येहिसंस्पर्शजाभोगादुःखयोनयएवते । इति श्रीकृष्णदेवोप्यर्थानामाहस्मदुष्टतां ॥ २५ ॥ विषयवासनाकृष्टंचित्तंत्वनादिकालतः । तासांततःप्रहाणायविषयाणांमुहुर्मुहुः ॥ २६ ॥ दोषाश्चिन्त्याःप्रयत्नेनतावदेवमुमुक्षुणा । यावन्ननाशमायान्त्यर्थेष्वखिलाहिवासनाः ॥ २७ ॥ भोगाधिष्ठानभोग्यानां दोषाःप्रागिहकीर्त्तिताः । भोगसाधनदोषास्त्वधुनोच्यन्तेसमासतः ॥ २८ ॥ इन्द्रियाणितथासत्वंभोगानांसाधनानिवै । तेषु दोषाश्चवोद्धव्यास्तेभ्योवैराग्यसिद्धये ॥ २९ ॥ स्वस्वविषयसंसक्तिःप्रमाथित्वंतथात्मनः । सदापराङ्मुखत्वंचदोषाःश्रोत्रादिषु

म० सा० स्थिताः ॥ ३० ॥ वाच्यऽनृतादिभाषित्वंदेहीदमितिचयाचनम्। चौर्य्याद्याश्चकरांघ्र्यादौदोषाःकर्मेन्द्रियेष्वपि ॥ ३१ ॥ कामः
३० क्रोधस्तथालोभस्तृष्णामोहमदादयः। सन्त्यन्तःकरणेदोषावहवोनर्थहेतवः॥ ३२॥ दुष्टैःश्रोत्रादिभिर्नैवभोक्तुर्वै स्यात्सुखंक्वचि
त्। दुष्टैरश्वैर्यथानैवरथिनोस्तिसुखंपथि ॥ ३३ ॥ भोगसाधनदोषाश्चवासिष्ठेपिप्रदर्शिताः। तद्वाक्यसंग्रहेणाचकथ्यन्तेतेधुना
पुनः ॥ ३४ ॥ वासिष्ठवा०। चिरमासुदुरन्तासुविषयारण्यराजिषु। इन्द्रियैर्विप्रलब्धोस्मिधूर्त्तैर्बालैरिवार्भकः ॥ ३५ ॥ आत्म
भरीण्यनार्याणिसाहसैकरतानिच। अन्धकारविहारीणिरचांसिस्वेन्द्रियाणिच ॥ ३६ ॥ मृदूनिपरितापीनिदृषद्दृढवलानि
च। छेदेभेदेचदच्चाणिसुश्रस्ताणीन्द्रियाणिच ॥ ३७ ॥ यानिदुःखानिदीर्घाणिविषमाणिमहान्तिच। अहंकारात्प्रसूतानिता
न्यगात्खदिरादिव ॥ ३८ ॥ चेतःपततिकार्येषुविहंगःस्वामिषेष्विव। चणेनविरतिंयातिवालःक्रीडनकादिव ॥ ३९ ॥ भोगदू
र्वांकुराकांचीश्वभ्रपातमचिन्तयन्। मनोहरिणकोब्रह्मन्दूरंविपरिधावति ॥ ४० ॥ वाक्यसं०। इयमिष्टान्वहुविधान्प्रत्नार्थां
नध्यवस्यति। इत्यत्क्याभारतेदोषोवुद्धेरपिप्रदर्शितः ॥ ४१ ॥ भोगानांसाधनेष्वेवंप्राग्दोषाःसमनूदिताः। भोक्तृदोषास्तथोच्य

तिगोमोदतेस्वर्गलोके ॥ ९५ ॥ वाक्यसं०। तन्नस्वर्गसुखंयस्मादनित्यमैहिकंयथा। राजसत्वाच्छ्रुतिश्चात्रप्राकृतद्यथेत्युदाहृ
ता ॥ ९६ ॥ तत्सुखेतिभयश्चापिदर्शितस्त्वैतरेयके। सैषेत्यादिकयाश्रुत्यातोपिस्वर्गसुखंत्त्वयी ॥ ९७ ॥ भीतिश्चापिविराजोवै
श्रुतापितुःसकाशतः। स्वादनादिनिमित्तेनतमित्यादेर्हिवाक्यतः ॥ ९८ ॥ स्वजनकाच्चभीर्नास्तिशूकरादेरपिक्वचित्। स्मृते
रोषणजातेःसायात्दृश्यासीत्प्रजापतेः ॥ ९९ ॥ तथेन्द्रार्कादिदेवानांजगदीशाद्भयंश्रुतम्। तैतरेयत्यमंत्रेणभीतानांस्यात्सुखंकु
तः ॥ ४०० ॥ मन्त्रः। भीषास्माद्वातःपवतेभीषोदेतिसूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्चमृत्युर्धावतिपञ्चमः ॥ ४०१ ॥ वाक्यसं०।
इन्द्रवातादयोह्येवंभयाऽऽविष्टायदातदा। पित्रादीनांतुभीतत्वंकिमुतन्यायढौकितम् ॥ २ ॥ प्रजापत्यादिदेवानांसंभीतत्वादि
हेतुभिः। दुःखित्वंदिविनिश्चित्यनेच्छेत्स्वर्गसुखंसुधीः ॥ ३ ॥ अपामेत्यादियद्वाक्यन्तच्चिरस्थितिबोधकम्। आभूतसंप्लवंस्थानम
मृतत्वमितिस्मृतेः ॥ ४ ॥ स्वर्गइत्यादियद्वाक्यन्तद्भवेद्गुणवादकम्। स्वर्गसाधनलाभार्थंनचिकेतायतोऽब्रवीत् ॥ ५ ॥ आब्रह्मभु
वनाल्लोकाःपुनरावर्त्तिनोऽर्जुन। तेतंभुक्त्वास्वर्गलोकंविशालंक्षीणेपुण्येमर्त्त्यलोकंविशन्ति। इत्यादिवचनैरीशोप्यब्रवीत्स्वःत्वयि

यः। एकस्यापिनपर्याप्तंतस्मात्तृष्णांपरित्यजेत्॥५४॥ सूच्यासूत्रंयथावस्त्रेससारयतिवायकः। तद्वत्संसारसूत्रंहितृष्णासूच्या
निवध्यते॥५५॥ वासिष्ठवा०। अपिमेरुसमंप्राज्ञमपिशूरमपिस्थिरम्। तृणीकरोतितृष्णैकानिमेषेणनरोत्तमम्॥५६॥
भीषयत्यपिज्ञंधीरमंधयत्यपिसेक्षणम्। खेदयत्यपिसानन्दंतृष्णाकृष्णेवशर्वरी॥५७॥ क्षणमायातिपातालंक्षणमायातिनभस्तलं
क्षणंभ्रमतिदिक्कुंजेतृष्णाहृत्पद्मषट्पदी॥५८॥ वाक्यसं०। तस्माद्विषयरागोत्थातत्त्वज्ञानाभिभाविका। तृष्णाश्रेयोर्थिना
त्याज्यागौडीपैष्टीसुरायथा॥५९॥ विरागेणविनानैवतृष्णाहेतुक्षयोयतः। तस्माच्छुद्धविरागंनाकुर्यात्तृष्णाग्निशान्तये॥६०॥
सविरागःपुराणेषुचतुर्विधःप्रकीर्त्तितः। यतमानवशीकारव्यतिरेकादिभेदतः॥६१॥ तस्मान्नृदेहमासाद्यमोक्षद्वारंसुदुर्लभं।
विषयेषुनसज्जेतविड्गर्त्तेशूकरादिवत्॥६२॥ स्मरन्निचेतिसूत्रेणनरकानिरपीरिता। पापिनोविषयासक्तेर्गर्द्दभत्वंचभारते॥
६३॥ भारतवा०। आत्मानमात्मस्थंनवेत्तिमूढः संसारकूपेपरिवर्त्ततेयः। त्यक्त्वात्मरूपंविषयांश्चभुंक्ते सवैजनोगर्द्दभएवसा
क्षात्॥६४॥ वाक्यसंग्रहकृद्वा०। एवंशब्दादिलाभायधीमान्नैवकदाचन। धनादिसंग्रहंकुर्याद्यदीच्छेदुत्तमंसुखम्॥६५॥

शरीरस्थितिमात्रंनुन्नैर्वसिष्ठोऽक्षियैर्विना । तानन्नादींस्तुगृह्णीयादितिशुकेनचेरितम् ॥ ६६ ॥ भागवतवा० । सत्यांक्षितौकिं कशिपोःप्रयासैर्बाहौस्वसिद्धेह्युपबर्हणैःकिं । सत्यंजलौकिंपुरुधान्नपाच्या दिग्वल्कलादौसतिकिंदुकूलैः ॥ ६७ ॥ चीराणि किंपथिनसन्तिदिशन्तिभिक्षां । नैवांघ्रिपाःपरभृतःसरितोप्यशुष्यन् । रुद्धाःगुहाःकिमऽजितोवतिनोपसन्नान् । कस्माद्भज न्तिकवयोधनदुर्मदांधान् ॥ ६८ ॥ वाक्यसं० । विरागोदर्शितश्चैवमथषट्संपदुच्यते । तत्राप्याद्यःशमस्तादद्विरागोद्भवउच्यते ॥ ६९ ॥ शमश्चित्तप्रशांतत्वंवासनात्यागसंज्ञितम् । शुद्धाशुद्धप्रभेदेनद्विविधावासनेरिता ॥ ७० ॥ तयोःशुद्धाह्युपादेयादैवीसंपत्ति रूपिणी । मलिनातुसदाहेयावासनाह्वच्छमार्थिना ॥ ७१ ॥ साचोक्तात्रिविधाप्राज्ञैस्तत्राद्यालोकवासना । द्वितीयादेहगासो क्तातृतीयाशास्त्रवासना ॥ ७२ ॥ परित्यागायतासांतुविचारःसाधनंपरं । एतत्सर्वंवसिष्टेनतथान्यैश्चप्रदर्शितम् ॥ ७३ ॥ वास नालक्षणंचापिशमशान्तस्तुतिस्तथा । श्रीवसिष्ठेनसम्प्रोक्तातद्वाक्यानिलिखाम्यतः ॥ ७४ ॥ वासिष्टवा० । दृढाभ्यस्तपदार्थैक भावनादतिचंचलं । चित्तंसंजायतेरामजरामरणकारणम् ॥ ७५ ॥ तस्माद्वासनयाबद्धंमुक्तंनिर्वासनंमनः । रामनिर्वासनी

भावमाहराशुविवेकतः॥ ७६ ॥ सम्यगालोचनात्सत्याद्वासनापरि लीयते। वासनाविलयेचेतःशममायातिदीपवत्॥ ७७ ॥
दृढभावनयात्यक्तपूर्वापरविचारणं। यदादानंपदार्थस्यवासनासाप्रकीर्त्तिता॥ ७८॥ वासनाद्विविधाप्रोक्ताशुद्धाचमलिनात
था। मलिनाजन्महेतुःस्याच्छुद्धाजन्मविनाशिनी॥ ७९ ॥ मानसीर्वासनाःपूर्वंत्यक्ताविषयवासनाः। मैत्र्यादिवासनारामगृह्णा
णाऽमलवासनाः। ८० ॥ अस्यसंसारवृक्षस्यसर्वोपद्रवदायिनः। उपायएकएवास्तिमनसस्स्वस्यनिग्रहः॥ ८१ ॥ हस्तंहस्तेनसं
पीड्यदन्तैर्दन्तान्विचूर्ण्यच। अंगैरंगानिसमाक्रम्यजयेदादौस्वकंमनः।।८२॥ इच्छामात्रंविदुश्चित्तंतच्छांतिर्मोक्षउच्यते। एता
वन्त्येवशास्त्राणितपांसिनियमायमाः॥ ८३ ॥ यस्त्विच्छातानवेयत्नंनकरोतिनराधमः। सोंधकूपेस्वमात्मानंदिनानुदिनमुज्झ
ति॥ ८४ ॥ दुःखमुत्पादयत्युच्चैरुत्थितश्चित्तराक्षसः। सुखायानंतभोगायतंप्रयत्नेनपातय॥ ८५ ॥ भोगाऽभोगतिरस्कारैः
कार्श्यंनेयंशनैर्मनः। रसाऽपहारैस्तन्नेनकालेनाऽजीर्णपर्णवत्॥ ८६ ॥ अनात्मन्यात्मभावेनदेहमात्रास्थयातथा। पुत्रदारकु
टुंबैश्चचेतोगच्छतिपीनताम्॥ ८७ ॥ स्नेहेनधनलोभेनलाभेनमणियोषिताम्। आपातरमणीयेनचेतोग०॥ ८८ ॥ अस्यचि

न्तेधुनाकेचित्समासत: ॥ ४२ ॥ भोक्तारस्त्रिविधाज्ञेयाउत्तमाधममध्यमा: । उत्तमाइन्द्रमुख्या:स्युर्दरिद्राअधमा:स्मृता: ॥ ४३ ॥
मध्यमाश्चतथाज्ञेयाराजानश्चक्रवर्त्तिन: । क्षयिष्णवश्चतेसर्वेज्ञेयाभोगजिहासुभि: ॥ ४४ ॥ चतुर्दशसुलोकेषुयतोभोक्तानकश्चन ।
ब्रह्मणोह्यायुषोनाशेस्थास्यत्येकमपिक्षणम् ॥ ४५ ॥ ब्रह्मराज्यागमेऽध:स्था:स्वर्गलोकादिवासिन: । भोक्तार:संप्रलीयन्तइतिपौरा
णिकाजगु: ॥ ४६ ॥ दिव्यान्भोग्यानपित्यक्ताप्रलीयन्तेयतोखिला: । इन्द्रादयोपिभोक्तारस्तस्माज्जीवंस्त्यजेद्दितान् ॥ ४७ ॥ एवं
भोगाश्रयांगस्यभोगसाधनभोग्ययो: । भोक्तृणांचतथादोषा:प्रागिहसमुदीरिता: ॥ ४८ ॥ तान्दोषान्सम्यगालोच्यविरक्तो
गादिभ्योनर: । तृष्णादोषांस्तथादृष्ट्वाभोग्येषुतान्त्यजेत्सुधी: ॥ ४९ ॥ तृष्णायाविषयै:पूर्त्तिर्नैवकैश्चित्कृतापुरा । करिष्यन्तिनचा
न्येतैर्भोग्यतृष्णांततस्त्यजेत् ॥ ५० ॥ तृष्णात्यागंविनानास्तिस्वानन्दाप्तिर्यतोनृणां । तस्मात्स्वात्मसुखेप्रेप्सुस्तृष्णांशब्दादिषुत्यजेत्
॥ ५१ ॥ तृष्णायावहवोदोषा:सम्प्रोक्ताभारतादिषु । तद्वाक्यानिपठाम्यद्यतृष्णात्यागस्यसिद्धये ॥ ५२ ॥ भारतवा० । यादुस्त्यजा
दुर्मतिभिर्यानजीर्यतिजीर्यत: । योसौप्राणान्तिकोरोगस्तांतृष्णांत्यजत:सुखम् ॥ ५३ ॥ यत्पृथिव्यांव्रीहियवंगोहिरण्यंपशव:स्त्रि

याधुनोच्यते ॥ ९९ ॥ हठप्रदीपिकाकृदात्मारामवा ० । हेतुद्वयंतुचित्तस्यवासनाचसमीरणः । तयोर्विनष्टएकस्मिन्तद्भावपिवि
नश्यतः ॥ ५०० ॥ पवनोवध्यतेयेनतेनैववध्यतेमनः । मनश्चवध्यतेयेनपवनस्तेनवध्यते ॥ १ ॥ वासिष्ठवा ० । प्राणायामदृढाऽभ्यासै
र्युक्त्याचगुरुदत्तया । आसनाशनयोगेनप्राणस्पन्दोनिरुध्यते॥२॥ शिववा०। ज्ञानंकुतोमनसिजीवतिदेवियावत्। प्राणेऽपिजीव
तिमनोम्नियतेनतावत्प्राणोमनोद्वयमिदंविलयंप्रयाति । मोक्षंसगच्छतिनरोनकथंचिदन्यः ॥ ३ ॥ वाक्यसं ० । ज्ञानाधिकारि
णोयस्मान्मध्यमस्यमनःशमः । योगाऽऽभ्यासंविनानास्तितस्माद्योगंससाधयेत् ॥४॥ योगेनप्राणसंस्पन्देक्षीणेसतिशनैःशनैः । मनः
प्रशमतामेतिपञ्चवृत्तिविरोधिनीम् ॥ ५ ॥ एवंमनःशमंकुर्याद्योगेनवाविचारतः । स्वश्रेयसेऽथवाह्यानांखानामप्युच्यतेदमः ॥६॥
मनःशमंविधायाथवहिरिन्द्रियसंयमम् । कुर्यान्नार्स्वाहृताऽवाप्तैग्रहरन्तितानिहृद्यतः ॥ ७ ॥ वाह्येन्द्रियदमेतस्मात्कार्योयत्नःपृथ
ग्बुधैः । तानिसर्वाणिसंयम्येत्युक्तवांश्चयतोहरिः ॥ ८ ॥ शब्दादिविषयेभ्योयोवाह्येन्द्रियविनिग्रहः । सदमोभारतेप्रोक्तोदम
स्तुत्यादिकंतथा ॥ ९ ॥ भारतवा ० । दमस्तेजोवर्द्धयतिपठितंचदमःपरम् । विपाप्मातेजसायुक्तःपुरुषोविन्दतेमहत् ॥ १०॥

अदांतःपुरुषःक्लेशमभीक्ष्णंप्रतिपद्यते। अनर्थांश्चबहूनन्यान्प्रसरत्यात्मदोषजान् ॥ ११ ॥ इन्द्रियाण्येवमेध्यानिविजेतव्यानियत्न
तः। शब्दंनविन्देच्छ्रोत्रेणस्पर्शंत्वचानवेदयेत् ॥ १२ ॥ रूपंनचक्षुषाविद्याज्जिह्वयानरसांस्तथा। घ्रेयाण्यपिचसर्वाणिजह्याद्घ्रा
णेनयोगवित् ॥ १३ ॥ अभयंसर्वभूतेभ्यःसर्वेषामभयंयतः। नमस्यःसर्वभूतानांदांतोभवतिबुद्धिमान् ॥ १४ ॥ वाक्यसं० ॥ दमंस
मभिधायाथोपरतिस्त्वधुनोच्यते। शान्तस्यचेतसोनित्यंशब्दादेःप्रागुदीरितात् ॥ १५ ॥ दान्तानामिन्द्रियाणांचवाह्यानामपिस
र्वथा। यदुपरमणंप्रोक्ताऽऽचार्यैरुपरतिस्तुसा ॥ १६ ॥ तथाऽखिलैषणान्यासःपरमोपरतिःस्मृता। सचाग्रेविस्तरेणाचषट्प्रकारे
णवक्ष्यते ॥ १७ ॥ विलापादीन्विनायातुसर्वद्वंद्वसहिष्णुता। विवेकेनैवसाप्रोक्तातितिक्षाब्रह्मवादिभिः ॥ १८ ॥ तितिक्षार्थंविवे
कस्त्वेकादशेभिक्षुणेरितः। भागवतेतितिक्षायांविधिस्तुभारतेस्मृतः ॥ १९ ॥ भागवतवा०। नायंजनोमेसुखदुःखहेतुर्नदेवतात्मा
ग्रहकालकर्म। मनःपरंकारणमामनन्तिसंसारचक्रंपरिवर्त्तयेद्यत् ॥ २० ॥ भारतवा०। धर्मंपुत्रनिषेवस्वसुतीक्ष्णौचहिमाऽऽ
तपौ। क्षुत्पिपासेचवायुंचजयनित्यंजितेन्द्रिय ॥ २१ ॥ अतिवादांस्तितिक्षेतनाऽवमन्येतकञ्चन। क्रोश्यमानःप्रियंब्रूयादाक्रु

मु० सा० ष्टःकुशलंवदेत् ॥ २२ ॥ अवकीर्णःसुगुप्तश्चनवाचाह्यऽप्रियंवदेत्। मृदुःस्यादप्रतिकूरोविस्रब्धःस्यादकत्थनः ॥ २३ ॥ वाक्य
३४ सं०। एवंसुधीर्विवेकेनसर्वद्वंद्वसहिष्णुताम्। संपाद्यगुरुवाक्यादौकुर्याच्छ्रद्धांप्रयत्नतः ॥ २४ ॥ ब्रह्मात्मैक्यपरेशास्त्रेगुरुवाक्येत
थाऽनिशम्। इत्थमेवेतिविश्वासोयःसाश्रद्धेतिभण्यते ॥ २५ ॥ श्रद्धालुनैवसंभाव्यंवेदान्तश्रवणार्थिना। श्रद्धत्स्वेत्यादिवाक्यानि
श्रद्धांज्ञानायसंजगुः ॥ २६ ॥ ब्रह्मण्याचार्यवाक्येचैकाग्र्यंयत्तुचेतसः। समाधानंहितत्प्रोक्तंकर्त्तव्यंश्रवणेच्छुभिः ॥ २७ ॥ शान्तइ
त्यादिवाक्यंह्याश्रित्यषट्संपदीरिता। मोक्षेच्छाऽधिकृतस्याद्यविशेषणतयोच्यते ॥ २८ ॥ शृङ्खलाभिर्हिबद्धस्ययष्टिभिस्ताडित
स्यचराजभृत्यैर्यथोदेतिमोचनेच्छाभृशंहिनुः ॥ २९ ॥ तथासंसृतिपाशेनबद्धस्याऽज्ञानतोभृशम्। प्रतीचोमोचनेच्छायामुमुक्षासो
च्यतेबुधैः ॥ ३० ॥ ननुकोचात्मनोबंधःकश्चमोक्षःप्रकीर्त्तितः। मोक्षस्यसाधनंकिंचमानंतेषुतथैवकिम् ॥ ३१ ॥ शृण्वनात्मन्यहं
भावोयःसबंधःप्रकथ्यते। मूलाऽविद्याविनाशोयःसमोक्षइतिकथ्यते ॥ ३२ ॥ निरतिशयकस्याचप्रादुर्भावोहियोहृदि। निःशे
षानर्थनाशश्चसमोक्षःसद्भिरुच्यते ॥ ३३ ॥ मोक्षस्यसाधनंसाक्षाज्ज्ञानंतथाऽभयादयः। पारंपर्य्येणगीतासुकथितामोक्षहेतवः

त्तमहाव्याधेश्चिकित्सयामहौषधम्। स्वायत्तंशृणुवक्ष्यामिसाधुस्वस्वादनिश्चितम् ॥ ८९ ॥ शमेनासाद्यतेश्रेयःशमोहिपरमंपदम्।
शमःशिवःशमःशान्तिःशमोभ्रान्तिनिवारणम् ॥ ९० ॥ पुंसःप्रशमतृप्तस्यशीतलाऽच्छतरात्मनः। शमभूषितचित्तस्यशत्रुरप्येतिमि
त्रताम् ॥ ९१ ॥ स्वपौरुषैकसाध्येनस्वेप्सितत्यागरूपिणा। मनःप्रशममात्रेणविनानास्तिशुभागतिः ॥ ९२ ॥ त्यजन्नऽभिमतंवस्तु
यस्तिष्ठतिनिरामयः। जितमेवमनस्तेनकुदन्तइवदन्तिना ॥ ९३ ॥ वाक्यसं०। एवंस्वेप्सितसंत्यागहेतुर्विचारईरितः। प्राक्त
नैर्भोगसंस्कारैर्विक्षिप्तांप्रा यशान्तये ॥ ९४ ॥ ऐहिकैःस्वाऽवमानाद्यैश्चित्तंविक्रियतेयदि। तदेत्थंतच्छमायाऽऽस्तैर्विचारःक
र्तुमीरितः ॥ ९५ ॥ ज्ञानांकुशवा०। मन्निन्दयायदिजनःपरितापमेतिनन्वऽप्रयत्नजनितोयमनुग्रहोमे। श्रेयोर्थिनोहिपुरु
षाःपरतुष्टिहेतोर्दुःखाऽर्जितान्यपिधनानिपरित्यजन्ति ॥ ९६ ॥ आप्तवा०। जीवन्तुमेशत्रुगणाःसदैवयेषांप्रसादात्सुविचक्षणो
ऽहम्। यदायदामेविकृतिंभजन्ते तदातदामांप्रतिबोधयन्ति ॥ ९७ ॥ आत्मानंयदिनिन्दन्तिस्वात्मानंस्वयमेवहि। शरीरंयदि
निन्दन्तिसहायास्तेजनाममम ॥ ९८ ॥ वाक्यसं०। विचाराख्योहिचित्तस्यशमोपायःप्रदर्शितः। योगिवाक्यैश्चयोगोपिहृच्छमा

घ्यते ॥ ४५ ॥ स्वस्वरूपंसुखंतच्चेन्नाऽवेद्यंनृभिरर्थ्यते। वेद्यत्वेकर्मकर्त्तृत्वदोषोह्येकस्यचाऽऽपतेत्। तस्माद्दुःखस्यध्वंसःस्यान्मोक्षो
नभावरूपकः ॥ ४६ ॥ मैवंसुखंचदुःखंचभावरूपंगजाश्ववत्। यतोनुभूयतेलोकेसुखस्याऽभावताकुतः ॥ ४७ ॥ तदेतत्प्रेयइत्या
दिश्रुतिभिर्भावतोदिता। तथात्मनस्तुकामायेत्युक्तासुखस्यभावता ॥ ४८ ॥ तदेवंसुखयोःसिद्धालौकिकवैदिकाख्ययोः। भाव
तालोकवेदाभ्यामैक्यार्थ्याल्लोकवेदयोः ॥ ४९ ॥ यदुक्तंभावरूपत्वेमोक्षेरागात्प्रवृत्तितः। मोक्षःसंसारएवस्यात्त्वत्पक्षेप्यस्तितत्स
मम् ॥ ५० ॥ संसृतिदुःखविद्वेषाद्दुखध्वंसाख्यमोक्षके। प्रवृत्तेःसंसृतित्वंतेमोक्षस्यनकुतोभवेत् ॥ ५१ ॥ पुरुषार्थाऽभियोगित्वा
द्वेषस्ययदिसंसृतेः। उद्वेगतातदामोक्षेरागोप्यास्तिक्यमक्षवै ॥ ५२ ॥ यत्तूक्तमपुमर्थत्वमवेद्यत्वेहिकर्मता। कर्त्तृतैकस्यवेद्यत्वे
नेहदोषद्वयंहितत् ॥ ५३ ॥ सुखस्यस्वस्वरूपत्वाद्वेद्यतातत्तनेष्यते। जडएवेष्यतेसाहिनतुज्ञानसुखात्मके ॥ ५४ ॥ दृश्यतेत्विति
तुश्रुत्यावृत्तिव्याप्यत्वमात्मनः। उच्यतेनैववेद्यत्वंयतइत्यादिवाक्यतः ॥ ५५ ॥ तदेवंलोकवेदाभ्यांसुखस्यभावतेरिता। ताभ्यांतु
ष्टिर्नचेत्तर्हियुक्तिमपीक्षमेशृणु ॥ ५६ ॥ सुखंदुःखस्यनैवाऽस्त्यऽभावस्तदनिरूपणात्। यथाघटस्तथाचेदंतस्माद्भितत्तथाभवेत्

॥ ५७ ॥ विवादास्पदआनन्दोभावोभवितुमर्हति। प्रतियोग्यऽनिरूप्यत्वाद्यथाघटस्तथाह्ययम् ॥ ५८ ॥ एवंदुःखात्ययोमोक्षइ
त्यक्षपादसंमतं। लोकाऽगमानुमानैःप्राग्दिङ्मात्रेणेहदूषितम् ॥ ५९ ॥ इत्थंभट्टाद्य भिप्रेतमोक्षेषुदूषणांसुधीः। ज्ञात्वातान्परि
त्यज्यवांछेत्स्वात्मसुखंशिवम् ॥ ६० ॥ तस्माज्ज्ञावात्मकस्येच्छानित्यमोक्षसुखस्यया। साप्येवंसंभवेद्देवाऽधिकारिविशेषणम् ॥ ६१ ॥
अतोमोक्षायसंपाद्यादैवीसंपन्मुमुक्षुणा। पारंपर्येणहेतुत्वंमुक्तेस्तस्याःपुरोदितम् ॥ ६२ ॥ येमहाव्रतवन्तोवैदेवीसंपत्समन्वि
ताः। आसुर्य्यासंपदाहीनास्तेनरामोक्षभागिनः ॥ ६३ ॥ नित्यभावसुखादन्यत्सुखंदुःखाऽन्वितंयतः। तस्माद्भोगसुखंत्यक्त्वामो
क्षेच्छामाश्रयेद्बुधः ॥ ६४ ॥ एवंरामप्रसादेनप्रकरणंतृतीयकम्। समाप्तंसाधनानांवैचतुर्णांसुनिरूपकम् ॥ ५६५ ॥ ७९७ ॥
इतिश्रीमुमुक्षुसर्वस्वसारसंग्रहाख्येनिबंधेसाधनचतुष्टयनिरूपणाख्यंतृतीयंप्रकरणंसंपूर्णम् ॥ ३ ॥ ० ॥

श्रीगणाधिपतयेनमोनमः। चतुर्भिःसाधनैर्युक्तायस्यज्ञातुमिहेच्छया। कुर्वन्तिद्विविधंन्यासन्तंवन्दे रघुनन्दनम्॥ १॥ अथ
संन्यासिनांधर्मान्न्यासाधिकारिणस्तथा। वदन्तियानिवाक्यानिसंगृह्णीष्येनतान्यहम्॥ २॥ चतुःसाधनसंपन्नःस्वगृहान्नापरिव्र
जेत्। प्रत्यग्ज्ञानायजिज्ञासुर्विद्वांश्चैत्तशांतये॥ ३॥ त्यागएवहिसर्वेषांमोक्षसाधनमुत्तमम्। इतिश्रुतिर्यतःप्राहन्यासंज्ञानाय
कर्मणाम्॥ ४॥ त्यजधर्ममधर्मंचेत्याहन्यासन्तथाश्रुतिः। न्यासोब्रह्मेतिचाप्याहतैत्तरीयश्रुतिस्तथा॥ ५॥ ससंन्यासोद्विधाज्ञे
योलिङ्गाऽलिङ्गविभागतः। तयोश्चलिङ्गसंन्यासोज्ञेयःषोढापुनर्बुधैः॥ ६॥ कुटीचकोबहूदश्चहंसःपरमहंसकः। तुर्यातीतो
वधूतश्चषडेतेभिक्षवःस्फुटम्॥ ७॥ पारिव्राजाभिधेयायामुपनिषद्युदीरिताः। तेषांधर्मास्तथातत्राऽन्यास्वपिचप्रकीर्त्तिताः
॥ ८॥ षट्सुपरमहंसोयश्चतुर्थःसमुदीरितः। जिज्ञासुर्ज्ञानवांश्चेतिविज्ञेयोद्विविधोह्यसः॥ ९॥ प्रत्यग्बोधायजिज्ञासोर्न्या
सश्चारण्यकेश्रुतः। एतंलोकमिच्छन्तोवैन्यासिनःप्रव्रजन्तिहि॥ १०॥ जीवन्मुक्तेस्तुसंसिद्ध्यैविद्वत्संन्यासईरितः। एतद्वस्मेति
वाक्येनवाजसनेयिभिःस्फुटम्॥ ११॥ किंप्रजयाकरिष्यामोऽतिदुःखहेतुभूतया। अयमात्मापरानन्दःसदाऽस्माभिर्हिवीक्ष्यते

॥ ३४ ॥ गीतावा० । अभयंसत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्ज्जवम् ॥ ३५ ॥ अहिंसासत्य
मक्रोधस्त्यागःशान्तिरपैशुनं दयाभूतेष्वऽलोलुत्वंमार्द्दवंह्रीरचापलम् । तेजःक्षमाधृतिःशौचमद्रोहोनातिमानिता ॥ ३६ ॥
वाक्यसं० । बन्धाद्यर्थेषुमानंतुश्रुतिःस्मृतिस्तथास्तिच । संगृह्णाम्यद्यतेमत्तःसावधानमनाःशृणु ॥ ३७ ॥ श्रुतिः । वन्धोहिवास
नावन्धोमोक्षःस्याद्वासनाक्षयः । भोगेच्छामात्रकोवन्धस्तत्त्यागोमोक्षउच्यते ॥ ३८ ॥ शिवगीतासु । मोक्षस्यनहिवासोस्तिन
ग्रामान्तरमेववा । अज्ञानहृदयग्रन्थिनाशोमोक्षइतिस्मृतः ॥ ३९ ॥ वाक्यसंग्रहकृद्वा० । यस्मान्मोक्षसुखादन्यत्सुखंक्वापिनवि
द्यते । तस्मान्मुमुक्षुणाभाव्यंनैवभोगेच्छुनाक्वचित् ॥ ४० ॥ मुमुक्षुःसंश्चबोधाययतेतब्रह्मणःसुधीः । अन्यथाजन्ममृत्यूनुर्निवर्त्तेतां
नकर्हिचित् ॥ ४१ ॥ तस्माज्ज्ञावात्मकस्येहनित्यमोक्षसुखस्यया । इच्छाऽधिकारिणःसापिविशेषणंहिसंभवेत् ॥ ४२ ॥ ननुभावस्वरू
पस्ययेच्छानित्यसुखस्यवै । सातुरागात्मकत्वेनप्रवृत्तिंजनयेद्ध्रुवम् ॥ ४३ ॥ रागात्प्रवर्त्तमानस्यसंसारःप्रत्यताऽऽपतेत् । तस्मात्ता
दृक्सुखेच्छास्यान्नाधिकारिविशेषणम् ॥ ४४ ॥ नभावश्चसुखंतस्मात्किंतुदुःखात्ययोहितत् । लोकेरोगादिदुःखस्याऽभावेहिसुखतो

त्मकंन्यासंस्फुटमाहस्मृतिस्तथा ॥ २३ ॥ स्मृतिः। भैक्षचर्यंततःप्राहुस्ततस्तद्धर्मचारिणः। तथावैश्यस्यराजेन्द्रराजपुत्रस्यचैव
हि ॥ २४ ॥ वाक्यसं०। त्यागमात्रात्मकेन्यासेशूद्रस्त्र्योरधिकारिता। भाष्यकृतोप्यभिप्रेतेतिवार्त्तिककृदुक्तवान् ॥ २५ ॥ वा
र्त्तिककृद्वा०। विद्याङ्गतत्फलात्मानंगार्गीविदुरयोरपि। स्त्रीशूद्रयोर्भाष्यकारःसंन्यासमनुमन्यते ॥२६ ॥ वाक्यसं०। ननुलि
ङ्गंविनान्यासोनन्यासइतिचेदसत्। तेनविनापियस्माद्वैन्यासोभाष्यकृतेरितः ॥ २७ ॥ भाष्यकृद्वा०। हठाऽभ्यासोहिसंन्यासो
नैवकाषायवाससा। माहंदेहोहमात्मेतिनिश्चयोन्यासलक्षणम् ॥ २८ ॥ वाक्यसं०। एषणात्रयसंन्यासस्तुल्योहिलिंग्यऽलिङ्गि
नोः। सएवमोक्षहेतुश्चत्यागेनैकइतिश्रुतेः ॥ २९ ॥ स्वदेहस्योपभोगायलोकोपकृतयेतथा। दण्डादीन्ब्राह्मणस्यैवमुक्तवतोश्रु
तिःस्वयम् ॥ ३० ॥ मनुः। अलिङ्गीलिङ्गिवेषेणयोवृत्तिमुपजीवति। सलिङ्गिनांहरत्येनस्तिर्यग्योनौचजायते ॥ ३१ ॥ वाक्य
सं०। लिङ्गधृताऽवयोग्यानांवृत्तिंलिङ्गेनकुर्वताम्। इत्यब्रवीन्मनुर्दोषंकषायादिप्रधारणे ॥ ३२ ॥ तस्माद्विप्रेतरैर्वर्णैर्धार्य्यंलिं
गनवृत्तये। स्वमोक्षार्थंतुसंत्यागस्तैःकार्योविदुरादिवत् ॥ ३३ ॥ जातिनिबन्धनोन्यासेऽधिकारएवमीरितः। गुणनिबन्धनोप्य

साधिकारोऽत्रनिरूप्यते ॥ ३४ ॥ निष्कामत्वमकोपत्वंक्षमासत्यंशमादयः । यस्मिन्नित्यंहिवर्त्तंतेससंन्यासेऽधिकारवान् ॥ ३५ ॥
लिङ्गसहकृतेन्यासेलिङ्गेनरहितेतथा । विविदिषाह्वयेतस्मिन्विद्वन्न्यासेतथैवच ॥ ३६ ॥ ऋतेकामादिसंत्यागान्नाऽधिकारोऽ
स्तिकस्यचित् । कामादीन्हिततस्त्यक्त्वासंन्यस्येत्कुशलोनरः ॥ ३७ ॥ इत्युक्तंवेदसारज्ञैर्वृहस्पत्यादिभिःस्फुटम् । तत्स्मृतीश्चलि
खाम्यत्रन्यासाऽधिकारिवोधिकाः ॥ ३८ ॥ वृहस्पतिस्मृ० । यस्मिन्कामाःप्रविशंतिविषयेभ्योऽपसंहृताः । विषयान्नपुनर्यांति
सकैवल्याश्रमेवसेत् ॥ ३९ ॥ यस्मिन्क्रोधःशमंयातिविफलःसम्यगुत्थितः । आकाशेऽसिर्यथाक्षिप्तःस० ॥ ४० ॥ अतीतान्नस्म
रेद्भोगान्नतथानागतानपि । प्राप्तांश्चनाभिनन्देद्यःस० ॥ ४१ ॥ श्रद्धाध्यानंतपःशौचंयस्यवित्तंचतुष्टयम् । रमणंचाद्वितीयस्यस०
॥ ४२ ॥ अन्तःस्थानीन्द्रियाण्यंतर्वैहिष्टान्विषयान्वहिः ॥ शक्नोतियःसदाकर्त्तुंस० ॥ ४३ ॥ भारतवा० । यस्मिन्वाचःप्रविशं
तिकूपेन्यस्ताद्विपाइव ॥ नवक्तारंपुनर्यान्तिसकै० ॥ ४४ ॥ यस्मिन्क्षांतिःशमःशौचंसत्यंसंतोषआर्ज्जवं । अकिंचनमदंभश्चस०
॥ ४५ ॥ वशिष्ठस्मृ० । प्राणेगतेयथादेहःसुखंदुःखंनविन्दति ॥ तथाचेत्प्राणयुक्तोपिसकै० ॥ ४६ ॥ व्यासस्मृ० । ब्रह्मचारीगृ

ह्रस्थोवावानप्रस्थोऽथवापुनः। विरक्तःसर्वकामेभ्यःपारिव्राज्यंसमाश्रयेत्॥ ४७ ॥ वाक्यसंग्रहकृद्दा ०। विरागस्यविभागेनसंन्या
सस्यापिभिन्नता॥ जीवन्मुक्तिविवेकेवैविद्यारण्यैःप्रदर्शिता॥ ४८ ॥ जीवन्मुक्तिविवेकवा ०। संन्यासहेतुर्वैराग्यंयदहर्विरजे
त्तदा॥ प्रव्रजेदितिवेदोक्तेस्तद्भेदस्तुपुराणतः॥ ४९ ॥ विरक्तिर्द्विविधाप्रोक्तातीव्रातीव्रतरेतिच। सत्यामेवतुतीव्रायांन्यसे
द्योगीकुटीचके॥ ५० ॥ शक्तोवहूदकेतीव्रतरायांहंससंज्ञिते॥ मुमुक्षुःपरमहंसेसाक्षाद्विज्ञानसाधने॥ ५१ ॥ अस्मिन्जन्मनि
माभूवन्पुत्रदारादयोमम॥ इतियासुस्थिराबुद्धिःसावैराग्यस्यतीव्रता॥ ५२ ॥ पुनरावृत्तिसहितोलोकोमेमास्तुकश्चन॥ इति
तीव्रतरत्वंस्यान्मन्देन्यासोनकोपिहि॥ ५३ ॥ पुत्रदारधनादीनांनाशेतात्कालिकीमतिः॥ धिक्संसारमितीदृक्स्याद्विरक्तेर्मंद
ताहिसा॥ ५४ ॥ याचाद्यशक्तिशक्तिभ्यांतीव्रेन्यासद्वयंभवेत्। कुटीचकोवहूदश्चेत्युभावेतौत्रिदण्डिनौ॥ ५५ ॥ द्वयंतीव्रतरेब्रह्म
लोकमोक्षविभेदतः॥ तल्लोकेतत्त्वविद्धंसोलोकेस्मिन्परहंसकः॥ ५६ ॥ वाक्यसं ०। पारिव्राज्याभिधेयायामुपनिषद्युदीरिता।
नियमायद्दिभिक्षूणांदर्शयाम्यद्यतानिह॥ ५७ ॥ कुटीचकस्त्रिवारंवैस्नानंकुर्वीतयत्नतः॥ वहूदकोद्विवारंचैकवारंतत्तुहंस

॥ १२ ॥ त्र्येकदण्डकषायाणिन्यासलिङ्गानियानिवै । तेष्वधिकृतिमाहुःस्मविप्रस्यश्रुतयःस्फुटम् ॥ १३ ॥ निर्वेदंब्राह्मणोह्याया
त्प्रव्रजेद्ब्राह्मणोगृहात् । व्युत्थायब्राह्मणाभिक्षाचर्यमित्यादिकाःकिल ॥ १४ ॥ क्षत्रियादित्रयाणांतुनास्तिलिङ्गाधिकारिता ।
स्मृतयश्चतथाप्राहुर्लिङ्गेविप्राधिकारिताम् ॥ १५ ॥ अत्रिस्मृ० । कषायंब्राह्मणस्योक्तंनाऽन्यवर्णस्यकस्यचित् । मोक्षाश्रमेसदा
प्रोक्तंधातुरक्तंतुयोगिनाम् ॥ १६ ॥ विष्णुस्मृ० । मुखजानामयंधर्मोवैष्णवंलिङ्गधारणम् । बाहुजातोरुजातानांनायंधर्मोविधी
यते ॥ १७ ॥ याज्ञवल्क्यस्मृ० । चत्वारोब्राह्मणस्योक्ताःस्वाश्रमाःश्रुतिचोदिताः । क्षत्रियस्यत्रयःप्रोक्ताद्वावेकोवैश्यशूद्रयोः
॥ १८ ॥ वाक्यसंग्रहकृद्वा० । एवंलिङ्गाऽधिकार्युक्तोऽलिङ्गस्याप्यधुनोच्यते । क्षत्रियवैश्यशूद्राद्यास्त्यागमात्राऽधिकारिणः ॥ १९ ॥
तेषांपुण्यविपाकेनविविदिषोद्भवेद्यदि । जन्मापादककर्मादेस्त्यागःकार्योपितैस्तदा ॥ २० ॥ त्यागमात्रात्मकोन्यासःशूद्रस्यापि
समीरितः । प्रव्राज्योपनिषच्छ्रुत्यात्क्षत्रियादेस्तदाकिमु ॥ २१ ॥ श्रुतिः । वैराग्यमासाद्यतुपापयोनिःशूद्रोपिसंन्यासमुपेत्यमोक्षं ।
प्राप्नोतिपापंतुविधूयविप्रःसंन्यासमेत्यननुमुच्यतेवै ॥ २२ ॥ वाक्यसं० । चतुर्णामपिवर्णानांशांत्यादिगुणधारिणाम् । त्यागमात्रा

 यतिः ॥ वस्त्रंचधारयेज्जीर्णंसमर्थोननवंग्रहेत् ॥ ७१ ॥ एकरात्रंवसेद्ग्रामेनगरेपञ्चरात्रकम् । वर्षाभ्योन्यत्रनासीतैकत्रेत्युक्तं
 कठश्रुतौ ॥ ७२ ॥ आसनशयनेभूमौखट्वायांनकदाचन । कुर्याद्यतिरितिप्रोक्तमारुण्युपनिषद्यपि ॥ ७३ ॥ भिक्षुश्चेद्योहिरा
गेणहेमपश्यतिमूढधीः । सब्रह्महाभवेत्तद्वत्तत्स्पृष्टापौष्कसोभवेत् ॥ ७४ ॥ हिरण्यसंग्रहीभिक्षुर्भवेदेवात्महातथा । आत्म
हाचातिपापीतिप्रसिद्धंलोकवेदयोः ॥ ७५ ॥ तस्मादेतत्त्रयंत्याज्यंस्वस्यमोक्षायभिक्षुणा । इतिपरमहंसाख्योपनिषदपिसंज
गौ ॥ ७६ ॥ अखिलसंहिताख्यायामुपनिषद्युदीरिताः । धर्मायेचापिभिक्षूणांदर्शयाम्यद्यतानिह ॥ ७७ ॥ देवर्षिर्नारदो
भ्येत्यब्रह्माणंपरिपृष्टवान् । भगवन्ब्रूहिभिक्षूणांनियमान्कृपयैवमे ॥ ७८ ॥ एवंपृष्टःप्रजाधीशःप्राहत्वंशृणुनारद । भिक्षुर्नस्ना
टनेकुर्यात्स्वनिरोधादिकंक्वचित् ॥ ७९ ॥ ननद्युत्तरणंकुर्याद्धस्ताभ्यांचक्वचिद्यतिः । नाग्निसेवांप्रकुर्वीतनैकत्राशनमाचरे
त् ॥ ८० ॥ भिक्षयाहृतमन्नंचसमश्नीयाद्यतिःसदा । मेदोवृद्धिंनकुर्वीतकुर्याच्चप्राणरक्षणम् ॥ ८१ ॥ त्यजेद्रुधिरवच्चाज्यमे
कस्यान्नंचमांसवत् । चन्दनादिप्रलेपंतुविष्ठालेपमिवत्यजेत् ॥ ८२ ॥ केवलंलवणंभिक्षुरन्त्यजवत्परित्यजेत् । स्त्रीसंगमिवचा

ऽभ्यङ्गंवस्त्रंचोच्छिष्टपात्रवत् ॥ ८३ ॥ मूत्रवच्चपरित्याज्यंभिक्षुणोष्णोदकंसदा । मलवच्चतनोःस्पर्शंवर्जयेदात्मवान्यतिः ॥ ८४ ॥
देशोज्ञातचरस्त्याज्यश्चाण्डालगृहवीथिवत् । नारीचाहिरिवत्याज्याभिक्षुणास्वहितार्थिना ॥ ८५ ॥ सुवर्णंविषवत्त्याज्यंसभास्थ
लंश्मशानवत् ॥ कुंभीपाकमिवत्याज्याराजधानीचभिक्षुणा ॥ ८६ ॥ भिक्षान्नांहण्डिकादिस्थमन्नंयथाद्विजादिभिः । संत्यज्य
तेतथाभिक्षुर्मित्रान्नंचसदात्यजेत् ॥ ८७ ॥ दर्शनंस्वान्यदेवस्यत्यक्त्वाथलोकरञ्जनं । विहायैवस्वदेशंचकुर्यात्स्वरूपचिन्तनम् ॥
८८ ॥ चिन्तयन्स्वस्वरूपंचत्यक्त्वाबन्धुभवस्थलम् । कारागृहविनिर्मुक्तचोरवद्दूरतोवसेत् ॥ ८९ ॥ पट्टणेचीर्णराचार्णाच्चेचेष
ड्रात्रकंवसेत् । तीर्थेचसप्तरात्रार्णेवंचरेदनिकेतकः ॥ ९० ॥ मात्सर्यादींश्चसंदग्ध्वासदैकाकीयतिश्चरेत् । पट्टणनगरग्रामा
न्नकुर्वीतकदाचन ॥ ९१ ॥ द्वाभ्यांग्रामःसमाख्यातस्त्रिभिश्चपट्टणंभवेत् । चतुर्भिर्नगरंतस्मात्चयंत्यक्त्वाचरेद्यतिः ॥ ९२ ॥
ननुन्यासस्यधर्माणांस्यादुदाहरणेनकिम् । सतिकर्माधिकारेनुर्यतोनन्याससंभवः ॥ ९३ ॥ कुर्वन्नेवेहकर्माणिजिजीविषेच्छतं
समाः । जाग्रत्स्वित्यादिवाक्येषुन्यासःस्याज्जीवतःकथम् ॥ ९४ ॥ मैवंश्रुत्यादिवाक्यैर्हिव्यासस्सूत्रेणवैतथा । संन्यासाश्रमसङ्गा

वोपिलभ्यतेयतःस्फटम् ॥ ९५ ॥ उदाहराम्यहंचेहश्रुत्यादिवचनानिवै । न्यासाऽसंभवशङ्कायाविच्छित्यैतानिसंशृणु ॥ ९६ ॥
ब्रह्मोपनिषच्छ्रुतिः । सशिखंवपनंकृत्वाबहिःसूत्रंत्यजेद्बुधः । यदक्षरंपरंब्रह्मतत्सूत्रमितिधारयेत् ॥ ९७ ॥ वाक्यसं० । द्वावेवे
तिश्रुतिर्न्यासंप्रव्रजेदितिचाहृतम् । इत्याद्याःश्रुतयःसंतिस्मृतीश्चापिशृणुष्वभो ॥ ९८ ॥ अंगिरसस्मृ० । संन्यसेद्ब्रह्मचर्येणसं
न्यसेद्वागृहादपि । वनाद्वासंन्यसेद्विद्वानातुरोऽथवादुःखितः ॥ ९९ ॥ यमस्मृती । संन्यस्तंमेजगन्नाथपाहिमांमधुसूदन । त्रा
हिमांसर्वदेवेशवासुदेवसनातन ॥ १०० ॥ अहंसर्वाभयंदत्वाभूतानांपरमेश्वर । युष्मच्छरणमापन्नस्त्राहिमांपुरुषोत्तम ॥ १ ॥
लिङ्गपुराणवा० । निःकृत्यसशिखान्केशानुपवीतंविसृज्यच । पञ्चभिर्जुहुयादप्सुभूःस्वाहेतिचवाक्क्रमात् ॥ २ ॥ वाक्यसं० ।
ऊर्द्ध्वरेतस्सुशब्देहीतिसूत्रेणचसूत्रकृत् । संन्यासस्यापिसद्भावंभगवान्स्फुटमुक्तवान् ॥ ३ ॥ कुर्वन्नेवेतिमन्त्रस्ययावज्जीवमि
तिश्रुतेः । तर्हित्वयागतिर्वाच्येतिचेच्छृणुवदामिताम् ॥ ४ ॥ कुर्वन्नित्यादिवाक्यान्यऽविरक्तविषयाणिभो । वर्णाश्चचियवैश्यौ
वातेषांचविषयौतयोः ॥ ५ ॥ लिंगेऽनधिकृतत्वाद्वैकषायमितिचस्मृतेः । बृहदारण्यभाष्येपिभाष्यकृतातथेरणात् ॥ ६ ॥

कः ॥ ५८ ॥ स्नानंपरमहंसस्यमानसमुदितंतथा ॥ तुर्य्यातीतस्यतद्भस्मअवधूतस्यवायुना ॥ ५९ ॥ कुटीचकयतेःक्षौरमृतौ
बहूदकस्यतत् ॥ ऋतुद्वयेचहंसस्यक्षौरंनचविधीयते ॥ ६० ॥ नापितत्परहंसस्याऽस्तिचेत्तदयनेद्वयोः ॥ तुर्य्यातीतस्यनक्षौरम
वधूतस्यतन्नच ॥ ६१ ॥ कुटीचकस्यचैकान्नंमाधुकरीबहूदकः । हंसपरमहंसौतूभौकरयाचकौश्रुतौ ॥ ६२ ॥ तुर्य्याऽतीतश्च
भिक्षायैगोवन्मुखंविदारयेत् ॥ अवधूतस्यवृत्तिस्तुवेदेनाजगरीस्मृता ॥ ६३ ॥ कुटीचकस्यसाटीद्वेबहूदस्यैकसाटिका ॥ तस्याऽर्द्धं
तुहंसस्यपरहंसोदिगम्बरः ॥ ६४ ॥ यद्वापरमहंसस्यकौपीनैकस्यसंग्रहः । जातरूपधरत्वंतुतुर्य्यातीतावधूतयोः ॥ ६५ ॥
कुटीचकादितुर्य्याणांनान्योपदेशयोग्यता । तुर्य्यातीतोऽवधूतश्चकुर्य्यादऽन्योपदेशनम् ॥ ६६ ॥ कुटीचकोबहूदश्चवेदान्तानां
पुनःपुनः । कुर्य्याद्धिश्रवणंनित्यंब्रह्मज्ञानाभिवाञ्छया ॥ ६७ ॥ हंसःपरमहंसश्चकुर्वीतमननंमुहुः । तुर्य्यातीतोवधूतश्चनिदि
ध्यासनमाचरेत् ॥ ६८ ॥ कुटीचकादिभिःषड्भिःकार्यमात्मानुचिन्तनम् । श्रेष्ठस्त्वेषांहिविज्ञेयःसदोत्तरोत्तरोयतिः ॥ ६९ ॥
उपनिषत्स्वथान्यासुयतिधर्मायईरिताः । संक्षेपात्तानपीहाहंगृह्णामितेषुवृत्तये ॥ ७० ॥ कामादीनांनिरासायसदाकृशोभवे

यीस्याद्देवागारेषुवास्वपेत्। नात्यर्थंसुखदुःखाभ्यांशरीरमुपतापयेत्॥१८॥ अचिस्मृ०। अहिंसासत्यमस्तेयंब्रह्मचर्याऽपरिग्रहौ।
भावशुद्धिर्हरौभक्तिःसंतोषःशौचमार्जवम्॥ १९ ॥ आहारशुद्धिर्वैराग्यंसंप्रसादोदयानृणाम्। अस्नेहोगुरुशुश्रूषाश्रद्धाशांति
र्दमःशमः ॥ २० ॥ ह्रीस्तपोज्ञानविज्ञानंयोगोलक्ष्याशनंधृतिः। अदीनत्वमनुद्धर्षोब्रह्मधीःसमदर्शनम्॥ २१ ॥ एषस्वधर्मोव्या
ख्यातोयतीनांमुक्तिमिच्छताम्। अभ्युत्थानंप्रियालापंगुरुवत्प्रतिपूजनम्॥ २२ ॥ यतीनांवृत्तवृद्धानांस्वीयधर्मेषुवर्त्तिनाम्।
कर्त्तव्यमन्यथायोगीस्वधर्मात्प्रच्युतोभवेत्॥ २३ ॥ छेदभेदोपमर्दंचप्राकारंगृहमाश्रमम्। स्वाहास्वधावषट्कारोविषयाणांच
संनिधिः ॥ २४ ॥ स्तुतिर्निंदाक्रियावादाःपरमर्मावघाटनम्। तृष्णाक्रोधोऽनृतंमायालोभमोहौप्रियाप्रियौ॥२५॥ शिल्पंव्याख्या
नियोगश्चकामोरागःपरिग्रहः। अहंकारोममत्वंचचिकित्साधर्मसाहसम्॥ २६॥ प्रायश्चित्तंप्रदानंचसंचौषधमथाऽऽशिषः।
एकान्नंमदमात्सर्यंगंधपुष्पविभूषणम्॥ २७ ॥ तांबूलाभ्यंजनेक्रीडाभोगकांक्षारसायनम्। कत्थनंकुत्सनंस्वस्तिज्योतिषंक्रय
विक्रयम्॥ २८ ॥ क्रियाकर्मविवादांश्चगुरुवाक्यादिलंघनम्। संधिश्चविग्रहोयानंमंचकःशुक्लवाससी ॥ २९ ॥ शुक्रोत्सर्गो

दिवास्वापोभिक्षाधारस्तुतैजसः। विषंचैवायुधंवीजंहिंसातैलादिमैथुनम् ॥ ३० ॥ प्रतिषिद्धानिचैतानिसेवमानोव्रजत्यधः।
भैक्षदेशनृपम्नातिपुत्रमित्रादियोषिताम् ॥ ३१ ॥ उपचारकथास्त्वन्यामनसापिनचिंतयेत्। आगच्छ गच्छतिष्ठेतिस्वागतंसुहृ
दोपिवा। संमानंचनप्रब्रूयान्मुनिर्मोक्षपरायणः ॥ ३२ ॥ मेधातिथिस्मृ०। आसनंपात्रलोपश्चसंचयःशिष्यसंग्रहः। दिवा
स्वापोवृथालापोयतेर्बंधकराणिषट् ॥ ३३ ॥ एकाहात्परतोग्रामेपंचाहात्परतःपुरे। वर्षाभ्योन्यत्रयत्स्थानमासनंतदुदाहृ
तम् ॥ ३४ ॥ उक्ताऽलाब्वादिपात्राणामेकस्यापिनसंग्रहः। भिक्षोर्भैक्षभुजश्चापिपात्रलोपःसउच्यते ॥ ३५ ॥ शुश्रूषालाभपूजार्थं
यशोऽर्थंवापरिग्रहः। शिष्याणांनतुकारुण्यात्सज्ञेयःशिष्यसंग्रहः ॥ ३६ ॥ विद्यादिनंप्रकाशत्वादविद्याराचिरुच्यते। विद्या
ऽभ्यासेप्रमादोयः सदिवास्वापउच्यते ॥ ३७ ॥ अध्यात्मिकींकथांमुक्त्वाभैक्षचर्यांसुरस्तुतिम्। अनुग्रहंपरिप्रश्नान्वृथालापःसउ
च्यते ॥ ३८ ॥ स्थावरंजंगमंबीजंतैजसंविषमायुधं। षडेतानिनगृह्णीयाद्यतिर्मूत्रपुरीषवत् ॥ ३९ ॥ स्मृती। मधुमांसंचमद्यं
चतांबूलंतैलमौषधम्। वर्ज्यान्यष्टौयतेर्दूरात्तथाकांतांचकांचनं ॥ ४० ॥ नशिष्याननुबध्नीतमठान्नारभेतक्वचित्। नव्याख्या

मुपयुञ्जीतनसेवेतराजमन्दिरं ॥ ४१ ॥ विष्णुस्मृ०। वानप्रस्थगृहस्थाभ्यांप्रीतिंयत्नेनवर्जयेत्। ग्रामांतेनिर्जनेदेशेनित्यंकिल
निकेतनः ॥ ४२ ॥ वृद्धानामातुराणांचभीरूणांसङ्गवर्जितम्। ग्रामेवाथपुरेवापिवासोनैकत्रदुष्यति ॥ ४३ ॥ अङ्गिराः। नती
र्थसेवीचात्यंतोनोपवासपरोयतिः। नचाऽध्यापनशीलःस्यान्नव्याख्यानपरोभवेत् ॥ ४४ ॥ प्रतिग्रहंनगृह्णीयान्नचैवान्यंप्रदापयेत्।
प्रेरयेद्वातथाभिक्षुर्नस्वप्नेपिकथंचन ॥ ४५ ॥ क्रतुः। दासींदासंगृहंयानंगोभूधान्यंधनंरसान्। प्रतिगृह्ययतिर्ग्रामंहन्यात्कुलश्च
तत्त्रयं ॥ ४६ ॥ आविकंपट्टकंवासस्तूलिकांमंचकंमधु। शुक्लवस्त्रंचयानंचतांबूलंस्त्रियमेवच। प्रतिगृह्यकुलंहन्यात्प्रतिगृह्णाति
यस्यच ॥ ४७ ॥ पुष्पशाखापल्लवंवाफलमूलतृणादिकम्। भंज्याद्वियस्तुसंन्यासीनरकेपततिध्रुवम् ॥ ४८ ॥ अङ्गिराः। क्षेत्रं
गावोहिरण्यंचयतेर्यस्यपरिग्रहः। तादृशंकल्मषंदृष्ट्वासचैलोजलमाविशेत् ॥ ४९ ॥ जावालः। अन्नदानपरोभिक्षुर्वस्त्रादीनां
चसंग्रही। उभौतौमंदवुद्धित्वात्पूतिनरकशायिनौ ॥ ५० ॥ मनुः। आविकांत्वधिकंवस्त्रंतूल्यंतूलिपटींतथा। प्रतिगृह्यय
तिश्चैतान्पततेनात्रसंशयः ॥ ५१ ॥ व्यासः। क्रोधलोभपरोनित्यंनिद्राऽऽलस्यपरस्तथा। विषादीच्छेश्वरश्चैवप्रेयसोभ्रश्यतेद्विजः

जायमानश्रुतिरेवमृणानीतिस्मृतिस्तथा। गृहस्थत्वेनयोजातस्तद्विषयेतुतेह्युभे ॥ ७ ॥ स्वाध्यायश्राद्धदानाद्यैर्ऋणाऽपाकरणं
स्मृतम्। तानिकर्त्तुंनशक्नोतिजातमात्रोहिकश्चन ॥ ८ ॥ एवंसंन्याससद्भावःसम्यगत्रनिरूपितः। तद्धर्मकथनाऽऽक्षेपोवृथाऽ
तःपूर्वपक्षिणः ॥ ९ ॥ श्रुत्यर्थसंग्रहेणप्राग्यतिधर्माःप्रदर्शिताः। श्रुतिस्मृतिग्रहेणेहवक्ष्यंतेतेपुनस्तथा ॥ १० ॥ विविदिषोर्यते
र्धर्मायैर्वाक्यैःप्रतिपादिताः। प्रायेणतानिवाक्यानिग्रहीष्यामीहविस्तरात् ॥ ११ ॥ धर्मबोधंविनानास्तियतेःस्वधर्मसेवनम्। तेन
विनानमोक्षःस्यात्तस्मात्सेव्यायमादयः ॥ १२ ॥ यमादयोयतेर्धर्माःश्रुत्यादिभिःसमीरिताः। यमानिवृत्तिरूपाःस्युःप्रवृत्त्यानियमा
युताः ॥ १३ ॥ यमादशविधाःप्रोक्तानियमाश्चदशस्मृताः। याज्ञवल्क्यस्मृतौतावत्तानत्रानुवदाम्यहम् ॥ १४ ॥ याज्ञवल्क्यस्मृ०।
अहिंसासत्यमस्तेयंब्रह्मचर्यंदयाऽऽर्जवम्। क्षमाधृतिर्मिताहारःशौचंत्वेतेयमादश ॥ १५ ॥ तपःसंतोषमास्तिक्यंदानमीश्वरपूज
नम्। सिद्धांतश्रवणंचैवह्रीर्मतिश्चजपोहुतम्। एतेचनियमाःप्रोक्तायाज्ञवल्क्येनयोगिना ॥ १६ ॥ सनत्सुजातीयोपनिषच्छ्रुतिः।
सर्वभूतसुहृच्छांतःसर्वभूताऽभयप्रदः। भयस्थानानिसंचिंत्यवर्जयीतविचक्षणः ॥ १७ ॥ कठश्रुत्युपनिषच्छ्रुतिः०। नदीपुलिनशा

मेकंपरिग्रहः। यतेःपरमहंसस्यनाधिकंतुविधीयते ॥ ६४ ॥ यदिवाकुरुतेरागादधिकस्यपरिग्रहम्। नरकंरौरवंगत्वातिर्य
ग्योनिषुजायते ॥ ६५ ॥ विशीर्णान्यमलान्येवचैलानिग्रथितानितु। कृत्वाकन्थांवहिर्वासोधारयेद्धातुरञ्जिताम् ॥ ६६ ॥ जावा
लस्मृ०। भूतानांप्रियकारीस्यान्नपरद्रोहकर्मधीः। नरावशीकृतायेनतेनदेवावशीकृताः ॥ ६७ ॥ अजिह्वःषंडकःपंगुरंधोव
धिरएवच। मुग्धश्चमुच्यतेभिक्षुःषड्भिरेतैर्नसंशयः ॥ ६८ ॥ इदमिष्टमिदंनेतियोश्नन्नपिनसज्जते। हितंसत्यंप्रियंवक्तितमजि
ह्वंप्रचक्षते ॥ ६९ ॥ अद्यजातांयथानारींतथाषोडषवार्षिकीं। शतवर्षांचयोदृष्ट्वानिर्विकारःसषंडकः ॥ ७० ॥ भिक्षार्थम
टनंयस्यविण्मूत्रकरणायच। योजनान्नपरंयातिसर्वथापंगुरेवसः ॥ ७१ ॥ तिष्ठतोव्रजतोवापियस्यचक्षुर्नदूरगम्। चतुर्युगांभु
वंत्यक्त्वापरिव्राट्सोंधउच्यते ॥ ७२ ॥ हितंमितंमनोहारिवचःशोकावहंचयत्। श्रुत्वापिनशृणोतियोवधिरःसप्रकीर्त्तितः
॥ ७३ ॥ सान्निध्येविषयाणांचसमर्थोऽविकलेन्द्रियः। सुप्तवद्वर्त्ततेनित्यंसभिक्षुर्मुग्धउच्यते ॥ ७४ ॥ रथ्यायांवहुवस्त्राणिभि
क्षासर्वत्रलभ्यते। भूमिःशय्यासुविस्तीर्णायतयःकेनदुःखिताः ॥ ७५ ॥ दत्ताचेयस्मृतिः। जायाभ्रातृसुतादीनांवंधूनांचशुभा

शुभं। दृष्ट्वाश्रुत्वानकंपेतशोकहर्षौत्यजेद्यतिः ॥ ७६ ॥ शंखस्मृ०। दृष्टाऽनिष्टेषुभोगेषुव्यसनाऽभ्युदयेषुच। उपशांतांवदेद्वाच
मपिवाणैर्हतोभृशम् ॥ ७७ ॥ सत्यांवाचमहिंस्रांचवदेदनपवादिनीं। अतिवादांस्तितिक्षेतअनृशंसामपैशुनाम् ॥ ७८ ॥
पराशर०। ब्रह्मचर्यमहिंसाचसत्यमस्तेयमार्ज्जवं। वेदांतश्रवणंध्यानंभिक्षोःकार्याणिनित्यशः ॥ ७९ ॥ वृहस्पतिः। नैवाददी
तपाथेयंयतिःकिंचिदनापदि। कथमापत्सुगृह्णीयाद्यावदन्नायंभुज्यते ॥ ८० ॥ देवल०। आददीतप्रवृत्तेभ्यःसाधुभ्योधर्मसा
धनम्। नाददीतनिवृत्तेभ्यःप्रमादेनापिकथञ्चन ॥ ८१ ॥ यतिधर्मसमुच्चये। परमापद्गतेनापिनकार्यःस्तेयअल्पकः। स्तेयाद
प्यधिकःकश्चिन्नास्त्यऽधर्मइतिस्मृतः ॥ ८२ ॥ ब्रह्मा। दशव्रतान्यनुष्ठाययतिःकल्याणमश्नुते। तेषामेवाननुष्ठानान्नरकंससम
श्नुते ॥ ८३ ॥ दशव्रतानिसर्वेषांयतीनांविहितानिच। अहिंसासत्यमस्तेयब्रह्मचर्याऽपरिग्रहाः ॥ ८४ ॥ अक्रोधोगुरुशुश्रूषा
शौचंदुर्भुक्तिवर्ज्जनम्। वाङ्मनःकायचेष्टासुप्रमादस्यचवर्ज्जनम् ॥ ८५ ॥ वर्णाश्रमाणांधर्मोहिदेवस्थानेषुकारणम्। लिंगाऽ
भावात्तुकैवल्यमितिब्रह्मानुशासनम् ॥ ८६ ॥ नाऽत्यक्त्वासुखमाप्नोतिनाऽत्यक्त्वाविंदतेपरम्। नाऽत्यक्त्वाभयंशेतेसर्वंत्यक्त्वासुखीभ

वेत् ॥ ८७ ॥ मेधातिथिः । नसंभाषेत्स्त्रियंकांचित्पूर्वदृष्टांनचस्मरेत् । कथांचवर्जयेत्तासांनपश्येल्लिखितामपि ॥ ८८ ॥ एतच्चतुष्टयंमोहात्स्त्रीणामाचरतोयतेः । चित्तंविक्रियतेऽवश्यंतद्विकारात्प्रणश्यति ॥ ८९ ॥ सुजीर्णोपिसुजीर्णासुविद्वान्स्त्रीषुनविश्वसेत् । सुजीर्णास्वपिकंथासुसज्जतेजीर्णमंबरम् ॥ ९० ॥ भागवते । स्त्रीणांतत्संगिनांसंगंत्यक्त्वादूरतआत्मवान् । क्षेमेविविक्तआसीनश्चिंतयेन्मामतंद्रितः ॥ ९१ ॥ वायुपुराणे । यस्तुप्रव्रजितोभूत्वापुनःसेवेतमैथुनं । षष्ठिवर्षसहस्राणिविष्ठायांजायतेक्रिमिः ॥ ९२ ॥ शून्यागारेषुघोरेषुआखुर्भवतिदारुणः । सतिर्यक्स्यात्ततोगृध्रःश्वावैद्वादशवत्सराः ॥ ९३ ॥ खरोविंशतिवर्षाणिदशवर्षाणिशूकरः । अपुष्पोऽफलितोवृक्षोजायतेकंटकान्वितः ॥ ९४ ॥ ततोदावाग्निनादग्धःस्थाणुर्भवतिकामुकः । स्थावराच्चपरिभ्रष्टोयोनिष्वन्यासुगच्छति ॥ ९५ ॥ पूर्णेवर्षसहस्रांतेजायतेब्रह्मराक्षसः । क्षुत्पिपासापरिश्रांतःक्रव्यादोरुधिराशनः ॥ ९६ ॥ क्रमेणलभतेमोक्षंकुलस्योत्सादनेनच । चाण्डालगर्भसंभूतोजायतेनात्रसंशयः ॥ ९७ ॥ आहारशुद्धिर्विनयःशौचमप्रतिकर्मच । सम्यग्दर्शनमित्येवंपंचैवोपव्रतानिच ॥ ९८ ॥ व्यासः । अहिंसासत्यमस्तेयंब्रह्मचर्यंतपःपरं ।

॥ ५२ ॥ यतीनांकांचनंदत्वातांबूलंब्रह्मचारिणां। चौराणामभयंदत्वादातापिनरकंव्रजेत् ॥ ५३ ॥ हारीतः। छेदनेभेदनेपा
केयतिर्यस्तुप्रवर्त्तते। तादृशंकश्मलंदृष्ट्वाप्रेतशौचंविधीयते ॥ ५४ ॥ अङ्गिराः। विधवांकंचुकोपेतांसधवांकंचुकंविना। यतिं
चकंचुकोपेतंदृष्ट्वाचक्षुर्निमीलयेत् ॥ ५५ ॥ चत्वारिपातनीयानियतीनांमनुरब्रवीत्। औषधंसंनिधानंचएकान्नंकांस्यभोज
नम् ॥ ५६ ॥ एकान्नीकांस्यभोजीचभेषजीवस्तुसंग्रही। चत्वारोनरकंयांतिमनुःस्वायंभवोऽब्रवीत् ॥ ५७ ॥ मनुः। वालघ्नां
श्चकृतघ्नांश्चशुद्धानपितुधर्मतः। शरणाऽऽगतहंतृंश्चस्त्रीहंतृंश्चनसंविशेत् ॥ ५८ ॥ भारतेब्राह्मणगीतावा०। अहिंसाब्रह्मचर्यं
चसत्यमार्ज्जवमेवच। अक्रोधश्चानसूयाचदमोनित्यमपैशुनम्। अष्टस्वेतेषुयुक्तःस्याद्व्रतेषुसंयतेन्द्रियः ॥ ५९ ॥ नाददीतपरस्वा
निनगृह्णीयादयाचितः। नकिंचिद्विषयंभुक्तास्पृहयीततस्यवैपुनः॥ ६०॥ नशिल्पजीविकांजीवेद्धिरण्यंनोतकामयेत्। नद्वेष्टा
नोपदेष्टाचभवेदेवंनिरुपस्कृतः॥ ६१॥ आशीर्युक्तानिसर्वाणिहिंसायुक्तानियानिच। लोकसंग्रहधर्मंचनकुर्यान्नचकारयेत्॥६२॥
अनागतंचनध्यायेन्नातीतमनुचिंतयेत्। वर्त्तमानमुपेक्षेतकालाकांक्षीसमाहितः ॥ ६३ ॥ अत्रिः। कौपीनयुगलंकन्थादण्ड

मु० सा० न्नविचरेद्भिक्षुःस्वधर्ममनुपालयन् ॥ ११ ॥ अत्रिः । चतुरोऽयंवसेन्मासान्द्वौवाकौशिकवार्षिकौ । वृद्धाननुक्रमेणैवनमस्कृत्यवि
४५ धानतः ॥ १२ ॥ वृद्धेभ्योनमस्कारानुक्रमश्चयतिधर्मसमुच्चयेदर्शितः । देवंकृष्णंमुनिंव्यासंभाष्यकारंगुरोर्गुरुम् । गुरुंदेवंगणाध्य
क्षंदुर्गांदेवींसरस्वतीम् ॥ १३ ॥ अत्रिः । द्वादश्यांपौर्णमास्यांवाकुर्यात्संकल्पमात्मवित् । अनेनविधिनाभिक्षुराषाढ्यांसुसमा
हितः ॥ १४ ॥ स्थानाभावाद्व्रजेत्तावद्यावद्भवतिपंचमी । प्रायश्चित्तेनयुज्येतपंचम्यूर्द्ध्वंव्रजेद्यदि ॥ १५ ॥ नाऽसमानसहायेषुनि
वसेद्योगवित्क्वचित् । वसेत्समानशीलेषुसुशीलेषुतपस्विषु ॥ १६ ॥ पितामातास्वसाभ्रातास्नुषाजायासुतस्तथा । ज्ञातिवंधु
सुहृद्वर्गोदुहितातत्सुतादयः ॥ १७ ॥ यस्मिन्देशेवसंत्येतेनतत्रदिवसंवसेत् । द्वेषःशोकोभवेत्तत्ररागहर्षादयोमलाः ॥ १८ ॥
अश्रुपातंयदाकुर्याद्भिक्षुःशोकेनचार्दितः । योजनानांशतंगत्वातदापापात्प्रमुच्यते ॥ १९ ॥ कार्त्तिक्यांवापयित्वातुस्नापयित्वाचि
विक्रमं । परस्परंचसंपूज्यक्षमापयित्वापरस्परम् ॥ २० ॥ आत्मवत्सर्वभूतानिपश्यन्भिक्षुश्चरेन्महीं । अंधवत्कुब्जवच्चापिवधिरो
न्मत्तपिशाचवत् ॥ २१ ॥ नचैकस्मिन्वसेद्ग्रामेनचैकस्मिन्सरित्तटे । शून्यागारेनचैकस्मिन्वसेच्छून्यालयेतथा ॥ २२ ॥ हिम

वद्विंध्ययोर्मध्येख्यातःपुण्यतमःश्रुतौ। देशःसरस्वतीतीरेकरेदायास्तुपश्चिमे ॥ २३ ॥ दग्धंचवह्निनापूर्वंपवित्रीकरणायवै।
योगज्ञानतपोध्यानसिद्ध्यर्थंवैमहात्मनां ॥ २४ ॥ तस्मिन्देशेसदाभिक्षुःस्वधर्मंपरिपालयन्। पर्य्यटेद्वैसदायोगीवीक्षयन्वसुधात
लम् ॥ २५ ॥ नरात्रौनचमध्याह्नेसंध्ययोर्नैवपर्यटेत्। नशून्येनचदुर्गेवाप्राणबाधकरेतथा ॥ २६ ॥ नामगोत्रादिचरणंदेशंवासं
श्रुतंकुलम्। वयोवृत्तंबलंशीलंख्यापयेन्नैवसद्यतिः ॥ २७ ॥ स्कंदपुराणे। गंगाकूलेवसेन्नित्यंभिक्षुर्मोक्षपरायणः। सिद्धंक्षे
त्रंतुविज्ञेयंयावद्धनुशतत्रयम् ॥ २८ ॥ भविष्ये। ब्रह्मादिदेवलोकानांमुक्तेश्चप्राप्तयेनृणां। गंगैवपरमोहेतुःकलिकालेविशेष
तः ॥ २९ ॥ मनुः। संरक्षणार्थंजंतूनांरात्रावहनिवासदा। शरीरस्यात्ययेचैवसमीक्ष्यवसुधांचरेत् ॥ ३० ॥ दृष्टिपूतंन्यसेत्पा
दंवस्त्रपूतंपिवेज्जलं। सत्यपूतांवदेद्वाचंमनःपूतंसमाचरेत् ॥ ३१ ॥ भारते। आत्मोत्कर्षंनमार्गेतपरेषांपरिनिंदया। स्वगुणै
रेवमार्गेतविप्रकर्षंपृथग्जनात् ॥ ३२ ॥ निर्गुणास्त्वेवभूयिष्टमात्मसंभावितानराः। दोषैरन्यान्गुणवतःक्षिपंत्यात्मगुणक्षयात्
॥ ३३ ॥ अब्रुवन्कस्यचिन्निंदामात्मपूजामवर्णयन्। विपश्चिद्गुणसंपन्नःप्राप्नोतिसुमहद्यशः ॥ ३४ ॥ आकाशस्थाध्रुवंयत्रदोषंब्रूयु

र्विपश्चितां। आत्मपूजाऽभिकामावैकोवसेत्तत्रपंडितः ॥ ३५ ॥ मध्यस्थएव तिष्ठेतप्रशंसानिंदयोःसमः। एतत्पवित्रंपरमंपारि
व्राजकआश्रमे ॥ ३६ ॥ प्रत्यक्षेगुणवादीयःपरोक्षेचापिनिंदकः। समानवःश्ववल्लोकेनष्टलोकपराऽवरः ॥ ३७ ॥ तादृग्ज
नशतस्यापियद्ददातिजुहोतिच। परोक्षेणाऽपवादीयस्तन्नाशयतितत्क्षणात् ॥ ३८ ॥ तस्मात्प्राज्ञोनरःसद्यस्तादृशंपापचेत
सं। वर्ज्जयेत्साधुभिर्वर्ज्ज्यंसारमेयामिषंयथा ॥ ३९ ॥ तंस्वकर्माणिकुर्वाणंप्रतिकर्त्तुंयदृच्छति। भस्मकूटइवाऽबुद्धिःखरोरज
सिमज्जति ॥ ४० ॥ क्रतुः। वीजघ्नंतेजसंपात्रंशुक्लोत्सर्गंसितांवरं। निशान्नंचदिवास्वप्नंयतीनांपातनानिषट् ॥ ४१ ॥ वाक्य
संग्रहकृद्वाक्ये। एवंश्रुत्यादिवाक्यानिधर्माणांवोधकानिवै। यतेर्यमप्रधानानांसंगृहीतानिखल्विह ॥ ४२ ॥ अथसंन्यासिधर्मा
णांप्रायेणनियमात्मनां। वोधकान्यृषिवाक्यानिगृह्णामीहसमासतः ॥ ४३ ॥ मेधातिथिः। भिक्षाटनंतपोध्यानंस्नानंशौचंसुरा
र्च्चनं। कर्त्तव्यानिषडेतानियतीनांनृपदंडवत् ॥ ४४ ॥ अथशौचविधिः। मनुः। मूत्रोच्चारसमुत्सर्गंदिवाकुर्यादुदङ्मुखः।
दक्षिणाऽभिमुखोरात्रौसंध्ययोश्चयथादिवा ॥ ४५ ॥ छायायामंधकारेवारात्रावहनिवाद्विजः। यथासुखमुखःकुर्यात्प्राणवाध

क्षमादयाचसंतोषोव्रतान्यस्यविशेषतः ॥ ९९ ॥ याज्ञवल्क्यः। अध्यात्मपुस्तकंविप्रैर्दत्तंगृह्णीतभिक्षुकः। नस्वयंद्रव्यमादायले
खयेद्दोषदर्शनात् ॥ २०० ॥ अत्रिः। मौनंयोगासनंयोगस्तितिक्षैकांतशीलता। निःस्पृहत्वंसमत्वंचसप्तैतान्येकदंडिनः ॥ १ ॥
दक्षः। वैणवेनचिदंडेननचिदंडीतिचोच्यते। अध्यात्मदंडयुक्तोयःसचिदंडीतिकथ्यते ॥ २ ॥ वागादिदंडयुक्तस्तुप्रत्यगा
त्मन्यऽवस्थितः। परेब्रह्मणिलीनोयःसचिदंडीव्यवस्थितः ॥ ३ ॥ वाग्दंडेमौनमातिष्ठेत्कर्मदंडेऽल्पभोजनम्। मानसेतुकृतेदं
डेप्राणायामोविधीयते ॥ ४ ॥ एकोभिक्षुर्यथोक्तःस्याद्द्वितीयंमिथुनंस्मृतम्। त्रयोग्रामःसमाख्यातश्रतऊर्द्ध्वंनगरायते ॥ ५ ॥नगरं
तुनकर्त्तव्यंग्रामोवामिथुनंतथा। एतत्त्रयंप्रकुर्वाणःस्वधर्माच्च्यवतेयतिः ॥ ६ ॥ राजवार्त्तादिवातेषांभिक्षावार्त्तापरस्परं। स्नेह
पैशुन्यमात्सर्य्यंसन्निकर्षात्प्रवर्त्तते ॥७॥ कथाचारेखलेसार्थेपुरेगोष्ठेत्वसद्गृहे। निवसेन्नयतिःषट्सुस्थानेष्वेतेषुकर्हिचित् ॥ ८ ॥
यमः। एकवासाअवासावाएकदृष्टिरलोलुपः। एकएवचरेन्नित्यंवर्षास्वेकत्रसंवसेत् ॥ ९ ॥ जलेजीवाःस्थलेजीवाआकाशेजीव
मालिनि। जीवमालाऽऽकुलेलोकेवर्षास्वेकत्रसंवसेत् ॥ १० ॥ मेधातिथिः। यावद्वर्षत्यऽकालेपियावत्क्लिन्नाचमेदिनी। ताव

मु० सा० के। पंचाऽपानेदशैकस्मिन्नुभयोःसप्तमृत्तिकाः ॥ ५६ ॥ एतच्छौचंगृहस्थस्यद्विगुणंब्रह्मचारिणः। वानप्रस्थस्यत्रिगुणंयतीनां
४७ चचतुर्गुणम्॥५७॥ एतच्छौचमदृष्टार्थंदृष्टार्थंशौचंतुमनुनादर्शितं। मनुः। यावन्नाऽपैत्यऽमेधाऽक्तोगंधलेपश्चतत्कृतः। तावन्मृद्वा
दि रिदेयंस्यात्सर्वासुद्रव्यशुद्धिषु ॥५८॥ देवलः। धर्मविद्दक्षिणंहस्तमधःशौचेनयोजयेत्। तथैववामहस्तेननाभेरूर्द्ध्वंनशोधयेत्। प्रकृ
तिस्थितिरेषास्यात्कारणादुभयक्रिया: ॥५९॥ दक्षः। यद्दिवाविहितंशौचंतदर्द्धंनिशिकीर्त्तितं। तदर्द्धमातुरेप्रोक्तमातुरस्या
र्द्धमध्वनि ॥ ६० ॥ अथदंतधावनविधिः। वृद्धशातातपः। मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः। तस्मात्सर्वप्रयत्नेनभक्षयेद्दंतधा
वनम् ॥ ६१ ॥ विष्णुः। द्वादशांगुलंविप्रेषुकाष्टमाहुर्मनीषिणः। क्षत्रविट्शूद्रजातीनांनवषट्चतुरंगुलम् ॥ ६२ ॥ कंटकिक्षीर
वृक्षोत्थंद्वादशांगुलमव्रणं। कनिष्टाग्रवत्स्थूलंकूर्चाग्रंसत्वगऽपर्वकम् ॥ ६३ ॥ नृसिंहपुराणे। अलाभेदंतकाष्टस्यप्रतिषिद्धेतथा
दिने। अपांद्वादशगंडूषैर्मुखशुद्धिर्भविष्यति ॥ ६४ ॥ निषिद्धदिनानिचस्कंदपुराणेदर्शितानितथाचकाशीखंडे। प्रतिपद्दर्शष
ष्ठीषुनवम्यांरविवासरे। दंतानांकाष्टसंयोगोदहेदाऽऽसप्तमंकुलम् ॥ ६५ ॥ दंतधावनार्थंवर्ज्यानिद्रव्याणिचयाज्ञवल्क्येनो

क्तानि। याज्ञवल्क्यः। इष्टिकालोष्टपाषाणैर्नखैरंगुलिभिस्तथा। मृत्कांचानामिकांगुष्ठौवर्जयेद्दंतधावने ॥ ६६ ॥ अथस्नानवि
धिः। पराशरः। स्नानानिपंचपुण्यानिकीर्त्तितानिमनीषिभिः। आग्नेयंवारुणंब्राह्मंवायव्यंदिव्यमेवच ॥ ६७ ॥ आग्नेयंभस्म
नास्नानमवगाह्यतुवारुणम्। आपोहिष्ठेतिचब्राह्मंवायव्यंगोरजःस्मृतम्॥ ६८ ॥ यत्तुसातपवर्षेणतत्स्नानंदिव्यमुच्यते।
तत्रस्नात्वाचगंगायांस्नातोभवतिमानवः ॥ ६९ ॥ व्यासः। चेतस्रोघटिकाःप्रातररुणोदयउच्यते। यतीनांस्नानकालोयंगंगां
भःसदृशःस्मृतः ॥ ७० ॥ कपिलः। प्रातःस्नानेत्वऽशक्तश्चेत्कापिलंस्नानमाचरेत्। तत्राप्यऽसामर्थ्ययुक्तेमंत्रस्नानंविधीयते ॥ ७१ ॥
नाभेरधःप्रविश्याप्सुकटिंप्रक्षाल्यमृज्जलैः। जलार्द्रकर्प्पटेनांगशोधनंकापिलंस्मृतम्॥ ७२ ॥ सायंप्रातरसामर्थ्येसायमेवाऽथवा
पुनः। परिवर्त्यचकौपीनंमंत्रस्नानंविधीयते ॥ ७३ ॥ पराशरः। चक्षूरोगीशिरोरोगीकंठरोगीकफाऽधिकः। कंठस्नानंप्रकु
र्वीतशिरःस्नानफलंलभेत् ॥ ७४ ॥ स्नानेप्यऽशक्तःस्नायीतनित्यमुष्णेनवारिणा। तैलाऽभ्यंगोनदुष्येतव्रणीनांवातरोगिणाम् ॥
७५ ॥ अथाचमनविधिः। शंखः। दक्षिणंतुकरंकृत्वागोकर्णाऽऽकृतिवत्पुनः। माषमज्जनमात्रास्तुसंगृह्यत्रिःपिबेदपः ॥ ७६ ॥

यतिश्चब्रह्मचारीचनाचमेच्चर्मवारिणा। वानप्रस्थोगृहस्थश्चदैवेपित्र्येचकर्मणि ॥ ७७ ॥ अथाचमननिमित्तानि। मनुः।
सुप्त्वाक्षुत्वाचभुक्त्वाचनिष्ठीव्योक्त्वाऽनृतंवचः। पीत्वाऽपोऽध्येष्यमाणश्चआचमेत्प्रयतोपिसन् ॥ ७८ ॥ शातातपः। दंतलग्नेफले
मूलेअम्युयागाहुतीषुच। स्नेहेसोमेचेक्षुदंडेनैवोच्छिष्टोभवेद्द्विजः ॥ ७९ ॥ स्पृशंतिविंदवःपादौयआचामयतःकरात्। नतै
रुच्छिष्टभावःस्यात्तुल्यास्तेभूमिगैःसह ॥ ८० ॥ अथसुरार्चनविधिः। शौनकः। स्नानंमहेश्वरादिष्टेन्मोक्षमिच्छेज्जनार्दनात्।
प्रणामेदंडवद्भूमौनमस्कारेणचार्चयेत् ॥ ८१ ॥ व्यासः। पक्वंहितुलसीपत्रंशुष्कंपर्युषितंचयत्। आनीयतत्प्रयत्नेनपूजयेत्पुरुषो
त्तमम् ॥ ८२ ॥ भावपुष्पैर्यजेद्योगीवाह्यैर्वाश्रद्धयान्वितः। तदर्थंपुष्पहिंसायांनभवेद्धिंसकःक्वचित् ॥ ८३ ॥ स्कांदपुराणे।
अयमेवपरोधर्मस्त्विदमेवपरंतपः। इदमेवपरंतीर्थंविष्णुपादांबुजंपिबेत् ॥ ८४ ॥ अथप्राणायामविधिः। यमः। द्वादशावर्त्तनं
यत्तुसप्रणवस्यमनोहृदि। प्राणायामोयतेःप्रोक्तःप्राणानायम्योमिति। कूर्मपुराणे। प्राणस्तुदेहजोवायुरायामस्तन्निरोधनम् ॥
८५ ॥ अथजपविधिः। कूर्मपुराणे। जपकालेनभाषेतनान्यानिसेवयेद्बुधः। नकंपयेच्छिरोग्रीवांदंतान्नैवप्रकाशयेत् ॥ ८६ ॥

भयेषुच ॥ ४६ ॥ नमूत्रंपथिकुर्वीतनभस्मनिनगोव्रजे। नफालकृष्टेनजलेनचित्यांनचपर्वते। नजीर्णदेवायतनेनवल्मीकेकदा
चन ॥ ४७ ॥ नससत्त्वेषुगर्तेषुनगच्छन्नापिचस्थितः। ननदीतीरमासाद्यनचपर्वतमस्तके ॥ ४८ ॥ वाय्वऽग्निविप्रमादित्यमपः
पश्यंस्तथैवगाः। नकदाचनकुर्वीतविण्मूत्रस्यविसर्जनम् ॥ ४९ ॥ प्रत्यग्निंप्रतिसूर्यंचप्रतिसोमोदकद्विजान्। प्रतिगांप्रतिवा
तंचप्रज्ञानश्यतिमेहतः ॥ ५० ॥ आपस्तंबः०। शतहस्तंपरित्यज्यमूत्रंकुर्याज्जलाशयात्। शतद्वयेपुरीषंतुतीर्थेचैवचतुर्गुणम् ॥
५१ ॥ अत्रिः। शुद्ध्यर्थंचत्रिभिःकाष्ठैस्तृणैर्वापिनिकर्षयेत्। इतिपुरामलोत्सर्गात्प्रोक्तापृथ्व्याःसमावृतिः ॥ ५२ ॥ विष्णुपुराणे।
वल्मीकमूषकोत्खातांमृदमंतर्जलांतथा। शौचाऽवशिष्टांगेहाच्चमृदंशौचेविवर्जयेत् ॥५३॥ विष्णुस्मृतिः। अंतःप्राण्यावपन्नां
चहलोत्खातांचवर्जयेत्। अत्रिः। यस्मिन्देशेचयत्तोयंयाचयत्रचमृत्तिका। सैवतत्रप्रशस्तास्यात्तयाशौचंविधीयते ॥ ५४ ॥
तीर्थेशौचंनकुर्वीतकुर्वीतोद्धृतवारिणा। उदकपात्राऽभावेत्वादित्यपुराणेतीर्थेपिशौचप्रकारउक्तः। आदित्यपु०। रत्निमात्रंज
लंत्यक्त्वाकुर्याच्छौचमनुद्धृतैः। पश्चात्तच्छोधयेत्तीर्थमन्यथात्वशुचिर्भवेत् ॥ ५५ ॥ दक्षः। एकालिंगेतिस्रोवामेउभयोर्द्वेतुमृत्ति

मु० सा०
४९

ध्यया । नानुशासनवादाभ्यांभिक्षांलिप्सेतकर्हिचित् ॥ ९७ ॥ अभिपूजितलाभांस्तुजुगुप्सेतैवसर्वशः । अभिपूजितलाभैश्चयति
र्मुक्तोपिबध्यते ॥ ९८ ॥ एककालंचरेद्भैक्षंनप्रसज्जेतविस्तरे । भैक्षेप्रसक्तोहियतिर्विषयेष्वपिसज्जते ॥ ९९ ॥ दत्तात्रेयः ।
याचिताऽयाचिताभ्यांचभिक्षाभ्यांकल्पयेत्स्थितिं । माधुकरंयाचितंस्यात्प्राक्प्रणीतमयाचितम् ॥ ३०० ॥ उशनाः । माधुकर
मसंक्लृप्तंप्राक्प्रणीतमयाचितम् । तात्कालिकंचोपपन्नंभैक्षंपंचविधंस्मृतम् ॥ १ ॥ मनःसंकल्परहितान्गृहांस्त्रीन्पंचसप्तवा । मधु
वदाहरणंयत्तन्माधुकरमितिस्मृतं ॥ २ ॥ शयनोत्थापनात्प्राग्यत्प्रार्थितंभक्तिसंयुतैः । तत्प्राक्प्रणीतमित्याहभगवानुशनामुनिः
॥ ३ ॥ भिक्षाटनसमुद्योगात्प्राक्केनापिनिमंत्रितम् । अयाचितंतुतद्भैक्षंभोक्तव्यंमनुरब्रवीत् ॥ ४ ॥ उपस्थानेनयत्प्रोक्तंभिक्षार्थं
ब्राह्मणेनहि । तात्कालिकमितिख्यातंतदत्तव्यंमुमुक्षुणा ॥ ५ ॥ सिद्धमन्नंभक्तजनैरानीतंयन्मठंप्रति । उपपन्नंतदित्याहुर्मुन
योमोक्षकांक्षिणः ॥ ६ ॥ भिक्षाःपंचविधाह्येताःसोमपानसमाःस्मृताः । तासामेकतमयापिवर्त्तयन्सिद्धिमाप्नुयात् ॥ ७ ॥ संव
र्त्तः । अष्टौभिक्षाःसमादायसमुनिःसप्तपंचवा । अद्भिःप्रक्षाल्यताःसर्वास्ततोऽश्नीयाद्वाग्यतः ॥ ८ ॥ याज्ञवल्क्यः । संभवेव

द्भुगेहानांनतुतेष्वेवनित्यशः। भिक्षाटनमुपक्रम्यक्वचिल्लोभेनभैक्षभुक्। नातिक्रमेद्गृहंमोहाद्यत्रबाधोनविद्यते ॥ ९ ॥ गृहाति
क्रमणंकुर्याद्यत्रलोभादिनायतिः। प्राणायामशतंकुर्यात्प्रायश्चित्तंतथायतिः ॥ १० ॥ दत्तात्रेयः। भिक्षाटनेस्त्रियःकाश्चिच्छ्रोषि
याणांगृहेगृहे। तासांविलोकनंकार्यंयथामातुःस्वसुस्तथा ॥ ११ ॥ आत्मसंमितमाहारमाहरेदात्मवान्यतिः। अत्यंतक्षुधित
स्यापिसमाधिर्नैवजायते ॥ १२ ॥ यमः। आहारस्यचतुर्भागमर्द्धंवाप्याहरेद्यतिः। युवाचैवारुजःशक्तःप्रसंगंतत्रवर्जयेत् ॥ १३ ॥ अन्न
प्रसंगाद्बलंदर्पोविषयाऽऽसक्तिरेवच। कामःक्रोधस्तथालोभःपतनंनरकेतथा ॥ १४ ॥ अत्रिः। अनिंद्यंवैव्रजेद्गेहंनिंद्यंगेहंतुवर्जयेत्।
अनावृतेविशेद्द्वारिगेहेनैवावृतेव्रजेत् ॥ १५ ॥ नवीक्ष्येद्द्वाररंध्रेणभिक्षांलिप्सुःक्वचिद्यतिः। नकुर्याद्वैक्वचिद्घोषंनद्वारंताडयेत्
क्वचित् ॥ १६ ॥ मेधातिथिः। अकार्पण्यंतुवक्तव्यंमन्यंतेयत्रमानवाः। निरीक्ष्यंतेत्वनुद्विग्नास्तद्गृहंयत्नतोव्रजेत् ॥ १७ ॥ शौ
नकः। पीडयित्वापिस्वात्मानमल्पान्नंसंप्रयच्छति। साभिक्षाहिंसिताज्ञेयातात्तथीं वर्जयेद्यतिः ॥ १८ ॥ पंचाहंसप्तरात्रंवायत्रभि
क्षानलभ्यते। तद्गृहंवर्जयेद्भिक्षुश्चांडालगृहवत्सदा ॥ १९ ॥ अत्रिः। गोदोहमन्नपाकंवासक्तुपेषणमेववा। एकंकालंप्रतीक्षेत

दर्शनेनविनायतिः ॥ २० ॥ क्षणमेकंनतिष्ठेद्वैगृहिणोदर्शनाद्यतिः । ससंभ्रमंचनेक्षेतभिक्षाऽऽदानार्थमुत्तमम् ॥ २१ ॥ नकुप्येन्न
चकंपेतनहृष्येन्नैवकुत्सयेत् । अतिक्रम्यगृहंलोभान्नपुनस्तद्गृहंविशेत् ॥ २२ ॥ मेधातिथिः । अदुष्टाऽपतितंसाधुंयतिर्यःपरि
वर्जयेत् । सतस्यसुकृतंदत्वादुःकृतंप्रतिपद्यते ॥ २३ ॥ तथैवचगृहस्थस्यनिराशोभिक्षुकोगतः । हुतंदत्तंतपोऽधीतंसर्वमादा
यगच्छति ॥ २४ ॥ वौधायनः । चरेन्माधुकरींवृत्तिंयतिर्म्लेच्छगृहादपि । एकान्नंतुनभुंजीतवृहस्पतिसमादपि ॥ २५ ॥ भैक्षं
सर्ववर्णेषुएकान्नंवाद्विजेषुच । नचैकान्नंद्विजेषुस्यात्कामंस्यात्सार्ववर्णिकं ॥ २६ ॥ अत्रिः । श्रोत्रियान्नंनभिक्षेतश्रद्धाभक्तिवहि
ष्कृतं । व्रात्यस्यापिगृहेभिक्षेच्छ्रद्धाभक्तिपुरस्कृतम् ॥ २७ ॥ व्यासः । श्रद्दधानस्यभोक्तव्यंचौरस्यापिविशेषतः । नत्वेववहुयाज्य
स्ययश्चोपनयतेवहून् ॥ २८ ॥ मनुः । गर्भाष्टमेऽव्दे कुर्वीतब्राह्मणस्योपनायनं । गर्भादेकादशेराज्ञोगर्भात्तुद्वादशेविशः ॥ २९ ॥
आषोडशाद्ब्राह्मणस्यसावित्रीनातिवर्त्तते । आद्वाविंशात्क्षत्रवंधोराचतुर्विंशतेर्विशः ॥३०॥ अतऊर्द्धंत्रयोप्येतेयथाकालमसंस्कृ
ताः । सावित्रीपतिताव्रात्याभवंत्यार्यविगर्हिताः ॥ ३१ ॥ अत्रिः । द्वावेवाश्रमिणौभोज्यौवानप्रस्थोगृहीतथा । अभोज्यमन्न-

पद्मपुराणे । परमहंसव्रतिनस्तु प्रणवाऽभ्यासशालिनः । यद्यनुत्पन्नमात्मनो ज्ञानं विरक्तः संयतेंद्रियः । यावज्जीवं जपेन्मंत्रं प्रणवं ब्रह्मणोवपुः ॥ ८७ ॥ याज्ञवल्क्यः । जपश्च द्विविधः प्रोक्तो वाचिको मानसस्तथा । वाचिकोपांशुरुच्चैश्च द्विविधः परिकीर्त्तितः ॥ ८८ ॥ उच्चैर्जपादुपांशुश्च सहस्रगुण उच्यते । मानसश्च तथोपांशोः सहस्रगुण उच्यते ॥ ८९ ॥ संप्रदायविदः । यस्तु द्वादशसाहस्रं नित्यं प्रणवमभ्यसेत् । तस्य द्वादशमासैस्तु परं ब्रह्म प्रकाशते ॥ ९० ॥ यः शब्दो बोधजननः परेषां शृण्वतां स्फुटम् । स्वाध्यायो वाचिकः प्रोक्त उपांशोरथ लक्षणम् ॥ ९१ ॥ ओष्ठयोः स्पंदमात्रेण परस्याऽशब्द बोधकः । उपांशुरेष निर्दिष्टः साहस्रो वाचिकाज्जपात् ॥ ९२ ॥ अथ ध्यानविधिः । शून्यागारे गुहायां वा पर्वतेषु वनेषु च । तत्रासीनः प्रसन्नात्मा ध्यानं विधिवदाचरेत् ॥ ९३ ॥ ब्रह्मोपनिषच्छ्रुतिः । आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिं । ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥ ९४ ॥ अथ नतिविधिः । यो भवेत्पूर्वसंन्यासी तुल्यो वै धर्मतो यदि । तस्मै प्रणामः कर्त्तव्यो नेतराय कदाचन ॥ ९५ ॥ अथ भिक्षाविधिः । याज्ञवल्क्यः । अप्रमत्तश्चरेद्भैक्षं सायाह्नेऽनभिलक्षितः । रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ॥ ९६ ॥ मनुः । न चोत्पातनिमित्ताभ्यां न नक्षत्रांगवि

तामभोज्यांविजानीयाद्दाताचनरकंव्रजेत् ॥ ४४ ॥ आयसेनतुपात्रेणयदन्नमुपदीयते। भोक्ताविष्ठासमंभुंक्तेदाताचनरकंव्रजेत्
॥ ४५ ॥ उद्यतामाहृतांभिक्षांपुरस्तादप्रचोदिताम्। भोज्यांप्रजापतिर्मेनेअपिदुष्कृतकर्मणः ॥ ४६ ॥ पितामहः। सौवर्ण
लौहरौप्येषुताम्राद्यश्ममयेषुच। अश्नन्भिक्षुर्नदुष्येतदुष्यतेतुपरिग्रहात् ॥ ४७ ॥ आदित्यपुराणे। एकवासाविशुद्धात्मा
मंदगामीयुगांतदृक्। यथालब्धंतदश्नीयात्पूजासंस्कारवर्जितः ॥ ४८ ॥ विष्णुः। यदिभैक्षंसमादायपर्युषेद्योगवित्तमः। सप
र्युषितदोषेणभिक्षुर्भवतिकिल्बिषी ॥ ४९ ॥ जावालः। यत्किंचिद्दीयमानंतुगृहिणीकरसंस्थितं। भिक्षुर्भिक्षांनगृह्णीयात्का
कयोनिषुजायते ॥ ५० ॥ नारदः। हव्यंकव्यंचराजेंद्रनाश्नीयादात्मवान्यतिः। हव्यकव्यपरोभिक्षुःपतत्येवनसंशयः ॥ ५१ ॥
श्राद्धभोजीयतिर्नित्यमाशुगच्छतिशूद्रताम्। तादृशंकश्मलंदृष्ट्वासचैलोजलमाविशेत् ॥ ५२ ॥ जैमिनिः। श्राद्धान्नंयस्यकुक्षौ
तुमुहूर्त्तमपिवर्त्तते। भिक्षोश्चत्वारिनश्यंतिआयुःप्रज्ञायशोबलम् ॥ ५३ ॥ बृहस्पतिः। श्रवणंमननंध्यानंस्वाध्यायंज्ञानमेवच।
संध्येनश्वरतांयातिसकृच्छ्राद्धान्नभोजनात् ॥ ५४ ॥ अंतःकरणशुद्धिस्तुनस्यात्तस्यैवसर्वदा। यदान्नंप्रेतयोग्यंचभवेत्तांकल्पमाच

तः ॥ ५५ ॥ परान्नंनैवगृह्णीयाद्भिक्षुःस्वाश्रमपालकः । परान्नवर्ज्जनादेवभिक्षुर्भिक्षुरितिस्मृतः ॥ ५६ ॥ अथभिक्षाद्यर्थंयति
पात्रविधिः । याज्ञवल्क्यः । यतिपात्राणिमृद्वेणुदार्वलावुमयानिच । सलिलंशुद्धिरेतेषांगोवालैश्चावघर्षणम् ॥ ५७ ॥ तच्चशांदा
रुशृंगास्थ्नांगोवालैःफलसंभुवां । अमेध्याऽक्तस्यमृत्तोयैःशुद्धिर्गंधादिकर्षणात् ॥ ५८ ॥ अमेध्याःशरीरजामलास्तैरक्तस्यलिप्त
स्यपात्रस्यतेचमनुनादर्शिताः । वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविस्नखाः । श्लेष्माऽश्रुदूषिकास्वेदोद्वादशैतेनृणांमलाः ॥ ५९ ॥
अत्त्रा । द्वापरादियुगेष्वेवपात्रभोजीभवेद्यतिः । कलौनैवतुभुंजीतस्वपात्रेयोगवित्तमः ॥ ६० ॥ अत्रिः । मृद्दार्व्वलावुजंपात्रंवै
णवंतांतवौपले । पार्णंतार्णंतथाक्षौमंपात्रंपर्णपुटंतथा । उक्तानियतिपात्राणिब्रह्मणाविश्वयोनिना ॥ ६१ ॥ करेकर्पटकेचैवआ
यसेताम्रभाजने । भुंजन्भिक्षुनलिप्येतलिप्यंतेगृहमेधिनः ॥ ६२ ॥ अथविद्वद्यतिभिक्षाविधिवाक्यानिशौनकः । पाणिपात्रंचरन्यो
गीनासकृद्भैक्षमाचरेत् । तिष्ठन्भुंज्याच्चरन्भुंज्यान्मध्येनाचमनंतथा ॥ ६३ ॥ गौतमः । पात्रमस्यभवेत्पाणिस्तेननित्यंगृहानटेत् ।
हविःप्राश्ययथाचम्यनिराहारोभवेद्गृही । प्राश्याचम्यतथाभिक्षुर्निराहारोगृहेगृहे ॥ ६४ ॥ वशिष्ठः । भिक्षाऽटनंप्रकुर्वाणोह्यमे

ध्वंश्वादिवास्पृशेत्। भिक्षांगृहीत्वास्नात्वाचप्राणायामान्षडाचरेत् ॥ ६५ ॥ अमेध्यनिचयंचैवस्पृष्ट्वादेवलकंयतिः। सपाचोवि
धिवत्स्नात्वाविष्णुंध्यात्वाविमुच्यते ॥ ६६ ॥ पादत्राणेस्थितौपादावस्पृश्यंस्पृशतोर्यदि। पादत्राणपरित्यागेआचांतःशुद्धिमाप्नु
यात् ॥ ६७ ॥ उदक्याशावचांडालचौरनग्नकपालिभिः। स्पृष्टांभिक्षांत्यजेद्भिक्षुःसचैलोजलमाविशेत् ॥ ६८ ॥ कुड्येकाष्ठे
रथेमंचेनौकायांगजवृक्षयोः। तृणौघजलसंघातेस्पृष्टाऽस्पृष्टिर्नविद्यते ॥ ६९ ॥ जमदग्निः। श्वकाकक्रोडवेश्याऽविखरोष्ट्रस्प
र्शेयतिः। सभिक्षस्तुजलेमग्नःशुध्येज्जप्त्वाऽघमर्षणं ॥ ७० ॥ अत्रिः। श्वकाकगर्दभैरुष्ट्रैर्जंबुकैर्वानरैस्तथा। चांडालपतितैःस्पृ
ष्टंयतिःपात्रंविसर्जयेत् ॥ ७१ ॥ पराशरः। मार्जारमक्षिकाकीटपतंगक्रिमिदर्दुराः। मेध्याऽमेध्यंस्पृशंतोपिनोच्छिष्टंमनुर
ब्रवीत् ॥ ७२ ॥ आश्वला०। नस्पृशेत्सव्यहस्तेनभुंजानोऽन्नंकदाचन। नपादौनशिरोवस्तिंनपदाभाजनंस्पृशेत् ॥ ७३ ॥ यमः।
अष्टौग्रासायतेःप्रोक्ताःषोडशवनवासिनः। द्वात्रिंशत्तुगृहस्थानांयथेष्टंब्रह्मचारिणः ॥ ७४ ॥ व्याघ्रः। चतुरंगुलमुत्सेधंचतुरंगु
लमायतं। एतद्ग्रासप्रमाणंतुव्याघ्रेणपरिभाषितं। भंक्त्वाभंक्त्वोपभुंजीतनियमार्थंयतिरात्मवान् ॥ ७५ ॥ अथभिक्षास्तुतिः।

मन्येषांसर्वेषामपिलिंगिनाम् ॥ ३२ ॥ वृहस्पतिः । यत्यन्नंब्रह्मचार्य्यन्नमवीरान्नंतथैवच । शूद्रान्नंचतथाभिक्षुर्वर्जयेत्परदारवत्
॥ ३३ ॥ व्यासः । यत्यन्नंतुनभोक्तव्यंप्राणैःकंठगतैरपि । गोमांसस्यसमंज्ञेयंसुराविंदुसमंजलम् ॥ ३४ ॥ जावालः । स्वधर्मात्प्र
च्युतायेवैपुरुषायोषितोपिवा । अवीरास्तेसदाज्ञेयानित्यंसद्भिर्विगर्हिताः ॥ ३५ ॥ मेधातिथिः । ब्राह्मणक्षत्रियविशांमेध्यानां
भैक्षमाचरेत् । तत्राप्यऽसंभवेपूर्वादाददीतोत्तरोत्तरात् ॥ ३६ ॥ द्विजाऽभावेतुसंप्राप्तेउपवासत्रयंगते । भैक्षंशूद्रादपिग्राह्यं
रक्षेत्प्राणान्द्विजोत्तमः ॥ ३७ ॥ पराशरः । दासनापितगोपालकुलमित्राणिसीरिणः । एतेशूद्रेषुभोज्यान्नाःयश्चात्मानंनिवेद
येत् ॥ ३८ ॥ मद्यमांसरतंनित्यंनीचकर्मप्रवर्त्तकम् । तंशूद्रंवर्जयेद्दूरंश्वपाकमिवदूरतः ॥ ३९ ॥ द्विजशुश्रूषणरतान्मद्यमांस
विवर्जितात् । स्वकर्मनिरतान्नित्यंशूद्रान्नान्नंत्यजेद्बुधः ॥ ४० ॥ अत्रिः । कुटुंवसंकटंचैवमलिनोपहतंगृहम् । पीडयाऽन्नंप्रयच्छे
द्यस्तद्गृहंवर्जयेद्यतिः ॥ ४१ ॥ नाश्नंतिह्यशुचेर्देवानाश्नंतिवृषलीपतेः । स्त्रीजितान्नंनचाश्नंतितदन्नंवर्जयेद्यतिः ॥ ४२ ॥ चि
कित्सकस्यमृगयाशल्यहर्तुंश्वपाशिनः । कुलटाषंडयोरन्नमुद्यतंसंत्यजेद्यतिः ॥ ४३ ॥ यात्तुपर्युषिताभिक्षानैवेद्यकल्पितातुया ।

शीभवेद्यस्तुकदाचिद्भ्रष्टोयतिः। तस्यवैनिष्कृतिर्नास्तिप्रायश्चित्तायुतैरपि ॥ ८६ ॥ पराशरः। यतीनामातुराणांचवृद्धानां
दीर्घरोगिणां। एकान्नेनैवदोषोस्तिएकस्यापिदिनेदिने ॥ ८७ ॥ क्रतुः। अयाचितंयथालाभंभोजनाच्छादनंभवेत्। निमन्त्रि
तोऽथवाश्नीयात्स्वगुणंनप्रकाशयेत् ॥ ८८ ॥ सुजीर्णोऽतिकृशोयोगीदेशान्ताद्विकिलेन्द्रियः। पुत्रमित्रगुरुभ्रातृपत्नीभ्योभैक्ष
माहरेत् ॥ ८९ ॥ पुनःशक्तंप्रतिदत्ताचेयः। कृतेदेशंत्यजेद्ग्रामंत्रेतायांद्वापरेकुलम्। कर्त्तारंतुकलौदुष्टंत्यक्त्वाभैक्षंसमाचरेत् ॥
९० ॥ अङ्गिराः। संन्यासंचैवयःकृत्वापुनरुत्तिष्ठतेद्विजः। नतस्यनिष्कृतिःकार्यास्वधर्मात्प्रच्युतस्यवै ॥ ९१ ॥ विष्णुः। आरू
ढोनैष्ठिकंधर्मंपुनरावर्त्तयेद्यदि। आरूढपतितोज्ञेयःसर्वधर्मवहिष्कृतः ॥ ९२ ॥ चाण्डालाःप्रत्यवसिताःपारिव्राजकतापसाः।
तेषांजातान्यपत्यानिचाण्डालैःसहवासयेत् ॥ ९३ ॥ अङ्गिराः। आरूढपतितोहन्तिदशपूर्वान्दशपरान्। निस्तारयतितानेव
योहिसम्यग्व्यवस्थितः ॥ ९४ ॥ परमहंसोपनिषच्छ्रुतिः। काष्ठदण्डोधृतोयेनसर्वाशीज्ञानवर्जितः। सयातिनरकान्घोरान्महारौ
रवसंज्ञिकान् ॥ ९५ ॥ दक्षः। पारिव्राज्यंगृहीत्वातुयःस्वधर्मेनतिष्ठति। श्वपादेनाङ्कयित्वातंराजाशीघ्रंप्रवासयेत् ॥ ९६ ॥

ब्यासः। द्वाविमौनविराजेतेविपरीतेनकर्मणा। निरारम्भोगृहस्थश्चकार्यवांश्चैवभिक्षुकः ॥ ९७॥ लिङ्गेसत्यपिखल्वस्मिन्ज्ञानमेवहिकारणम्। निर्मोक्षायचेद्भूतानांलिङ्गग्राह्योनिरर्थकः ॥ ९८ ॥ अथप्रायश्चित्तविधिःजमदग्निः। मूलाङ्कुरेषुपत्रेषुपुष्पेषुचफलेषुच। स्थावराणांचोपमर्देप्राणायामास्त्रयस्त्रयः॥९९॥ धान्यंवृक्षंलतांयस्तुस्थावरंजङ्गमंतथा। उत्पाटयतिमूढात्माअवीचीनरकंव्रजेत् ॥ ४०० ॥ कृकलासेचोरगलेमण्डूकेगृहगोधिके। कुक्कुटादिषुभूतेषुदशाहंचार्द्धभोजनम् ॥ १ ॥ मार्जारमूषकेसर्पेस्थूलमत्स्येषुपक्षिषु। नकुलादिषुभूतेषुचरेच्चान्द्रायणंयतिः ॥ २ ॥ पिपीलिकायांसूक्ष्मायांप्राणायामास्त्रयस्त्रयः। यूकायांमत्कुणेचैवमसकेपञ्चनिर्दिशेत् ॥ ३ ॥ अकामादपिहिंसेतपशून्मृगादिकान्यतिः। कृच्छ्रातिकृच्छ्रौकुर्वीतचान्द्रायणमथापिवा॥ ४॥ मनुः। तप्तकृच्छ्रंचरन्विप्रोजलक्षीरघृतानिलान्। प्रतित्र्यहंपिवेदुष्णान्सकृत्स्नायात्समाहितः ॥ ५ ॥ पराशरः। अपांपिबेत्तुत्रिपलंद्विपलंतुपयःपिबेत्। पलमेकंपिबेत्सर्पिस्त्रिरात्रंचोष्णमारुतम् ॥ ६ ॥ आप्तवा०। दशार्द्धगुञ्जंप्रवदन्तिमाषं माषाह्वयैःषोडशभिश्चकर्षम्। कर्षैश्चतुर्भिस्तुपलंतुलाज्ञाः कर्षंसुवर्णस्यसुवर्णसंज्ञम् ॥ ७ ॥ हारीतः। अहोरात्र्याचयान्जन्तून्हिनस्त्यज्ञा

नतोयतिः। प्राणायामान्दशाष्टौचप्रायश्चित्तंयतिश्चरेत् ॥ ८ ॥ चान्तुषेदशकुर्वीतवाच्येविंशतिमेवच। मानसेत्रिंशतिंचापिपा
तकेप्राणसंयमान् ॥ ९ ॥ यमः। कणपिण्याकतक्रंवाशाकमूलफलादिकम्। पक्कंवाप्यथवाऽपक्कंपचन्नश्नानंतोयतिः ॥ १० ॥ आ
चरेच्चीर्णिकृछ्राणिप्राकृतान्येवशुद्धये। अभ्यासाद्बुद्धिपूर्वंहिपाकदोषान्नमुच्यते ॥ ११ ॥ देवलः। प्रस्कन्नरेतोदुर्बलत्वात्प्राणायामां
स्तुषोडश। रेतःसेकंकचिद्भिक्षुःकुर्यान्मोहात्तुकामतः। प्राजापत्यंचयंकृत्वाप्राणायामांस्तुशतंचरेत् ॥ १२ ॥ मनुः। त्र्यहंप्रात
स्त्र्यहंसायंत्र्यहमद्यादयाचितम्। त्र्यहंपरंतुनाश्नीयात्प्राजापत्योयमुच्यते ॥ १३ ॥ पराशरः। सायंतुद्वादशग्रासाःप्रातःपञ्चदश
स्मृताः। चतुर्विंशतिरयाच्याःपरंनिरशनंस्मृतम् ॥ १४ ॥ अशक्तंप्रत्यापस्तम्बआहस्म। सायंद्वाविंशतिग्रासाःप्रातःषड्विंशतिःस्मृ
ताः। चतुर्विंशतिरयाच्याःपरेनिरशनास्त्रयः। कुक्कुटाण्डप्रमाणास्तुयथाचास्येविशेत्सुखम् ॥ १५ ॥ देवलः। स्त्रियंदृष्ट्वायदास्व
प्नेरेतःक्षरतिवैक्वचित्। सवासाऽऽप्लुत्यशुद्ध्यर्थंकुर्यात्षोडशसंयमान् ॥ १६ ॥ उपवासंयतिःकुर्यात्पुनःसुप्तेक्षरेद्यदि। प्राणाया
मैर्विशुद्धात्माविरजोजायतेपुनः ॥ १७ ॥ दत्तात्रेयः। उपेत्यतुस्त्रियंकामात्प्रायश्चित्तंविधीयते। प्राणायामसमायुक्तःकृच्छ्रमब्दं ५८

मनुः। नापोमूत्रपुरीषाभ्यांनाग्निर्दहनकर्मणा। नवायुःस्पर्शदोषेणनान्नदोषेणमस्करी ॥ ७६ ॥ यमः। गङ्गातोयाऽभिषिक्तांभि
क्षांयोश्नातियोगवित्। नतुक्रतुशतैरिष्टंफलंप्राप्नोतिमानवः ॥ ७७ ॥ गङ्गातोयंचभैक्षंचवैष्णवान्नंविशेषतः। आनखाग्रान्मो
चयेत्पापंमन्त्रपूतंहविर्यथा ॥ ७८ ॥ शातातपः। भिक्षामाधुकरीनामसर्वपापप्रणाशिनी। अवधूताचपूताचसोमपानंदिनेदिने
॥ ७९ ॥ भिक्षाऽऽहारोनिराहारोभिक्षानैवप्रतिग्रहः। श्रोत्रियान्नंचभैक्षंचहुतशेषंचयद्धविः। आनखाग्राच्छोधयेत्पापंतुषाऽ
ग्निरिवकाञ्चनम् ॥ ८० ॥ गङ्गायाःसलिलंपुण्यंशालग्रामशिलातथा। भिक्षान्नंपञ्चगव्यंचपवित्राणियुगेयुगे ॥ ८१ ॥ कण्वः।
अप्बिन्दुंयःकुशाग्रेणमासिमासिसमश्नुते। निरपेक्षस्तुभिक्षाशीसतुतस्माद्विशिष्यते ॥ ८२ ॥ याज्ञवल्क्यः। नक्तात्परश्चोपवास
उपवासादयाचितम्। अयाचितात्परंभैक्षंतस्माद्भैक्षेणवर्त्तयेत् ॥ ८३ ॥ अथनिषिद्धसेविनिन्दाऽशक्तयतिभिक्षापरवाक्यानि।
अत्रिः। अपक्वंयदिवापक्वंपाचयेद्यःक्वचिद्यतिः। स्वधर्मस्यतुलोपेनतिर्यग्योनिंव्रजेद्यतिः ॥ ८४ ॥ आत्तवा०। तितिक्षाज्ञान
वैराग्यशमादिगुणवर्जितः। भिक्षामात्रेणयोजीवेत्सभिक्षुर्यतिवृत्तिहा ॥ ८५ ॥ सपापीपशुवन्नरइत्यपिक्वचित्पाठः। एकान्ना

मु० सा० पितृमातृक्षयंश्रुत्वास्नात्वाशुद्ध्यतिसाम्बरः। नकुर्यात्सूतकंभिक्षुःश्राद्धपिण्डोदकक्रियाः ॥ ३० ॥ वायुः। प्रातःस्नानंविनाकामाद्भु
५५ क्त्वाचान्द्रायणंचरेत्। वहुभोज्येयतिर्भुक्त्वाकुर्यादेतद्व्रतंपुनः ॥ ३१ ॥ प्रयोगसारे। पात्रेतुपतितेभैक्षेएकभिक्षांकरोतियः। सकु
र्य्याच्छतमश्रान्तःप्राणायामान्विशुद्धये ॥ ३२ ॥ जमदग्निः। अश्नन्माधुकरींभिक्षांनैवेद्येतुविसर्जिते। परपाकंनगृह्णीयात्किञ्चि
दन्नमुपस्थितम् ॥ ३३ ॥ अत्रिः। भैक्षंचपरपाकान्नंसम्मिश्रंयोत्तिवैयतिः। त्रिरुपोषितोभूत्वाप्राणायामशतंचरेत् ॥ ३४ ॥ जम
दग्निः। अथवायद्गुरुर्ब्रूयात्तत्कार्य्यमविशङ्कया। निग्रहेऽनुग्रहेवापिगुरुःसर्वत्रकारणम् ॥ ३५ ॥ यमः। यदिपर्युषितंभैक्षमद्याद्भि
क्षुःकथञ्चन। तदाचान्द्रायणंकुर्याद्यतिःशुद्ध्यर्थमात्मनः ॥ ३६ ॥ भिक्षुर्द्विभोजनंकुर्यात्कदाचिज्ज्ञानदुर्वलः। स्वस्थावस्थोयदालौ
ल्यात्तदाचान्द्रायणंचरेत् ॥ ३७ ॥ अशक्तःप्राणरक्षार्थंपुनर्मूलफलादिकम्। भक्षयेन्नैवदुष्येतदुष्यतेदन्तधावनम् ॥ ३८ ॥ वृद्ध
याज्ञवल्क्यः। अष्टौतान्यऽव्रतघ्नानिआपोमूलंफलंपयः। हविर्ब्राह्मणकाम्याचगुरोर्वचस्तथौषधम् ॥ ३९ ॥ जावालः। एका ५५
न्नंमधुमांसंचअन्नंविष्ठादिदूषितम्। हन्तकारंचनैवेद्यंप्रत्यक्षंलवणंतथा। एतान्भुक्त्वायतिर्मोहात्प्राजापत्यंसमाचरेत् ॥ ४० ॥

यत्यन्नंयतिपात्रस्थंयतिनाप्रेरितंचयत्। अन्नत्रयंनभोक्तव्यंभुक्त्वाचान्द्रायणंचरेत्॥ ४१॥ संन्यासंकुरुतेयस्तुश्राद्धंतस्यविधीयते।
तस्यान्नंनैवभोक्तव्यंभुक्त्वाचान्द्रायणंचरेत्॥ ४२॥ विश्वामित्रः। एकस्यान्नंत्र्यहंभुक्त्वानिरन्तरमनापदि। प्राणायामशतंकुर्य्याच्छु
द्ध्यर्थंयतिरात्मवान्॥ ४३॥ अत्रिः। ज्ञातीनांतुकुलेभिक्षुर्नभिक्षेतकथञ्चन। आचरेच्चयदाभिक्षांतदाचान्द्रायणंचरेत्॥ ४४॥
सगोत्रमसगोत्रंवायद्गृहेसूतकंभवेत्। नतावच्छुध्यतेभूमिर्यावन्नस्याद्दनिर्दशं। भिक्षांचेद्भिक्षुर्भिक्षेतभुक्त्वाचान्द्रायणंचरेत्॥ ४५॥
निषिद्धान्नंयदाश्नीयादनुज्ञायत्रनास्तिवै। अतिकृच्छ्रंतदाभिक्षुःकुर्याच्छुद्ध्यर्थमात्मनः॥ ४६॥ सक्तुपेषणगोदोहादन्नपाकादि
कालतः। ऊर्द्धंयदिप्रतीक्षेतभिक्षार्थंभैक्षमाचरन्॥ ४७॥ द्वादशैवतदाकुर्यात्प्राणायामान्विशुद्धये। प्राणायामशतंकुर्याद्भुक्त्वा
शूद्रान्नमापदि॥ ४८॥ जमदग्निः। आहारग्रहणेरात्रौप्राणायामादशस्मृताः॥ जलप्रग्रहणेरात्रौप्राणायामास्तथैवच॥
४९॥ भुक्तशेषंनकुर्वीतप्रमादात्कुरुतेयदि। प्रतिग्रासंतदाकुर्यात्त्रींस्त्रीन्प्राणायामान्यतिः॥ ५०॥ देवलः। पतितान्नंसकृ
द्भुक्त्वाप्रायश्चित्तीभवेद्यतिः। तप्तकृच्छ्रंत्रयंकृत्वाशुद्ध्यतेनात्रसंशयः॥ ५१॥ यमः। ताम्बूलाऽभ्यञ्जनंचैवकांस्यपात्रेतुभोजनम्।

कृत्वाचोपवसेद्भिक्षुःस्रग्गन्धादिचभूषणम् ॥५२॥ उपानहौविनाभिक्षुःकृत्वाभिक्षाटनादिकम्। मार्गेमूत्रसमाकीर्णेसम्यक्स्नाने
नशुद्ध्यति ॥ ५३ ॥ ज्ञानेनमुच्यतेभिक्षुस्तपसास्वर्गमवाप्नुयात्। नरकंविषयासङ्गाच्चयोमार्गास्तपस्विनाम् ॥ ५४ ॥ जमदग्निः।
उद्धृत्यवामहस्तेनभाजनंयोन्नमत्तिवै। गृध्रोछिष्टंचविज्ञेयंभुक्त्वाचान्द्रायणंचरेत् ॥ ५५ ॥ यमः। ऊद्धृत्यवामहस्तेनयःपिवेद्ब्रा
ह्मणोजलम्। सुरापानेनततुल्यंमनुःस्वायम्भवोऽब्रवीत् ॥ ५६ ॥ शौचशेषंपीतशेषंपादशेषंतथैवच। मदतुल्यंतुततोयंपर्युक्षक
रणंविना ॥ ५७ ॥ जमदग्निः। विनाङ्गुष्ठेननाश्नीयान्नलिहेज्जिह्वयाकरम्। अश्नन्यदिलिहेद्धस्तंतदाचान्द्रायणंचरेत् ॥
५८ ॥ भुञ्जानस्ययदाभिक्षोःकदाचित्स्रवतेगुदम्। अन्नञ्चास्यगतंत्यक्त्वाकृत्वाशौचंसमाहितः ॥ ५९ ॥ स्नानंकृत्वायथान्यायं
त्रिंशत्प्राणायामांश्चरेत्। अहोरात्रोपोषितोभूत्वापञ्चगव्यंपिवेत्ततः ॥ ६० ॥ पञ्चगव्यपानमन्त्रश्चान्यैर्निर्दिष्टः। यत्त्वगस्थिगतं
पापंशरीरेपूर्वसञ्चितं। तन्मेपापञ्चशोकञ्चपञ्चगव्याःपुनन्तुमाम् ॥ ६१ ॥ विश्वामित्रः। अज्ञानादुक्तमेवैतत्प्रायश्चित्तंविधीयते।
अभ्यासादधिकंकिञ्चिद्वर्द्धतेदिनसंख्यया ॥ ६२ ॥ विष्णुपुराणे। कृतेपापेऽनुतापोवैयस्यपुंसःप्रजायते। प्रायश्चित्तंतुतत्तस्यह

समाचरेत् ॥ १८ ॥ तथैवचपुनःश्रान्तःकुर्याच्चतपनंव्रतम् । ततश्चरितनिर्देशात्कृच्छ्रस्यान्तेसमाहितः ॥ १९ ॥ पुनश्चाश्रममागत्य चरेद्भिक्षुःसमाहितः । इच्छयायदितांपश्येत्प्राणायामास्तुषोडश ॥ २० ॥ विष्णुः । नैष्ठिकानांवनस्थानांयतीनामवकीर्णिनां । शुद्धानामपिलोकेस्मिन्प्रत्यापत्तिर्नविद्यते ॥ २१ ॥ आरूढोनैष्ठिकंधर्मंयदिप्रच्यवतेपुनः । प्रायश्चित्तंनपश्यामियेनशुद्ध्येत्सआत्महा ॥ २२ ॥ अत्रिः । वर्षाभेदंयतिःकुर्याद्यदिकश्चिदनापदि । प्राजापत्येनकृच्छ्रेणमुच्यतेनात्रसंशयः ॥ २३ ॥ स्थितियोग्यान्वहून्ग्रामान्यदिवर्षासुलङ्घयेत् । प्रत्येकैकंचरेत्कृच्छ्रमेतत्पापात्प्रमुक्तये ॥ २४ ॥ वृद्धयाज्ञवल्क्यः । चौरैरुपद्रुतंदेशंदुर्भिक्षव्याधिपीडितम् । चक्रेणाऽन्येनवाऽऽक्रान्तंवर्षास्वप्याशुसन्त्यजेत् ॥ २५ ॥ मुहूर्त्तमपिनासीतदेशेसोपद्रवेयतिः । उपद्रुतेतुमनसिसमाधिर्नोपजायते ॥ २६ ॥ यत्तीर्थमनुसंप्राप्यचित्तमस्यप्रसीदति । तत्रतिष्ठेन्नरोविद्वान्मोक्षमार्गेव्यवस्थितः ॥ २७ ॥ वृद्धशातातपः । निगृहीतेन्द्रियग्रामोयत्रयत्रनिवसेद्यतिः । तत्रतत्रकुरुक्षेत्रंनैमिषंपुष्करंतथा ॥ २८ ॥ दत्तात्रेयः । चौरंमेढ्रप्रदेशेतुकृत्वाकृच्छ्रंसमाचरेत् । प्राणायामशतंकृत्वातस्माद्भिक्षुर्विशुद्ध्यति ॥ २९ ॥ अत्रिः । नस्नानमाचरेद्भिक्षुःपुत्रादिनिधनेश्रुते ।

मु० सा० उपादानाभिधायासान्यासतुष्टिर्निगद्यते। न्यासलिङ्गेनबोधःस्यात्तेनमोक्षोपिसम्भवेत्॥ ७५॥ अतोध्यानविरागाभ्यांजपा
५७ दिभिश्चकिंमम। इतितुष्टिःसदाहेयातथान्याश्चाष्टतुष्टयः॥ ७६॥ ताःसांख्यतत्त्वकौमुद्यामीशकृष्णेनदर्शिताः। तद्वाक्यंसं
लिखामीहनवतुष्टिप्रदर्शकम्॥ ७७॥ ईश्वरकृष्णवा०। अध्यात्मिकाश्चतस्रःप्रकृत्युपादानकालभागाख्याः। बाह्याविषयो
परमात्पञ्चनवतुष्टयोऽभिमताः॥ ७८॥ याज्ञवल्क्यः। नाश्रमःकारणंधर्मेक्रियमाणोभवेद्धिसः। अतोयदात्मनोऽपथ्यंपरेषांन
समाचरेत्॥ ७९॥ वाक्यसं०। अथविद्वद्यतेर्धर्मायैर्वाक्यैःसंप्रदर्शिताः। सङ्क्षेपात्तान्यपीहाहंसंगृह्णामिप्रसङ्गतः॥ ८०॥
ब्रह्मोपनिषद्वा०। अग्नेरिवशिखानान्यायस्यज्ञानमयीशिखा। सशिखीत्युच्यतेविद्वान्नेतरेकेशधारिणः॥ ८१॥ ज्ञानशिखि
नोज्ञाननिष्ठाज्ञानयज्ञोपवीतिनः। ज्ञानमेवपरंतेषांपवित्रंज्ञानमुत्तमम्॥ ८२॥ परमहंसोपनिषद्वा०। सर्वान्कामान्परित्य
ज्याद्वैतेचपरमास्थितिः। ज्ञानदण्डोधृतोयेनएकदण्डीसउच्यते॥ ८३॥ ब्रह्मोपनिषद्वा०। यदाऽऽत्माप्रज्ञयाऽऽत्मानंसन्धत्ते ५७
परमात्मनि। तेनसन्ध्याध्यानमेवतस्मात्सन्ध्याभिवन्दनम्॥ ८४॥ निरुदकाध्यानसन्ध्यावाक्कायक्लेशवर्जिता। सन्धिनीसर्वभू

तानीसासन्ध्याह्येकदण्डिनाम् ॥ ८५ ॥ श्रुतयः । आत्मानमात्मनासाक्षाद्ब्रह्मबुद्ध्वासुनिश्चलम् । देहजात्यादिसम्बन्धान्वर्णाश्र
मसमन्वितान् ॥ ८६ ॥ वेदशास्त्रपुराणानिपादपांशुमिवत्यजेत् । एकाकीनिःस्पृहस्तिष्ठेन्नहिकेनसहालपेत् । दद्यान्नारायणे
त्येवंप्रतिवाक्यंसदायतिः ॥ ८७॥ मुनिःकौपीनवासास्यान्नग्नोवाध्यानतत्परः । अध्यात्मरतिरासीनोनिरपेक्षोनिराशिषः ।
आत्मनैवसहायेनसुखार्थीविचरेदिह ॥ ८८ ॥ सन्दिग्धःसर्वभूतानांवर्णाश्रमविवर्जितः । अन्धवज्जडवच्चापिमूकवच्चमहीं
चरेत् ॥ ८९ ॥ देवाग्न्यागारेतरुमूलेगुहायां वसेदसङ्गोऽलक्षितशीलवृत्तः । निरिन्धनज्योतिरिवोपशान्तो नचोद्विजेदु
द्विजेच्चनकुत्र ॥ त्यक्तैषणोह्यनृणस्तंविदित्वा मौनीवसेदाश्रमेयत्रकुत्र ॥ ९० ॥ भारते । कपालंवृक्षमूलानिकुचैलमसहायता ।
उपेक्षासर्वभूतानामेतावद्भिक्षुलक्षणं ॥ ९१ ॥ अशेषमोहःसमलोष्टकाञ्चनः प्रहीणकोशोगतसन्धिविग्रहः । अपेतनिन्दा
स्तुतिरप्रियाप्रियश्चरन्नुदासीनवदेषभिक्षुकः ॥ ९२ ॥ अशिल्पजीवीगुणवांश्चनित्यं जितेन्द्रियःसर्वतोविप्रयुक्तः । अनो
कशायीलघुरल्पप्रचार श्चरन्देशानेकचरःसभिक्षुकः ॥ ९३ ॥ लाभंसाधारणंनेच्छेन्नाभिभुञ्जीतपूजितः । अभिपूजितलाभंहि

मु० सा० जुगुप्सेतैवतादृशः ॥ ९४ ॥ शून्यागारंवृक्षमूलमारण्यमथवागुहाम्। अज्ञातचर्यांगत्वान्यांततोन्यचैवसंविशेत् ॥ ९५ ॥ याज्ञव
५८ ल्क्यः। अकार्यकारिणांदानंवेगोनद्याश्चशुद्धिकृत्। शोध्यस्यमृच्चतोयञ्चसन्न्यासोऽथद्विजन्मनाम् ॥ ९६ ॥ अङ्गिरस०। षष्टि
कुलान्यतीतानिषष्टिश्चागामिकानिच। कुलान्युद्धरतेप्राज्ञःसन्न्यस्तमितियोवदेत् ॥ ९७॥ वाक्यसं०। एवंविद्वद्यतेर्धर्माःसङ्क्षे
पेणेहदर्शिताः। तेचसेव्याःप्रयत्नेनान्यैरपियतिभिःसदा ॥ ९८ ॥ विविदिषुस्तुसन्न्यासीतत्त्वज्ञंवेदपारगं। उपेयाद्व्रह्मवोधाया
चार्यंशुश्रूषयान्वितः ॥ ९९ ॥ ननुव्रह्मविदाचार्यंविनाप्राक्श्रुतशास्त्रतः। तर्केणवात्मवोधःस्यात्तस्मैयत्नःपुनर्वृथा ॥ ५०० ॥ मैवं
व्रह्मविदाचार्यंविनावोधोनसम्भवेत्। प्राक्श्रुततर्कशास्त्रेणह्याचार्यवानितिश्रुतेः ॥ १ ॥ तर्कस्यवेदवाह्यस्यनास्त्यात्मज्ञानहेतु
ता। नैषातर्केणचाप्याधीरितिश्रुत्यानिषेधनात् ॥ २॥ तज्ज्ञानार्थमितिश्रुत्यातद्विद्धीतिस्मृतेस्तथा। गुरूपगमनंकार्यंव्रह्मज्ञाना
यभिक्षुणा ॥ ३ ॥ अमानित्वादिभिर्युक्तस्तथाऽद्वेष्टादिभिर्यतिः। शृणुयात्तत्त्वमस्यादिवाक्यानिस्वगुरोर्मुखात् ॥ ४ ॥ ज्ञानायश्रव
णादीनिकार्याणीत्यव्रवीच्छ्रुतिः। तथातल्लक्षणादीन्याचार्यैरुक्तानिवैस्फुटम् ॥ ५ ॥ तथाचश्रुतिः। श्रोतव्यःश्रुतिवाक्येभ्योमन्तव्य ५८

रिसंस्मरणंपरम् ॥ ६३ ॥ तस्मादहर्निशंविष्णुंसंस्मरेत्पुरुषोमुने। नयातिनरकंशुद्धःसंक्षीणाऽखिलपातकः ॥ ६४ ॥ स्कन्दपु
राणे। अभक्ष्यभक्षणात्पापमगम्यगमनादिजम्। नश्यतेन।चसन्देहोगोविन्दस्यप्रकीर्त्तनात् ॥ ६५ ॥ तन्नास्तिकर्मजंलोकेवाग्जं
मानसमेववा। यत्तुनक्षीयतेपापंकलौगोविन्दकीर्त्तनात् ॥ ६६ ॥ आपस्तवा०। जपाञ्ज्ञाना त्तथाध्यानान्नान्यद्विद्योस्तुशोधनम्।
तस्मा त्तानिसदाकुर्याद्यतिःशुद्ध्यर्थमात्मनः ॥ ६७ ॥ ध्यानेनसदृशंनास्तिशोधनंपापकर्मणाम्। श्वपाकेष्वपिभुञ्जानोध्यायीनैव
तुलिप्यते ॥ ६८ ॥ इतिप्रायश्चित्तविधिः। वाक्यसंग्रहकृद्दा०। किम्बहुलेखनेनेहसङ्क्षेपादिदमुच्यते। त्यागोविषयमात्रस्यक
र्त्तव्योऽखिलभिक्षुभिः ॥ ६९ ॥ सन्न्यासाश्रममासाद्ययोविषयेषुसज्जते। स्वगुणख्यातिसञ्जीवीसभिक्षुःसर्वतोधमः ॥ ७० ॥ स्वस्त्रे
योऽर्थकृताऽऽयासःस्वधर्माणाञ्चगूहकः। परदोषाऽप्रवादीचसभिक्षुस्तूत्तमःस्मृतः ॥ ७१ ॥ सर्वारम्भपरित्यागीसदैवान्तर्मुख
श्चयः। ब्रह्माभ्यासपरोनित्यंसभिक्षुर्भिक्षुरुच्यते ॥ ७२ ॥ भिक्षान्नमात्रसम्भोजीकन्थाकौपीनसङ्ग्रही। श्रवणादिरतोयश्चस
भिक्षुर्मोक्षमाप्नुयात् ॥ ७३ ॥ तुष्टयोभिक्षुणाहेयामोक्षाध्वप्रतिबन्धिकाः। अन्यथान्यासतुष्ट्यायंमोक्षमार्गात्पतेद्यतिः ॥ ७४ ॥

मु० सा० नदेशोनचकालोस्तिनहिंसागुरुकर्मणि। सर्वत्रैवानुकूलःस्यादेतावान्धर्मसंग्रहः। नोदाहरेदस्यनामपारोक्षमपिकेवलम्॥ १७॥
५९ गुरोर्यत्रपरिवादोनिन्दावापिप्रवर्त्तते। कर्णौतत्रपिधातव्यौगन्तव्यंवाततोऽन्यतः॥ १८॥ संप्रदायविदः। वेदान्तश्रवणारम्भे
प्रणामाद्वादशस्मृताः। गुरोर्यथावदन्तेतुषट्प्रणामाःप्रकीर्त्तिताः॥ १९॥ उरसाशिरसादृष्ट्यामनसाश्रद्धयाऽपिच। पद्भ्यांक
राभ्यांकर्णाभ्यांप्रणामोष्टाङ्गउच्यते॥ २०॥ अष्टाक्षरेणमन्त्रेणयतयोयैर्नमस्कृताः। स्मृतनारायणाघ्नन्तिनराणांपापपञ्जरम्॥
२१॥ वाक्यसं०। एवंगुरुमुपागम्यततोज्ञानमवाप्यच। ब्रह्मात्माऽज्ञाननाशेनब्रह्मैवभवतिस्वयम्॥ २२॥ नन्वेवंब्रह्मबोधोऽस्तु
शिष्यस्यगुरुवाक्यतः। अधिकारीतथाप्यस्यजीवोन्योवेतिसम्वद॥ २३॥ शृणुत्वंब्रह्मबोधस्याधिकारीब्रह्मनापरः। यतोऽज्ञा
नेनजीवत्वंब्रह्मणास्वेप्रकल्पितम्॥ २४॥ राधेयतेवकौन्तेयेसिंहेचाप्यजतायथा। राजपुत्रेचभिल्लत्वंतथाब्रह्मणिजीवता॥
२५॥ ब्रह्मैववस्तुतोमुक्तंज्ञेयत्वंप्रतिपद्यते। जीवत्वंचाप्यबोधेनातोऽर्हतितन्मुमुक्षुताम्॥ २६॥ ननुविद्याधिकारित्वंब्रह्मणि ५९
नार्हतीतिचेत्। किंनेच्छसेजगत्सर्वमज्ञानात्तत्रकल्पितम्॥ २७॥ अविद्योपाधिकन्त्वेतृवेद्यन्त्वनिरुपाधिकम्। ब्रह्मातःकर्म

कर्तृत्वमेकस्याचनदूषणम् ॥ २८ ॥ अतोऽविद्याविनाशायगुरुतोज्ञानलब्धये । विविदिषुर्गुरुंब्रूयाद्गुरोध्यापयमामिति ॥ २९ ॥ सचेदाहपृच्छत्वंमांतदापृच्छेत्तुभक्तितः । लिङ्गत्रऽलिङ्गत्रथवान्यासीयोनोक्तसाधनान्वितः ॥ ३० ॥ एवंरामप्रसादेनप्रकरणंचतुर्थकम् । समाप्तंयतिधर्माणांविस्तरेणनिरूपकम् ॥ ५३१ ॥ १३२८ ॥ इतिश्रीमुमुक्षुसर्वस्वसारसंग्रहाख्येनिबन्धेसन्यासप्रकरणंचतुर्थंसंपूर्णम् ॥

हरिरोन्तत्सत् । श्रीगणेशायनमः । यतउत्पद्यतेविश्वंयत्सत्तयाचसंस्थितम् । यस्मिंश्चप्रलयंयातितंश्रीरामंनमाम्यहम् ॥ १ ॥ येषांवाक्योपदेशेनाऽज्ञानंविगलितंमम । तान्परब्रह्मरूपान्वैनौमिस्वसद्गुरूनपि ॥ २ ॥ चतुर्भिःसाधनैर्युक्तःकश्चिच्छुद्धमनायतिः । प्रणम्यस्वगुरुंभक्त्यापृष्टवांस्तंमुमुक्षया ॥ ३ ॥ भोभगवन्नहंभीतोजन्मादिदुःखसागरात् । अतस्तत्तरणोपायंसंक्षिप्यकृपयावद ॥ ४ ॥ सचतद्वचनंश्रुत्वागुरुराहदयानिधिः । माभैष्टसोम्यदुःखात्त्वंत्वयापृष्टंवदाम्यहम् ॥ ५ ॥ तत्त्वमस्यादिवाक्योत्थमात्मब्रह्मैक्यगोचरम् । यज्ज्ञानंतत्तुदुःखाब्धेःसन्तरणस्यसाधनम् ॥ ६ ॥ ऐक्यज्ञानंविनानान्यदस्त्यात्माज्ञाननाशकम् ।

तन्नाशश्चविनानास्तिजन्मादिदुःखसङ्क्षयः ॥ ७ ॥ ऋतेज्ञानान्नमोक्षोस्तिनान्यःपन्थाविमुक्तये। ज्ञात्वातंमृत्युमत्येतीत्याद्याहि

श्रुतयोजगुः ॥ ८ ॥ श्रुतिः। यदाचर्मवदाकाशंवेष्टयिष्यन्तिमानवाः। तदादेवमविज्ञायदुःखस्यान्तोभविष्यति ॥ ९ ॥ वाक्य
संग्रहकृद्वाक्यानि। तस्मात्स्वीकुरुहेसोम्यजन्मादिदुःखसागरात्। जीवब्रह्मैक्यविज्ञानंप्लवंसन्तरणायवै ॥ १० ॥ कोजीवःकिं
परंब्रह्मचैक्यंस्वामिंस्तयोःकथम्। कथञ्चतत्त्वमस्यादिवाक्यंतत्प्रतिपादयेत् ॥ ११ ॥ शृणुष्वसावधानःसन्नान्योजीवस्त्वमेव
हि। अहमेवास्मिकःस्वामिंस्त्वंब्रह्मासीतिनिश्चिनु ॥ १२ ॥ वेदवाक्यानिभाषन्तेवत्सतेब्रह्मरूपताम्। दुःखशान्त्यैचसन्त्यागंशृणु
तानिवदामिते ॥ १३ ॥ श्रुतयः। एकमाद्यन्तरहितंचिन्मात्रममलंततं। खादप्यतितरांसूक्ष्मंतद्ब्रह्मासिनसंशयः ॥ १४ ॥
चिदिहास्तीतिचिन्मात्रमिदंचिन्मयमेवच। चित्त्वंचिदहमितिचलोकाश्चिदितिविभावय ॥ १५ ॥ यत्परंब्रह्मसर्वात्माविश्व
स्यायतनंमहत्। सूक्ष्मात्सूक्ष्मतरंनित्यंतत्त्वमेवत्वमेवतत् ॥ १६ ॥ आदिमध्यावसानेषुदुःखंसर्वमिदंयतः। तस्मात्सर्वंपरित्य
ज्यतत्त्वनिष्ठोभवानघ ॥ १७ ॥ सवव्यापारमुत्सृज्यअहंब्रह्मेतिभावय। अहंब्रह्मेतिनिश्चित्यअहंभावंपरित्यज ॥ १८ ॥ निद्रा

श्चोपपत्तिभिः। श्रुत्वाचसततंध्यायेदेतेदर्शनहेतवः॥ ६॥ सर्वज्ञमुनिवा०। शब्दशक्तिविषयंनिरूपणं युक्तितःश्रवणमुच्यते वुधैः। वस्तुतत्त्वविषयंनिरूपणं युक्तितोमननमित्युदीर्यते॥ ७॥ चेतसस्तुचितिमात्रशेषता ध्यानमित्यभिवदन्तिवैदिकाः। अन्तरङ्गमित्थमीरितं तत्कुरुष्वपरमात्मवुद्धये॥ ८॥ आप्तवा०। श्रुतेःशतगुणंविद्यान्मननंमननादपि। निदिध्यासोलक्ष गुणोथानन्तंनिर्विकल्पकम्॥ ९॥ वार्त्तिककृद्वा०। श्रवणादिक्रियातावत्कर्त्तव्येहप्रयत्नतः। यावद्यथोक्तविज्ञानमाविर्भवतितत्त्वतः॥॥ १०॥ नियमःपरिसंख्यावाविध्यर्थोपिभवेद्यतः। अनात्माऽदर्शनेनैवपरात्मानमुपास्महे॥ ११॥ वाक्यसं०। अज्ञानंवन्धहेतुर्हिविज्ञानंवन्धनाशकम्। तस्माद्ब्रह्मात्मविज्ञप्तैयकर्त्तव्यंश्रवणादिकम्॥ १२॥ व्यासः। गुरुमूलाःक्रियाःसर्वाभुक्तिमुक्तिफलप्रदाः। तस्मात्सेव्योगुरुर्नित्यंयुक्तार्थस्तुसमाहितैः॥ १३॥ श्रद्धयापरयायुक्तःसदाद्वादशसन्ध्ययोः। दण्डप्रणामान्कुर्वीतदेवतागुरुसन्निधौ॥ १४॥ गुरोर्नैवाऽप्रियंकुर्यात्पण्डितेऽपण्डितेपिवा। नाभासयेच्चतद्वाक्यंनावमानंसमाचरेत्॥ १५॥ गुरोश्चचक्षुर्विषयेनयथेष्टासनोभवेत्। नकुर्यान्नियमारम्भमनिवेद्यस्वकंगुरुम्। छायाभूतोऽपरित्यागीनित्यमेववसेद्गुरौ॥ १६॥ मनुः।

स्वात्मानमवधारय ॥ ३० ॥ किञ्चात्माभास्यदेहादेर्भासकत्वाद्विभिद्यते । काष्ठादेर्हियथैवाग्निस्तथाचायंततस्तथा ॥ ३१ ॥ चेत
नाऽधीनचेष्टावान्देहोनात्मारथादिवत् । जडत्वात्त्वंततस्तस्यप्रेरकमवधारय ॥ ३२ ॥ एवमन्नमयाद्भिन्नंज्ञात्वात्मानंहिचिद्घ
नम् । देहेस्वात्ममतिंत्यक्त्वाप्राणमयेपितांत्यज ॥ ३३ ॥ भौतिकत्वात्तथाप्राणोऽनात्माजडतयापिच । सुप्तौयतोनजानातिचौ
रादीन्सञ्चलन्नपि ॥ ३४ ॥ स्पर्शवत्त्वात्तथाप्राणोनात्माव्यजनवातवत् । करणत्वाच्चनात्माऽस्यप्राणेनेतिश्रुतेस्तुतत् ॥ ३५ ॥
नप्राणेननापानेनमर्त्त्योजीवतिकश्चन । इत्युक्त्वाकाठकश्रुत्याप्राणस्याऽनात्मतातथा ॥ ३६ ॥ क्षुत्पिपासावतःप्राणात्तथाऽपाना
दितोजडात् । भिन्नंप्रेरकमाधारंचैषांस्वमवधारय ॥ ३७ ॥ वागादयोप्यऽनात्मानःकरणत्वात्कुठारवत् । यत्सान्निध्याद्विचेष्ट
न्तेसोहंचिदितिनिश्चिनु ॥ ३८ ॥ प्राणमयस्यकोशस्यबुद्धैवंस्वंहिसाक्षिणम् । मनोमयाख्यकोशेपित्यजसौम्यात्मभावनाम् ॥ ३९ ॥
मनोमयोपिनैवात्माकरणत्वात्कुठारवत् । भौतिकत्वाच्चनात्मासद्दृश्यत्वाच्चप्रदीपवत् ॥ ४० ॥ चक्षुर्भवतिनैवात्माकरणत्वात्प्र
दीपवत् । रूपंयथैवदीपेनलभ्यतेचक्षुषातथा ॥ ४१ ॥ श्रोत्रादिष्वेवमेवोह्यमनात्मत्वंत्वयासदा । मत्प्रत्ययास्पदत्वाद्धैभौतिक ६१

त्वाच्चदाचवत्॥ ४२॥ श्रोत्रादीनिमनश्चैवंनैवात्मेतिविचारयन्। तेषांसाक्षिणमात्मानंसदात्वमवधारय॥ ४३॥ विकृतिमननुप्राप्तःसन्नऽयस्कान्तवत्तुयः। चालयेन्मनआदीनिसोहंचिदितिनिश्चिनु॥ ४४॥ मनोमयस्यकोशस्यज्ञात्वैवंस्वंहिसाक्षिणम्। विज्ञानमयकोशेपिजहिसौम्यात्मभावनाम्॥ ४५॥ बुद्धिरपिचनैवात्माऽदृश्यत्वात्करणत्वतः। तथायथाप्रदीपादिस्तथाचेयंततस्तथा॥ ४६॥ विज्ञानमयशब्देनश्रुत्याकर्त्ताप्रकीर्त्तितः। विज्ञानंतनुतेयज्ञमित्येवमाद्ययास्फुटम्॥ ४७॥ भोक्ताऽऽनन्दमयस्तद्वत्कार्यात्मामयटेरितः। कर्त्ताभोक्ताचनैवत्वंकिन्त्वानन्दोसिकेवलः॥ ४८॥ विज्ञानमयकोशस्यबुद्ध्वैवंत्वमनात्मतां। सौम्यानन्दमयेकोशेतथात्यजात्मभावनाम्॥ ४९॥ नात्मानन्दमयःकोशःशिरःपक्षादिमत्त्वतः। यथैवान्नमयःकोशस्तथाचायंततस्तथा॥ ५०॥ सौम्यानन्दस्त्वमेवासिकेवलोनन्तचिद्घनः। द्रष्टैवपञ्चकोशानांनत्वंकोशाःकदाचन॥ ५१॥ नत्वंह्यन्नेन्द्रियाणित्वंनजाग्रदादिमांस्तथा। अवस्थात्रयसाक्षीयःसोहमित्यवधारय॥ ५२॥ देहादिभिःसहाऽध्यासाद्भोक्तृत्वंतेनतुस्वतः। आत्मेन्द्रियमनोयुक्तंभोक्तेत्याहुरितिश्रुतेः॥ ५३॥ भगवन्जाग्रदादीनांलक्षणंत्वंसमीरय। तद्धर्मिणश्चतेषांमांजानीयांयेनसाक्षिणम्॥

मु० सा० ५४ ॥ जाग्रतोलक्षणंसौम्यतथातद्धर्मिणंशृणु । श्रुत्वातयोश्चयौद्रष्टासोहमित्यवधारय ॥ ५५ ॥ धीन्द्रियैर्विषयज्ञानंसत्वेनचतथै
६२ वयत् । तत्तद्देवप्रसादेनवुधैर्जाग्रत्तदीरितम् ॥ ५६ ॥ ससत्वेन्द्रियसङ्घातोजाग्रद्धर्म्मीतिकथ्यते । नत्वंसत्वेन्द्रियग्रामस्तत्साक्ष्य
सिनसंशयः ॥ ५७ ॥ एवंसौम्यनतेधर्मोजाग्रदपितुचेतसः । सेन्द्रियस्यैवतद्धर्मस्त्वंतत्साक्ष्येवकेवलः ॥ ५८ ॥ यथाजाग्रन्नतेधर्म
स्तथास्वप्नोपिनैवते । त्वंतुस्वप्नेस्वयंज्योतिरत्रायमितिचश्रुतेः ॥ ५९ ॥ वाह्येन्द्रियोपसंहारेजाग्रत्संस्कारजोहियः । वोधःसवि
षयःसोऽसौस्वप्नोभाष्यकृतेरितः ॥ ६० ॥ यथास्वप्नोमनोधर्मोधर्मःसुप्तिस्तथाधियः । वुद्धेःकारणरूपेणाऽवस्थानंसुप्तिरीरिता ॥
६१ ॥ जाग्रत्स्वप्नसुषुप्तीनांतथादेहत्रयस्यच । विश्वाद्याह्यभिमन्तारस्तद्द्रष्टात्वंह्यलुप्तदृक् ॥ ६२ ॥ स्वप्नोजागरणेनास्तिजाग्रत्स्व
प्नेतथैवन । सुप्तौतच्चद्वयंनास्तिसुप्तिश्चापितयोर्नहि ॥ ६३ ॥ अतस्तत्तुत्रयंमिथ्यागुणत्रयसमुद्भवम् । तासांयोनिर्गुणःसाक्षीसो
हमित्यवधारय ॥ ६४ ॥ जाग्रत्स्वप्नसुषुप्तीनांभावाभावौधियांतथा । जागरस्वप्नयोर्वेत्तिमनसश्चगमागमौ । सुप्तौचतल्लयंवेत्ति
सो० ॥ ६५ ॥ घटप्रकाशकोदीपोयथानघटधर्मवान् । सुप्त्यादिभासकस्तद्वन्नात्मासुप्त्यादिधर्मवान् ॥ ६६ ॥ अदेहत्वाच्चजन्मा ६२

यालोकवार्त्तायाःशब्दादेरात्मविस्मृतेः। क्वचिन्नावसरंदत्वाचिन्तयात्मानमात्मनि ॥ १९ ॥ वाक्यसं०। भगवन्सम्यगऽद्यापिप
दार्थान्नैववेद्म्यहम्। तत्त्वमेवेतिवाक्यार्थंजानीयांतुकथंवद ॥ २० ॥ सत्यंयदात्थवत्सत्वंवाक्यार्थप्रमिताविह। हेतुःपदार्थबोधो
स्तिपदार्थान्विद्ध्यहंब्रुवे ॥ २१ ॥ त्वंपदार्थस्त्वहंप्रत्यक्तत्पदार्थोमहेश्वरः। असीतिचतयोरैक्यमेवंज्ञेयंतुतच्चिकम् ॥ २२ ॥ यो
देहेन्द्रियहृत्साक्षीसच्चिदानन्दलक्षणः। तंनित्यानन्दमात्मानंजानीषेनकथंवद ॥ २३ ॥ वाह्येह्यात्मन्यहंभावंत्यक्त्वातथान्तरा
त्मनि। कारणाऽङ्गेचतंत्यक्त्वातेषांस्त्वंविद्धिसाक्षिणम् ॥ २४ ॥ अन्नमयाऽभिधःकोशोदेहोरूपादिमत्त्वतः। भौतिकत्वाच्चनात्मा
यंघटादिवत्सदैवहि ॥ २५ ॥ उपदेशसहस्त्र्यां। पार्थिवःकठिनोधातुर्द्रवोदेहेस्मृतोम्मयः। पक्तिचेष्टाऽवकाशाःस्युर्वह्निवा
य्वम्बरोद्भवाः ॥ २६ ॥ वाक्यसं०। इतिभाष्यकृताचोक्तादेहस्यभूतकार्यता। तस्मादनात्मकेदेहेत्यजत्वमात्मभावनाम् ॥ २७ ॥
अनात्मायदिदेहोयंरूपवत्त्वादिहेतुभिः। तर्हिलिङ्गिनमात्मानंस्पष्टंस्वामिन्समीरय ॥ २८ ॥ देहद्रष्टासदाभिन्नोघटद्रष्टेव
देहतः। द्रष्टृत्वात्त्वंस्वमात्मानंदेहाद्भिन्नंविनिश्चिनु ॥ २९ ॥ स्वभिन्नद्रष्टृकोदेहोदृश्यत्वाद्धिघटादिवत्। देहद्रष्टारमेवंवा

 नच। यस्मिन्नन्तेचलीयन्तेतद्ब्रह्मेत्यवधारय ॥ ७९ ॥ जन्माद्यस्ययतश्चेतिसूत्रंयस्याहलक्षणम्। तटस्थंसर्वहेतुत्वंतद्ब्रह्म० ॥
 ८० ॥ जीवरूपेणदेहेषुप्रवेशोयस्यचेरितः। प्रेरयतिचयोजीवांस्तद्ब्र० ॥ ८१ ॥ जीवान्यश्चापिकर्माणिकारयत्यग्रचेतनः।
तत्प्राक्कर्माऽनुरोधेनतद्ब्रह्म० ॥ ८२ ॥ यज्ज्ञानेनाखिलज्ञानंछान्दोग्यादिषुकीर्त्तितं। मृदादिबहुदृष्टान्तैस्त० ॥ ८३ ॥ वेद
श्चापियतोजातःसर्वज्ञाच्छ्वासवच्चितः। महत्तमाज्जगद्योनेस्त० ॥ ८४ ॥ घटादयोयथाऽनन्यामृदादेःस्वस्वकारणात्। तथाज
गद्यतोऽनन्यत्त० ॥ ८५ ॥ ब्रह्मसर्वात्मकंविद्धिसर्वंजगच्चचिन्मयम् ॥ ब्रह्मसर्वात्मताञ्चैश्रुतीरपिवदामिते ॥ ८६ ॥ श्रुतयः।
स्वयंब्रह्मास्वयंविष्णुःस्वयमिन्द्रःस्वयंशिवः। स्वयंविश्वमिदंसर्वंस्वस्मादन्यन्नकिञ्चन ॥ ८७ ॥ मरूभूमौजलंसर्वंमरूभूमात्रमेवतत्।
जगत्त्रयमिदंसर्वंचिन्मात्रंहिविचारतः ॥ ८८ ॥ एकंब्रह्मद्वयंब्रह्ममोहोब्रह्मशमादिकम्। दोषोब्रह्मगुणोब्रह्मदमःशान्तंविभुः
प्रभुः। लोकोब्रह्मगुरुर्ब्रह्मशिष्योब्रह्मसदाशिवः ॥ ८९ ॥ सर्वंचखल्विदंब्रह्मनित्यचिद्घनमक्षतम्। नत्वंनाहंनचान्यद्वासर्वं
ब्रह्मैवकेवलम् ॥ ९० ॥ वाक्यसं०। इत्यादिश्रुतिभिःप्रोक्तायस्यसर्वात्मतेशितुः। सच्चिदानन्दरूपस्यतद्ब्रह्मेत्यवधारय ॥ ९१ ॥

सत्यंज्ञानमनन्तम्ब्वेत्याहस्वरूपलक्षणां। तैतरेयश्रुतिर्यस्यतद्ब्रह्म०॥ ९२॥ तटस्थलक्षणांचैवंस्वरूपलक्षणांतथा। ब्रह्मण:सोम्यतं
प्रोक्तंमयावेदप्रमाणत:॥ ९३॥ तत्त्वमोर्योर्हिवाच्यार्थोलक्ष्यार्थश्चगुरोत्वया। विस्तरेणपुराप्रोक्त:सङ्क्षेपात्तंपुनर्वद॥ ९४॥
शृणुसौम्यब्रुवेतेहंतत्त्वमर्थौसमासत:। पुनस्तेसुखबोधार्थंवाक्यार्थेचप्रवृत्तये॥ ९५॥ चेतनोज्ञादिधर्मान्योह्यारोप्यात्मन्यविद्य
या। कर्त्तृत्वाद्यभिमानीसत्वंपदवाच्यईरित:॥ ९६॥ सर्वदेहेषुय:प्रत्यग्बोधोदेहादिभासक:। कर्त्तृत्वादिभिरस्पृष्टोलक्ष्यार्थ
स्त्वंपदस्यस:॥ ९७॥ वेदवेद्यंजगद्बीजंसर्वज्ञत्वादिधर्मकं। यच्चैतन्यंहितद्धिवाच्यार्थंतत्पदस्यवै॥ ९८॥ सर्वोपाधिविमुक्तंय
त्कार्यकारणवर्जितम्। निर्विशेषंचिदानन्दंलक्ष्यार्थस्तत्पदस्यतत्॥ ९९॥ पदानांतत्त्वमादीनांप्रागर्थाःप्रदर्शिता:। वाक्या
र्थबोधसंसिद्ध्यैवाक्यार्थंत्वद्यसंशृणु॥ १००॥ तत्त्वमस्यादिवाक्येषुतत्त्वमादिपदार्थयो:। तादात्म्यमेववाक्यार्थोस्त्यखण्डैक्यरसा
त्मक:॥ १॥ प्रत्यग्बोधस्त्वमर्थोय:सोद्वयानन्दरूपक:। तदर्थोयोद्वयानन्द:सप्रत्यग्बोधरूपक:॥ २॥ एवंपरस्पराभेदज्ञानंयदा
हिसम्भवेत्। अब्रह्मत्वमनात्मत्वंनिवर्त्ततेतदातयो:॥ ३॥ अखण्डएववाक्यार्थोवाक्यंचाखण्डबोधकम्। त्वंचाखण्डस्वरूपो

सिप्रत्यग्ब्रह्मैक्यविग्रहः ॥ ४ ॥ संसर्गोवाविशिष्टोवावाक्यार्थोनात्रसम्भवेत्। भाष्यवार्त्तिककाराभ्यांतन्निषेधोयतःकृतः ॥
५ ॥ यस्मादखण्डमेवाहतत्त्वमस्यादिकंवचः। नसंसर्गविशिष्टार्थौततोखण्डंविनिश्चिनु ॥ ६ ॥ वाच्यार्थौतत्त्वमोर्हित्वालक्ष्यार्थौ
परिगृह्यच। तत्त्वमस्यादिवाक्यंहिसमर्थमैक्यबोधने ॥ ७ ॥ सर्वज्ञत्वाऽल्पबोद्धृत्वेतथाप्रत्यक्परोक्षते। एकस्यहिविरुद्धोतेल
क्षणाऽतःप्रवर्त्तते ॥ ८ ॥ प्रत्यक्षादिविरोधेनशक्यार्थस्यापरिग्रहे। याशक्यार्थेनसंबद्धेवृत्तिःसालक्षणोच्यते ॥ ९ ॥ लक्षणात्रि
विधाप्रोक्ताजहत्यादिप्रभेदतः। तत्त्वमस्यादिवाक्येषुलक्षणाभागलक्षणा ॥ १० ॥ गङ्गायांघोषइत्येवंजहतीहनलक्षणा। भवेन्ना
जहतीचात्रशोणोधावतिवाक्यवत् ॥ ११ ॥ सोयंपुरुषइत्यादिवाक्येष्विवात्रकीर्त्तिता। जहदजहदाख्याहिलक्षणावाक्यकोविदैः
॥ १२ ॥ भागलक्षणयाचैवंसोयमित्यादिवाक्यवत्। तत्त्वमस्यादिवाक्यानिबोधयन्त्यैक्यमादरात् ॥ १३ ॥ पदयोरिहसम्बन्धःसा
मानाधिकरण्यकः। पदार्थयोस्तुसम्बन्धोविशेषणविशेष्यता ॥ १४ ॥ लक्ष्यलक्षणसम्बन्धःपदार्थप्रत्यगात्मनां। सम्बन्धैस्त्रिभि
राहैवमखण्डार्थंश्रुतिःस्फुटम् ॥ १५ ॥ एवंतत्त्वमसीत्यादिवाक्यमखण्डबोधकं। अतोत्रसंशयोनास्तित्वंब्रह्मास्यद्वयंसदा ॥ १६ ॥

द्या:षड्विकारानतेतथा। गोत्रवर्णाऽऽश्रमाद्याश्चनतेधर्माहिसौम्यभो ॥ ६७ ॥ क्षुत्पिपासेनतेधर्मौशोकमोहौतथानते। अप्रा
णाह्यमना:शुभ्रइतिश्रुत्यनुशासनात् ॥ ६८ ॥ दारपुत्रादयोभावायदर्थत्वेननु:प्रिया:। सर्वेभ्योतिप्रियोह्यात्मासोहमित्यवधारय
॥ ६९ ॥ परप्रेमास्पदत्वेनमानभूवमहंसदा। भूयासमितियोवेत्तिसोहमि० ॥ ७० ॥ भगवन्सुखरूपश्चेदात्माऽयंसंसरेत्कथं।
स्वतोवापरतोवाऽस्यसंसारोस्तीतिमेवद ॥ ७१ ॥ शृणुवत्सस्वतोनास्तिसंसार:प्रत्यगात्मन:। किंत्वज्ञाद्यऽविवेकेनसंसारोस्या
विकारिण: ॥ ७२ ॥ घटजन्मादिकंयद्वद्घटाकाशेप्रकल्प्यते। देहजन्मादिकंतद्वत्कूटस्थेत्वयिकल्प्यते ॥ ७३ ॥ साक्षित्वम
पितद्वत्स्यादविद्योपाधिनाऽऽत्मनि। अविद्यामात्रसंयुक्त:साक्ष्यात्मेतिशिवोक्तित: ॥ ७४ ॥ अतोऽन्त:करणाऽध्यासादविद्याया
श्चयोगत:। संसारित्वञ्चसाक्षित्वमात्मनोनतुवस्तुत: ॥ ७५ ॥ बुद्धिकृताऽवच्छेदेनजीवत्वंचितिकेचन। प्राहुस्तत्त्वप्रतीच्य
न्येबुद्धौचित्प्रतिबिम्बनात् ॥ ७६ ॥ बन्धमोक्षव्यवस्थार्थंप्रतिदेहञ्चभिन्नतां। बदन्त्येकेहिजीवस्यप्राहुश्चान्येतदेकताम् ॥ ७७ ॥
त्वमर्थोदर्शितोह्येवंविस्तराद्वत्सतेमया। अधुनातत्पदार्थंतेब्रुवेश्रुत्यनुसारत: ॥ ७८ ॥ खादिभूतानिजायन्तेयतोधृतानिये

मु० सा० न्द्रियाऽतीतंवस्त्वत्वंपदेरितम्। एकतागृह्यतेऽसीतितदैक्यमनुभूयताम्॥ २९॥ स्वप्रकाशाऽपरोक्षत्वमयमित्युक्तितोमतम्।
६५ अहङ्कारादिदेहान्तात्प्रत्यगात्मेतिगीयते॥ ३०॥ दृश्यमानस्यसर्वस्यजगतस्तत्त्वमीर्यते। ब्रह्मशब्देनतद्ब्रह्मस्वप्रकाशात्मरूप
कम्॥ ३१॥ मायाऽविद्येविहायैवउपाधीपरजीवयोः। अखण्डंसच्चिदानन्दंपरंब्रह्मविलक्ष्यते॥ ३२॥ आद्योरातत्पदार्थःस्या
न्मकारस्त्वम्पदार्थवान्। तयोःसंयोजनमसीत्यर्थेतत्त्वविदोविदुः॥ ३३॥ क्षीरंक्षीरेयथाक्षिप्तंतैलंतैलेजलंजले। संयुक्त
मेकतांयातितथात्मन्यात्मविन्मुनिः॥३४॥ घटेनष्टेयथाव्योमव्योमैवभवतिस्वयम्। तथैवोपाधिविलयेब्रह्मैवब्रह्मवित्स्वयम्॥ ३५॥
वाक्यसं०। एवंवाक्यैःपरिज्ञात्वास्वस्यब्रह्मस्वरूपताम्। सर्वथासर्वकालेषुतन्निष्ठस्त्वंभवानघ॥ ३६॥ बहुनाकिमिहोक्तेनसंक्षे
पान्निर्णयंशृणु। अहंब्रह्मजगन्मिथ्यैवेतिज्ञात्वाविमुच्यते॥ ३७॥ जीवस्यब्रह्मणाऽभेदस्त्वयागुरोप्रपञ्चितः। विस्तराज्जगतो
ऽसत्त्वंनोक्तमतस्तुतद्वद॥ ३८॥ शृणुसौम्यवदामितेमिथ्यात्वंजगतोप्यहं। जगन्मिथ्यैवदृश्यत्वाद्रज्जुसर्पादिवत्सदा॥ ३९॥
श्रुतयश्चतथाप्राहुर्जगतोऽसत्स्वरूपताम्। ताश्चापिशृणुसौम्यत्वंजगतोऽसत्त्वबुद्धये॥ ४०॥ श्रुतयः। प्रपञ्चोयदिविद्येतनिवर्त्ते ६५

तनसंशयः। मायामात्रमिदंद्वैतमद्वैतंपरमार्थतः ॥ ४१ ॥ विकल्पोविनिवर्त्तेतकल्पितोयदिकेनचित्। उपदेशादयंवादोज्ञाते द्वैतंनविद्यते ॥ ४२ ॥ द्वितीयकारणाभावादनुत्पन्नमिदंजगत्। यथैवेदंनभःशून्यंजगच्छून्यंतथैवहि ॥ ४३ ॥ वन्ध्याकुमारवचने भीतिश्चेदस्तिवदंजगत्। शशशृङ्गेणनागेन्द्रोमृतश्चेज्जगदस्तितत् ॥ ४४ ॥ मृगतृष्णाजलंपीत्वातृप्तिश्चेदस्त्विदंजगत्। गन्धर्व नगरेसत्येजगद्भवतिसर्वदा ॥ ४५ ॥ गगनेनीलिमासत्येजगत्सत्यंभविष्यति। मासात्पूर्वंमृतोमर्त्त्योह्यागतश्चेज्जगद्भवेत् ॥ ४६ ॥ गोस्तनादुद्भवंचीरंपुनरारोपणेजगत्। ज्वालाग्निमण्डलेपद्मवृद्धिश्चेज्जगदस्त्विदम् ॥ ४७ ॥ ज्ञानिनोहृदयंमूढैर्ज्ञातं चेदस्त्विदंजगत्। अजाकुचौजगन्नास्तिब्रह्मात्मकुचौजगन्नहि ॥ ४८ ॥ सर्वथाभेदकलनंद्वैताऽद्वैतंनविद्यते। नास्तिनास्ति जगत्सर्वंगुरुशिष्यादिकंनहि ॥ ४९ ॥ वाक्यसं०। मिथ्यात्वेजगतःस्वामिन्स्याद्वेदादेर्मृषात्मता। मिथ्याभूतात्ततोज्ञानंब्रह्म णःस्यात्कथंवद ॥ ५० ॥ शृणुस्वमस्यसिंहेनमिथ्याभूतेनबोधनम्। दृष्टंयथैवनिद्रातोवेदादेःस्यात्तथात्मधीः ॥ ५१ ॥ एवंश्रुत्यादि भिर्वाक्यैर्ज्ञात्वाजगन्मृषात्मताम्। परिशिष्टञ्चयद्ब्रह्मतत्त्वंनेतीतिबोधितम् ॥ ५२ ॥ भगवन्नेतिनेतीतिश्रुतेरप्यर्थमीरय। येन

स्वान्यनिषेधेनाहंविद्यांस्वपरमात्मताम् ॥ ५३ ॥ उच्यतेऽनात्ममात्रस्यनिषेधावधित्वेनयत् । उर्वितंतत्परंब्रह्मनेतिनेतीतिवो
धितम् ॥ ५४ ॥ इतिशब्दद्वयेनात्राखिलंदृश्यमनूद्यते । नकारेणनिषेधश्चवीप्सयातस्यकथ्यते ॥ ५५ ॥ मूर्त्तंवामुर्त्तमज्ञानंवास
नावाधिदैवतम् । अध्यात्मंवाऽखिलंतद्धिनकाराभ्यांनिषिध्यते ॥ ५६ ॥ वार्त्तिकसारवा० । अहंशब्दोबुद्धिवाचीसाक्षिणंल
क्षयेद्यथा । निषेधकोनकारोपिसाक्षिणंलक्षयेत्तथा ॥ ५७ ॥ ब्रह्मशब्दोजगद्धेतुवाचीचिन्मात्रलक्षकः । इतिशब्दोजगन्मात्रवा
चीचिन्मात्रलक्षकः ॥ ५८ ॥ अखण्डैक्यरसस्तुल्योवाक्यार्थोवाक्ययोर्द्वयोः । उक्तार्थस्यैवदार्ढ्यायद्विर्नेतीतिवचःश्रुतम् ॥ ५९ ॥
अथवाचेतिशब्दौद्वौजीवेशोपाधिवाचिनौ । नकाराभ्यामुपाधिद्वौनिषिध्यब्रह्मलक्ष्यते ॥ ६० ॥ वाक्यसं० । इतिवार्त्तिकसारे
त्वहंब्रह्मास्मीतिवाक्यवत् । तत्त्वमोरैक्यवित्तस्मैरयोजितंनेतिनेत्यपि । सर्वथान्यनिषेधेनयच्छिष्टंचित्त्वमेवतत् ॥ ६१ ॥ स्वामि
न्दृश्यनिषेधेनावशिष्टब्रह्मबोधिकाः । श्रुतीश्चापिवदाद्यत्वमितिचेच्छृणुताअपि ॥ ६२ ॥ श्रुतयः । कार्योपाधिरयंजीवःकारणो
पाधिरीश्वरः । कार्यकारणतांहित्वापूर्णबोधोऽवशिष्यते ॥ ६३ ॥ यावद्यावन्मुनिश्रेष्ठःस्वयंसन्त्यजतेऽखिलम् । तावत्तावत्परो

त्वंसन्मात्रात्मकःसौम्यपूर्णोऽद्वितीयचिद्घनः। सुखरूपोस्यसंसारीमहावाक्यैर्हिलक्षितः ॥ १७ ॥ यथातत्त्वमसीत्यादेरखण्डै
कार्थतोदिता। तथासत्यादिवाक्यानांबोध्याखण्डार्थनिष्ठता ॥ १८ ॥ अखण्डार्थस्यबोधिन्योऽन्याअपिसन्तिभूरिशः। श्रुतयस्ता
वदामीहकाश्चनशृणुवत्सभो ॥१९॥ श्रुतयः। अखण्डैकरसंप्राणमखण्डैकरसान्वयी। अखण्डैकरसोदेहअखण्डैकरसंमनः।२०।
अखण्डैकरसंसूत्रमखण्डैकरसोविराट्। अखण्डैकरसाविद्याअखण्डैकरसोऽव्ययः ॥२१॥ ननिरोधोनचोत्पत्तिर्नबद्धोनचसाध
कः। नमुमुक्षुर्नबैमुक्तइत्येषापरमार्थता ॥ २२ ॥ पादाभावान्नगतिर्नास्तिहस्ताऽभावात्क्रियानच। मृत्युर्नास्तिजन्माऽभावाद्बुद्ध्यऽभा
वात्सुखादिकम् ॥ २३ ॥ येनेक्षतेशृणोतीदंजिघ्रतिव्याकरोतिच। स्वाद्वऽस्वादुविजानातितत्प्रज्ञानमुदीरितम् ॥ २४ ॥
चतुर्मुखेन्द्रदेवेषुमनुष्याश्वगवादिषु। चैतन्यमेकंब्रह्मातःप्रज्ञानंब्रह्ममय्यपि ॥ २५ ॥ परिपूर्णःपरात्माऽस्मिन्देहेविद्याधिकारि
णि। बुद्धेःसाक्षितयास्थित्वास्फुरन्नहमितीर्यते ॥ २६ ॥ स्वतःपूर्णःपरात्माचब्रह्मशब्देनवर्णितः। अस्मीत्यैक्यपरामर्शात्तेन
ब्रह्मभवाम्यहं ॥ २७ ॥ एकमेवाऽद्वितीयंसन्नामरूपविवर्जितम्। सृष्टेःपुराधुनाप्यस्यताद्दक्त्वंतदितीर्यते ॥ २८ ॥ श्रोतुर्देह

मु० सा० ॥ ७६ ॥ शास्त्राण्यधीत्यमेधावीअभ्यस्यचपुनःपुनः । परमंब्रह्मविज्ञायउल्कावत्तान्यथोत्सृजेत् ॥ ७७ ॥ स्वप्नेपियोहिमुक्तःस्याज्जा
६७ ग्रतीवविशेषतः । ईदृक्चेष्टःस्मृतःश्रेष्ठोवरिष्ठोब्रह्मवादिनाम् ॥ ७८ ॥ इहैवसन्तोऽथविद्मस्तद्वयंनचेदवेदिर्महतीविनष्टिः ।
यएतद्विदुरमृतास्तेभवन्त्यथेतरेदुःखमेवापियन्ति ॥ ७९ ॥ वाक्यसं० । एवंसौम्यमयातुभ्यंज्ञानान्मोक्षप्रदर्शिकाः । श्रुतयोदर्शि
ताःकिंत्वंभूयःप्रष्टुंहिवाञ्छसि ॥ ८० ॥ गुरोकिंविदुषःकर्मकर्त्तव्यंस्वेष्टलब्धये । तथानिष्टप्रहाणायाऽस्तिनवेत्यद्यमेवद ॥ ८१ ॥
सौम्यनैवास्तिकर्त्तव्यासम्यग्ज्ञानवतःक्रिया । दृष्टाऽनिष्टस्यमिथ्यात्वात्किमिच्छेत्किंत्यजेद्बुधः ॥ ८२ ॥ श्रुत्यास्मृत्यापिचार्थोयं
सौम्यस्फुटंप्रदर्शितः । संगृह्णाम्यचतेप्यद्यतेसंशयस्यछित्तये ॥ ८३ ॥ श्रुतिः । नैष्कर्म्येणनतस्यार्थस्तस्यार्थोऽस्तिनकर्मभिः ।
नसमाधानजप्याभ्यांयस्यनिर्वासनंमनः ॥ ८४ ॥ स्मृतिः । ज्ञानाऽमृतेनतृप्तस्यकृतकृत्यस्ययोगिनः । नैवास्तिकिञ्चित्कर्त्तव्यमस्ति
चेन्नसतत्त्ववित् ॥ ८५ ॥ वाक्यसं० । वहुनाकिमिहोक्तेनसङ्क्षेपात्त्वमिदंशृणु । विधिनिषेधवाक्यैश्चनात्मज्ञानीनियुज्यते ॥ ८६ ॥ ६७
ननुविधिनिषेधाभ्यांनप्रेर्य्योब्रह्मविद्यदा । यथेष्टाचरणंतस्यतदापतेद्बलादिह ॥ ८७ ॥ मैवंरागवतोदृष्टंयथेष्टाचरणंयतः ।

ब्रह्मविदोविरक्तस्यतत्प्रसक्तिःकुतोभवेत् ॥ ८८ ॥ नैष्कर्म्यसिद्धिकर्तृभिरर्थोयंसुनिरूपितः । तद्वाक्यानिपठामित्वत्कृताऽऽक्षेप
निवृत्तये ॥ ८९ ॥ वार्त्तिककृद्वा० । बुद्धाऽद्वैतसतत्त्वस्ययथेष्टाचरणंयदि । शुनांतत्त्वविदांचैवकोभेदोऽशुचिभक्षणे ॥ ९० ॥
अधर्माज्जायतेज्ञानंयथेष्टाचरणंततः । धर्मकार्यंकथंतत्स्याद्यत्रधर्मोपिनेष्यते ॥ ९१ ॥ क्षुधयापीड्यमानोपिनविषंह्यत्तुमिच्छति ।
मिष्टान्नध्वस्ततृड्जानन्नामूढस्तज्जिघत्सति ॥ ९२ ॥ वाक्यसं० । तस्माद्रागवदज्ञानांयथेष्टाचरणंभवेत् । नैवतद्वीतरागाणां
जीवन्मुक्तमहात्मनां ॥ ९३ ॥ जीवन्मुक्तिस्वरूपंमेजीवन्मुक्तस्यलक्षणम् । तथात्वंकृपयाब्रूहिगुरोश्रुत्यादिमानतः ॥ ९४ ॥ सौम्य
रागादिदोषाणांब्रह्माभ्यासादिनाह्रिया । चित्तात्तिरष्कृतिःसम्यक्साजीवन्मुक्तिरुच्यते ॥ ९५ ॥ रागादिदोषशून्योयश्चिन्मात्र
निष्ठमानसः । सर्वत्रसमबुद्धिश्चसजीवन्मुक्तउच्यते ॥ ९६ ॥ श्रुतिस्मृत्यादिवाक्यानिमानान्यर्थेऽत्रभूरिशः । सन्तितेषुश्रुतीस्ता
वत्समासतोवदामिते ॥ ९७ ॥ श्रुतयः । अहंब्रह्माऽस्म्यहंब्रह्मास्म्यऽहंब्रह्मेतिनिश्चयः । चिदहंचिदहंचेतिसजीवन्मुक्तउच्य
ते ॥ ९८ ॥ मौनवान्निरहंभावोनिर्मानोमुक्तमत्सरः । यःकरोतिगतोद्वेगःस० ॥ ९९ ॥ सर्वेच्छाःसकलाःशङ्काःसर्वेहाःसर्वनि

श्चयाः। धियायेनपरित्यक्ताःस० ॥ २०० ॥ यस्यनाहङ्कृतोभावोबुद्धिर्यस्यनलिप्यते। कुर्वतोऽकुर्वतोवापिस० ॥ १ ॥ यावतीदृश्य
कलनासकलेयंविलोक्यते। सायेनसुष्ठुसन्त्यक्तास० ॥ २ ॥ साधुभिःपूज्यमानोपिपीड्यमानोपिदुर्जनैः। सममेवभवेद्यस्यस० ॥
३॥ देहेन्द्रियेष्वहंभावइदंभावस्तदन्यके। यस्यनभवतःक्वापिस० ॥ ४ ॥ वाक्यसं०। एवंश्रुतिवचोभिस्तेजीवन्मुक्तस्यलक्षणम्।
मयेहदर्शितंसौम्यस्मृतिवाक्यान्यथब्रुवे ॥ ५ ॥ भारतवा०। प्रजहातियदाकामान्सर्वान्यार्थमनोगतान्। आत्मन्येवात्मनातुष्टः
स्थितप्रज्ञस्तदोच्यते ॥ ६ ॥ अहेरिवगणाद्भीतःसौहित्यान्नरकादिव। कुणपादिवयःस्त्रीभ्यस्तंदेवाब्राह्मणंविदुः ॥ ७ ॥ काम
क्रोधाऽनृतद्रोहलोभमोहमदादयः। नसन्तियस्मिन्राजेन्द्रतंदेवा० ॥ ८ ॥ नजातिःकारणंतातगुणाःकल्याणकारणं। वृत्तस्थ
मपिचाण्डालंतं० ॥ ९ ॥ पठकाःपाठकाश्चैवयेचान्येशास्त्रचिन्तकाः। सर्वेव्यसनिनोमूर्खायःक्रियावान्सपण्डितः ॥ १० ॥ सूत
संहितावाक्यं। विनष्टदिग्भ्रमस्यापियथापूर्वंविभातिदिक्। तथाविज्ञानविध्वस्तंजगन्मेभातितन्नहि। इतियोवेदवेदान्तैःसो
तिवर्णाश्रमीभवेत् ॥ ११ ॥ वाक्यसं०। वशिष्ठेनापिसंप्रोक्तंजीवन्मुक्तस्यलक्षणम्। तथातन्महिमाचोक्तस्तद्वाक्यान्यपिमेशृणु ॥

लोकःपरमात्मैवावशिष्यते ॥ ६४ ॥ ज्ञेयवस्तुपरित्यागेविलयंयातिमानसम्। मानसेविलयंयातेकैवल्यमवशिष्यते ॥ ६५ ॥ सर्व वेदान्तसिद्धान्तसारंवच्मियथार्थतः। स्वयंभूत्वास्वयंमृत्वास्वयमेवावशिष्यते ॥ ६६ ॥ वाक्यसं० ॥ यएवंसौम्यजानातिस्वंसदानन्दचिद्घनम्। विमुच्यतेससंसारादित्यपिश्रुतयोजगुः ॥ ६७ ॥ श्रुतयः। जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चंयत्प्रकाशते। तद्ब्रह्माहमितिज्ञात्वासर्वबन्धैःप्रमुच्यते ॥ ६८ ॥ ज्ञात्वातंमृत्युमत्येतिनान्यःपन्थाविमुक्तये। तद्ब्रह्माहमितिज्ञात्वाब्रह्मसंपद्यतेतदा ॥ ६९ ॥ तृणाग्रेष्वम्बरेभानौनरनागामरेषुच। यस्तिष्ठतितदेवाहमितिज्ञात्वानशोचति ॥ ७० ॥ तद्ब्रह्मानन्दमद्वन्द्वंनिर्गुणंसत्यचिद्घनम्। विदित्वास्वात्मनोरूपंनबिभेतिकुतश्चन ॥ ७१ ॥ भिद्यतेहृदयग्रन्थिश्छिद्यन्तेसर्वसंशयाः। क्षीयन्तेचास्यकर्माणितस्मिन्दृष्टेपराऽवरे ॥ ७२ ॥ प्रियेषुस्वेषुसुकृतमप्रियेषुचदुष्कृतम्। विसृज्यध्यानयोगेनब्रह्माप्येतिसनातनम् ॥ ७३ ॥ यत्रयत्रमृतोज्ञानीपरमाक्षरवित्सदा। परब्रह्मणिलीयेतनतस्योत्क्रान्तिरिष्यते ॥ ७४ ॥ स्वायत्तमेकान्तसुखंस्वेप्सितत्यागवेदनं। यस्यदुष्करतांयातंधिक्तंपुरुषकीटकम् ॥ ७५ ॥ अतिवर्णाश्रमरूपंसच्चिदानन्दलक्षणं। योनजानातिसोऽविद्वान्कदामुक्तोभविष्यति

लक्षणंसौम्यस्वरूपावस्थितेस्तथा। लक्षणंश्रुतिभिःप्रोक्तंयाभिस्ताअपिमेशृणु ॥ २५ ॥ श्रुतयः। अहमेवपरंब्रह्मब्रह्माहमिति
संस्थितिः। समाधिःसतुविज्ञेयःसर्ववृत्तिनिरोधकः ॥ २६ ॥ ब्रह्माकारमनोवृत्तिप्रवाहोऽहङ्कृतिंविना। संप्रज्ञातसमाधिः
स्याद्ध्यानाऽभ्यासप्रकर्षतः॥ २७॥ प्रशान्तवृत्तिकंचित्तंपरमानन्ददीपकम्। असंप्रज्ञातनामाऽयंसमाधिर्योगिनांप्रियः ॥ २८ ॥
संशान्तसर्वसङ्कल्पायाशिलावदवस्थितिः। जाग्रन्निद्राविनिर्मुक्तासास्वरूपावस्थितिःपरा ॥ २९ ॥ सरूपोऽसौमनोनाशोजीव
न्मुक्तस्यविद्यते। निदाघाऽरूपनाशस्तुवर्त्ततेऽदेहमुक्तके ॥ ३० ॥ वाक्यसं०। समाधिलक्षणंसौम्यमयैवंतेप्रदर्शितम्। श्रुति
वाक्यप्रमाणेनश्रोतुंवाञ्छसिकिंपुनः॥ ३१ ॥ गुरोविदेहमुक्तेस्त्वंलक्षणंमेवदाधुना। तथाविदेहमुक्तस्यलक्षणंश्रुतिमानतः॥ ३२ ॥
शृणुसौम्यवदाम्यद्यत्वयापृष्टंक्रमादहं। प्रारब्धकर्मणांनाशेभोगेनाङ्गक्षयक्षये ॥ ३३ ॥ जीवन्मुक्तिपदंहित्वायापूर्णात्मतयास्थि
तिः। ज्ञानिनःसाविदेहाख्यामुक्तिःश्रुतिभिरीरिता ॥ ३४ ॥ ब्रह्मैवाहंसदानन्दइतिचिन्ताप्रियस्यन। यश्चिन्मात्रतयासंस्थः
सविदेहःसमीरितः॥ ३५ ॥ मानानिश्रुतयःसन्त्यत्रवशिष्ठवचांस्यपि। श्रुतीस्तावत्पठामीहवशिष्ठोक्तीस्ततःपरम् ॥ ३६ ॥

श्रुतयः। विदेहमुक्तौविमलेपदेपरमपावने। विदेहमुक्तिविषयेतस्मिन्सत्त्वक्षयात्मके ॥ ३७ ॥ चित्तनाशेविरूपाख्येनकिञ्चि
दिहविद्यते। नगुणानागुणास्तत्रनश्रीर्नाऽश्रीर्नचैकता ॥ ३८ ॥ शास्त्रेणनश्येत्परमार्थदृष्टिः कार्यक्षमंनश्यतिचाऽपरोक्षात्।
प्रारब्धनाशाद्व्यवहारनाश एवंत्रिधानश्यतिचात्ममाया ॥ ३९ ॥ जीवन्मुक्तिपदंत्यक्त्वास्वदेहेकालशात्कृते। विशत्यऽदेहमुक्ति
त्वंपवनोऽस्पन्दतामिव ॥ ४० ॥ व्यपगतकलनाकलङ्कशुद्धेस्वयममलात्मनिपावनेपदेऽसौ। सलिलकणइवाम्बुधौमहात्माविगलि
तवासनमेकतांजगाम ॥ ४१ ॥ इदंचैतन्यमेवेतिअहंचैतन्यमित्यपि। इतिनिश्चयशून्योयोवैदेहीमुक्तएवसः ॥ ४२ ॥ यस्यप्रप
ञ्चभानंनब्रह्माकारमपीह न। अतीताऽतीतभावोयोवै० ॥ ४३ ॥ जीवात्मापरमात्मेतिचिन्तासर्वविवर्जितः। सर्वसङ्कल्पही
नात्मावै० ॥ ४४ ॥ वशिष्ठवा०। द्विविधश्चित्तनाशोस्तिसरूपोऽरूपएवच। जीवन्मुक्तौसरूपःस्यादरूपोऽदेहमुक्तिके ॥ ४५ ॥
सुखदुःखादयोधीरंसाम्यान्नप्रोद्धरन्तियम्। निःश्वासाइवशैलेन्द्रंचित्तंतस्यमृतंविदुः ॥ ४६ ॥ भूयोजन्मविनिर्मुक्तंजीवन्मुक्तस्य
तन्मनः। सरूपोसौमनोनाशोजीवन्मुक्तस्यचोच्यते ॥ ४७ ॥ अरूपस्तुमनोनाशोयोमयोक्तोरघूद्वह। विदेहमुक्तावेवासौवि

 द्यतेनिष्कलात्मकः ॥ ४८ ॥ वाक्यसं० । एवंविदेहमुक्तेस्तेविदेहस्यचलक्षणम् । मानंचापितयोस्तद्वत्संक्षेपात्सौम्यदर्शितम् ॥
 ४९ ॥ प्राक्चसौम्यमयोक्तंतेतत्तद्वाक्यप्रमाणतः । पदार्थशुद्धिमारभ्यसफलंतत्त्वदर्शनम् ॥ ५० ॥ मयोक्तस्यार्थजातस्ययत्त्वयाम
ननंकृतं । त्वद्वाक्यैःश्रुतिवाक्यैश्चतत्सर्वंमेनिवेदय ॥ ५१ ॥ स्वामिन्मेमतिवाक्यानितुभ्यंनिवेदयाम्यहम् । स्वबोधस्यैवदार्ढ्यार्थंनमे
पाण्डित्यख्यातये ॥ ५२ ॥ नैवाऽहंस्थूलदेहोस्मिकूटस्थैकस्वभावतः । सूक्ष्मदेहस्तथानाहंबुद्ध्यादीनांयतोस्मिदृक् ॥ ५३ ॥ तथा
कारणदेहोपिनैवाहंचिद्घनोयतः । तस्माद्देहत्रयद्रष्टातद्धर्मैरहितोस्म्यऽहम् ॥ ५४ ॥ अस्तिभातिप्रियत्वेनसर्वत्राहमवस्थि
तः । नामरूपादिकंसर्वंमय्यऽध्यस्ततयानसत् ॥ ५५ ॥ एकःप्रत्यक्स्वरूपोस्मिसर्वदेहेषुचेतनः । परंब्रह्माहमेवास्म्यहंब्रह्मा
स्मीतिवाक्यतः ॥ ५६ ॥ श्रुतयः । ब्राह्मण्यंकुलगोत्रेचनामसौन्दर्य्यजातयः । स्थूलदेहगताएतेस्थूलाद्भिन्नस्यमेनहि ॥ ५७ ॥
क्षुत्पिपासान्ध्यबाधिर्यकामक्रोधादयोऽखिलाः । लिङ्गदेहगताएतेह्यऽलिङ्गस्यनविद्यते ॥ ५८ ॥ जडत्वप्रियमोदत्वधर्माःकार
णदेहगाः । नसन्तिममनित्यस्यनिर्विकारस्वरूपिणः ॥ ५९ ॥ चिद्रूपत्वान्नमेजाड्यंसत्यत्वान्नानृतंमम । आनन्दत्वान्नमेदुःख

१२ ॥ वाशिष्ठवा० । येतुविज्ञातविज्ञेयास्ताद्दशाःपातनाशयाः । जानन्तितांस्तएवान्तरहैःपादानिवाहयः ॥ १३ ॥ भावंनि
गूहयन्त्येतेतमुत्तममनुत्तमाः । ग्राम्यैर्धनैःकिलाऽनर्घ्यःकश्चिन्तामणिरापणे ॥ १४ ॥ तस्मिन्निगूहनेभावोयतस्तेषांदिदर्शने ।
निर्वासनागतद्वैतागतमानाःकिलाङ्गते ॥ १५ ॥ एकान्ताऽमानदौर्गत्यजनाऽवज्ञामयस्तुतान् । सुखयन्तियथारामनतथैवमहर्द्धयः ।
१६ ॥ गुणांममेमंजानातुजनःपूजांकरोतुमे । इत्यहङ्कारिणामीहानतुतन्मुक्तचेतसां ॥ १७ ॥ शीताऽऽतपादिदुःखानिनिज
देहगतान्यपि । अन्यदेहगतानीवज्ञःपश्यत्यवहेलया ॥ १८ ॥ परमात्मनिविश्रान्तंयस्यव्यावृत्त्यनोमनः । रमतेस्मिन्पुनर्दृश्येस
जीवन्मुक्तउच्यते ॥ १९ ॥ एकएवविशेषोस्यनसमोमूढवुद्धिभिः । सर्वथाऽऽस्थापरित्यागान्नीरागममलंमनः ॥ २० ॥ यस्याऽनु
भवपर्यन्तावुद्धिस्तत्त्वेप्रवर्त्तते । तद्दृष्टिगोचराःसर्वेमुच्यन्तेसर्वपातकैः ॥ २१ ॥ वाक्यसं० । यःसमाधिंसदाऽऽश्रित्यस्वस्वरूपेव्यव
स्थितः । संशान्तसर्वसङ्कल्पःसजीवन्मुक्तउच्यते ॥ २२ ॥ जीवन्मुक्तसमाधेर्भोस्वामिन्मेलक्षणंवद । स्वरूपावस्थितेश्चापितद्वद
श्रुतिमानतः ॥ २३ ॥ ध्यातृध्यानेपरित्यज्यनिर्वातस्थप्रदीपवत् । ध्येयैकगोचरावृत्तिर्यासासमाधिरुच्यते ॥ २४ ॥ समाधे

मु० सा० गुरोतथाप्यस्तिव्यवहारदृष्ट्यातुसः ॥ ७२ ॥ यावदायुस्त्वयोवन्द्यावेदान्तोगुरुरीश्वरः । आदौविद्याप्रसिद्ध्यर्थंकृतघ्नत्वापनुत्तये।
७१ इतितेनित्यवन्द्यत्वंशिववाक्यंगुरोजगौ ॥ ७३ ॥ स्वामिंस्त्वद्दत्तवोधेनकृतकृत्योस्मियद्यपि । भवदाज्ञांकरिष्येऽहंतथापिजन
कादिवत् ॥ ७४ ॥ यद्येवंतर्हिमेत्वंभोस्वानुभवंनिवेदय । येनतेऽहंविजानीयांदार्ढ्यादार्ढ्येद्यवोधगे ॥ ७५ ॥ गुरोममानुभूतिं
तेतावन्निवेदयाम्यहम् । तत्रचश्रुतिवाक्यानिवदिष्यामिततस्तथा ॥ ७६ ॥ गुरोस्म्यहंपरंब्रह्मनित्यमुक्तोह्यमद्वयः । शुद्धोवुद्धो
स्मिचिन्मात्रोनित्यानन्दोनिरामयः ॥ ७७ ॥ परिपूर्णोस्मिसर्वत्रसच्चिदानन्दविग्रहः । जाग्रदादित्रयाऽध्यक्षःकूटस्थःसर्वदृक्स
दा ॥ ७८ ॥ निर्विशेषोनिराकारोनिरंशोहंनिरञ्जनः । निर्गुणोनिर्मलःशान्तोऽसंगोऽस्म्यहंसदाऽभयः ॥ ७९ ॥ स्वयंप्रकाश
रूपोहंकेवलानन्दविग्रहः । केवलज्ञानरूपोहंकेवलसत्स्वरूपकः ॥ ८० ॥ अविद्याकार्यहीनोहंवन्धमोक्षौनमेक्वचित् । काल
त्रयविमुक्तोहंदेहादिरहितोस्म्यहम् ॥ ८१ ॥ षडूर्मिरहितोहंवैषट्कोशिकाश्रमेनहि । षड्विकारविहीनोहंसदानन्दघनो ७१
स्म्यहम् ॥ ८२ ॥ वेदवेद्यमहंविद्वन्वेदागायन्तिमांसदा । वेदवाक्यानिमानानिसन्त्यत्रार्थेगुरोतथा ॥ ८३ ॥ श्रुतयः । मय्येव

सकलंजातंमयिसर्वंप्रतिष्ठितं। मयिसर्वंलयंयातितद्ब्रह्माद्वयमस्म्यहम्॥ ८४॥ अहंशिष्यवदाभामिह्यहंलोकत्रयाश्रयः।
अहंकालत्रयातीतोह्यहंवेदैरुपासितः॥ ८५॥ अहंशास्त्रेणनिर्णीतःअहंचित्तेव्यवस्थितः। आनन्दघनएवाहमहंब्रह्मास्मि
केवलम्॥ ८६॥ आत्मनात्मनितृप्तोस्मिह्यरूपोह्यहमव्ययः। आकाशादपिसूक्ष्मोहमाद्यन्ताऽभाववानहम्॥ ८७॥ ब्रह्मैवा
हंसर्ववेदान्तवेद्यं नाहंवेद्यंव्योमवातादिरूपं। रूपंनाहंनामनाहंनकर्म ब्रह्मैवाहंसच्चिदानन्दरूपं॥ ८८॥ त्रिषुधामसुय
द्भोग्यंभोक्ताभोगश्चयद्भवेत्। तेभ्योविलक्षणःसाक्षीचिन्मात्रोहंसदाशिवः॥ ८९॥ नित्यशुद्धोबुद्धमुक्तस्वभावः सत्यःसूक्ष्मःस
न्विभुश्चाद्वितीयः। आनन्दाब्धिर्यत्परस्सोहमस्मि प्रत्यग्धातुर्नात्रसंशीतिरस्ति॥ ९०॥ अहमेवमहानात्माह्यहमेवपरात्परः।
अहमन्यवदाऽऽभामिह्यहमेवशरीरवान्॥ ९१॥ सर्वाधिष्ठानरूपोस्मिसर्वदाचिद्घनोस्म्यहं। चित्तवृत्तिविहीनोहंचिदात्मैक्य
रसोस्म्यहम्॥ ९२॥ वाक्यसं०। मेऽनुभववचांस्येवंतथावेदवचांस्यपि। स्वज्ञानदार्ढ्यविघ्नैस्त्रमयाऽर्पितानितेगुरो॥ ९३॥
इतःपरंमयाकार्यंयत्तद्वाच्यंत्वयापुनः। यत्सत्वंकृतकृत्योसियस्यानुभवईदृशः॥ ९४॥ तीर्णस्त्वयात्रदुःखाब्धिस्तवकार्यंनशिष्य

ते। तथाफलंत्वयालब्धंशरणाऽऽगमनस्यमे ॥ ९५ ॥ यावत्प्रारब्धशेषस्तेतावत्त्वंवत्सवायुवत्। जीवन्मुक्तश्वरन्भूमौप्रारब्धान्ते
विमोच्यसे ॥ ९६ ॥ गुरुशिष्योक्तिसंव्याजादेवंरामप्रसादतः। जातंप्रकरणंपूर्णंपञ्चमंज्ञाननामकम्॥ ९७॥ अयंमुमुक्षुसर्वस्व
साराभिधोनिवन्धकः। वृहन्मुमुक्षुसर्वस्वान्निवन्धादुद्धृतोमया ॥ ९८ ॥ सङ्क्षिप्तःस्वल्पवुद्धीनांमुमुक्षूणांहितेच्छया। सारंवृह
न्निवन्धानांसङ्क्षेपाज्ज्ञातुमिच्छतां ॥ ९९ ॥ वृहन्मुमुक्षुसर्वस्वपाठोचास्तिहिभूरिशः। सङ्क्षेपेणतथाऽन्योपिपाठोचास्तीतिवुध्य
ताम् ॥ ३०० ॥ समाप्तश्चनिवन्धोयंरामोमेशप्रसादतः। सौम्यकाश्याःसमीपेश्रीभागीरथ्यास्तटेशुभे ॥ ३०१ ॥ श्रीमद्रामंगुरुं
चापिभिक्षुंभावेशनामकं। नमामिदण्डवद्भक्त्याऽहमष्टाङ्गैःपुनःपुनः ॥ ३०२ ॥ १६४१ ॥ इतिश्रीमुमुक्षुसर्वस्वसारसङ्ग्रहाख्ये
निवन्धेसफलज्ञाननिरूपणान्वितंपञ्चमंज्ञानाख्यंप्रकरणंसमाप्तम् ॥ समाप्तश्चाखिलोयंग्रन्थः।

सौम्यकाश्याःसमीपेऽयंधनीरामद्विजेनवै। ग्रन्थःसंलिखितोमुक्तेरीशस्यद्युसरित्तटे ॥

सम्वत्सर १९१३ वैशाखसितषष्ठ्यां ६।

मज्ञानाज्ज्ञातिसत्यवत् ॥ ६० ॥ अनात्मदृष्टेरविवेकनिद्रा मर्हंममस्वप्नगतिंगतोहम्। स्वरूपसूर्येऽभ्युदितेस्फुटोक्तै र्गुरोर्म
हावाक्यपदैःप्रवुद्धः ॥ ६१ ॥ आत्मानमञ्जसावेद्मिक्वाप्यऽज्ञानंपलायितं। कर्त्तृत्वमद्यमेनष्टंकर्त्तव्यंवापिनक्वचित् ॥ ६२ ॥ नमे
वन्धोनमेमुक्तिर्नशास्त्रंनमेगुरुः। मायामात्रविकारत्वान्मायाऽतीतोहमद्वयः ॥ ६३ ॥ देवार्चनस्नानशौचभिक्षादौवर्त्ततांवपुः।
तारंजपतुवाक्तद्वत्पठत्वाम्नायमस्तकं ॥ ६४ ॥ बिष्णुंध्यायतुधीर्यद्वाब्रह्मानन्देविलीयताम्। साक्ष्यहंकिंचिदप्यत्रनकुर्वेनचका
रये ॥ ६५ ॥ किंकरोमिक्वगच्छामिकिंगृह्णामित्यजामिकिं। यन्मयापूरितंविश्वंमहाकल्पाम्बुनायथा ॥ ६६ ॥ वाक्यसं०। भो
भगवन्मयायैस्तुस्वतत्त्वंमननीकृतं। निवेदितानितानितेमन्मननवचांसिवै ॥ ६७ ॥ त्वद्वाक्यैश्चमयावुद्धंब्रह्मात्मैक्यंगुरोधुना।
तेनाज्ञानंचमेनष्टंप्राङ्नित्यवोधपीडितम् ॥ ६८ ॥ श्रवणादित्रिभिर्नष्टाःप्रतिवन्धाश्चतेत्रयः। गुरोमेसंशयाद्यायेपुरुषापराधा
ह्वयाः ॥ ६९ ॥ ज्ञानेनाऽज्ञाननाशान्मेतथाऽहङ्कारनाशतः। सञ्चितक्रियमाणानिकर्माण्यपगतानिमे ॥ ७० ॥ प्रारब्धाख्यानि
कर्माणितुभागेनविनानमे। यावन्नष्टानितावत्त्वंवन्द्योसिमेसदागुरो ॥ ७१ ॥ गुरुशिष्यादिभावोपियद्यपिवस्तुदृष्टितः। नास्ति

पत्र	श्लोक	अशुद्ध	शुद्धं	पत्र	श्लोक	अशुद्ध	शुद्ध	पत्र	श्लोक	अशुद्ध	शुद्ध
८	७७	तर्हि	तर्हिं	११	१४६	दिग्धत्वं	दिग्धृत्वं	१२	५	स्यैव	स्यैवं
९	९५	व्रह्म	ब्रह्म	११	१२७	विष्णोना	विष्णोर्ना	१३	१३	वसिष्टेन	वशिष्टेन
९	८९	प्रयेण	प्रायेण	११	१२८	कृश्न	कृष्ण	१३	१४	वासिष्ट	वाशिष्ठ
९	९९	विश्नुपु०	विष्णुपु०	११	१२९	सववेदेषु	सर्ववेदेषु	१३	२०	तृश्नानां	तृष्णानां
१०	११३	भजते	भजते	११	१३८	सत्व	सत्त्व	१४	३९	कथंनावबुध्यसे	कथंत्वंनावबुध्यसे
१०	११९	विश्नौ	विष्णौ	११	१४५	लच्चणं	लक्ष्म	१४	५०	रग	राग
१०	१२०	विश्नौ	विष्णौ	१२	१५०	विश्न्वी	विष्वी	१४	५३	रग	राग
११	१२६	विश्नोर्वैं	विष्णोर्वैं	१२	२	तस्थैव	तस्यैव	१४	५६	वसिष्टो	वशिष्ठो

७३

पत्र	श्लोक	अशुद्ध	शुद्ध	पत्र	श्लोक	अशुद्ध	शुद्ध	पत्र	श्लोक	अशुद्ध	शुद्ध
१४	५७	तृश्नत्वं	तृष्णत्वं	१६	९२	त्यावववाडित:	त्यैवावताडित:	१८	४०	वासिष्टे	वाशिष्ठे
१४	५९	दर्शका:	दर्शिका:	१६	९३	यंत्रनिष्पिष्ट:	यंत्रविनिष्पिष्ट:	१८	४६	वासिष्ट	वाशिष्ठ
१४	६०	स्फाटम्	स्फुटम्	१६	१०१	वासिष्टे	वाशिष्ठे	१८	५१	रतिमात्र	रतिमत्र
१४	६१	चिता	चिंता	१६	१०३	चलत्तृश्नगृ	चलतृष्णागृ	१९	५८	वासिष्ठ	वाशिष्ठ
१५	७०	तीतासु	गीतासु	१६	९	धिगस्तुपुन:	धिगस्त्वेवपुन:	१९	६०	प्रवृषीव	प्रावृषीव
१५	७०	वचांस्यनु	वचांस्यप्यनु	१७	३	पुच्छ्यर्थे	पुच्छ्यर्थं	१९	६५	सप:	सर्प:
१५	७३	परं	पर:	१७	२९	दृकतदा	दृक्सदा	१९	६७	वार्द्धिक्ये	वार्द्धक्ये
१५	८३	शुभोचत्यथ	शुभोचित्यथ	१८	३४	मर्द्दनादिकं	मर्द्दनादिके	१९	७३	वर्तमेव	वर्त्मैव

शुद्धिपत्रम्।
७४

पत्र	श्लोक	अशुद्ध	शुद्ध	पत्र	श्लोक	अशुद्ध	शुद्ध	पत्र	श्लोक	अशुद्ध	शुद्ध
१९	६९	वार्द्धिक्या	वार्द्धक्या	२०	२०१	सरोय	सरोयं	२४	८४	पटु	पटुः
१९	८०	पूव	पूर्व	२२	३९	कृष्णोर्विकेशैः	कृष्णैर्विकेशैः	२४	९२	वासिष्ठ	वाशिष्ठ
२०	८२	वर्हदासं	वर्हस्वदासं	२२	४२	मृत्वा	मृत्त्वा	२४	९६	क्रव्यदाः	क्रव्यादाः
२०	८६	वासिष्ठ	वाशिष्ठ	२३	५५	कहि	कर्हिं	२५	११	तक्ता	त्यक्ता
२०	९५	वासिष्ठ	वाशिष्ठ	२३	७१	नारद	नारदो	२५	२२	चिंन्ता	चिन्ता
२०	९६	वासिष्ठ	वाशिष्ठ	२३	७३	वासिष्ठे	वाशिष्ठे	२५	२४	शीतलादीन्	श्वादीन्
२०	१००	१००	२००	२४	४९	मूति	मूर्त	२५	२४	दींस्ते	दींस्त
२०	२४१	मृत्यृ	मृत्यु	२४	८०	स्त्रीसंमिना	स्त्रीसंगिनां	२५	३०१	भवा वेः	भवा ब्धेः

७४

पत्र	श्लोक	अशुद्धं	शुद्ध	पत्र	श्लोक	अशुद्धं	शुद्धं	पत्र	श्लोक	अशुद्धं	शुद्धं
१	४	चिकोषा	चिकोर्षा	४	७४	श्रुतिवाध्या	श्रुतिर्वाध्या	७	४८	संयागस्य	संयोगस्य
२	१२	वाध्यबाधक	वोध्यवोधक	५	७७	कत्तृत्वा	कर्तृत्वा	७	५१	स्मृत्त्वा	स्मृत्वा
२	१२	चक्येन	चैक्येन	६	८०	समुस्थिताः	समुत्थिताः	८	५२	द्यादेहि	द्यादेर्हि
२	२२	कत्ता	कर्त्ता	६	८१	सवस्वसार	सर्वस्वसार	८	५६	कमाशय	कर्माशय
३	२०	समथ	समर्थ	६	१५	प्राणः	प्राणैः	८	५९	ज्ञाना	ज्ञाना
३	२५	सूय	सूर्यै	७	२१	प्राणै	प्राणैः	८	६०	प्रवत्तते	प्रवर्त्तते
४	३६	सकाया	सकार्या	७	२२	गृह्णींया	गृह्णीया	८	६९	स्मतिभिः	स्मृतिभिः
४	६७	सर्वभावानां	स्वमभावानां	७	४३	दशध्वज ठेश	दशध्वजवेश	८	७५	निविषयं	निर्विषयं

शुद्धिपत्रम्।

पत्र	श्लोक	अशुद्धं	शुद्धं	पत्र	श्लोक	अशुद्ध	शुद्ध	पत्र	श्लोक	अशुद्ध	शुद्ध
४०	९०	षड्‌ग्राम	षड्ग्राम	४६	४५	भुखः	मुखः	६०	११	चेक्यं	चैक्यं
४०	९५	स्फटं	स्फुटं	४८	८०	तुन्या	तुल्या	६३	८१	तद्ब्रच्चे	तद्ब्रह्मे
४०	३	सग्नाव	सद्भाव	५२	६२	भिक्षुन	भिक्षुर्न	६३	६८	धमा	धर्मौ
४१	१८	निषच्छुति	निषच्छ्रुति	५४	११	कृच्छाणि	कृच्छ्राणि	६४	७	वाच्याथा	वाच्यार्था
४३	६६	विशीणा	विशीर्णा	५५	२९	भिक्षुवि	भिक्षुर्वि	६५	१७	वाक्यह्नि	वाक्यैर्हि
४५	१२	दोवा	दौवा	५६	५६	ऊद्धृत्य	उद्धृत्य	६५	२९	श्रोतुदह्ने	श्रोतुर्देहे
४५	२२	चेक	चैक	५८	५	चाये	चार्यौ	७०	५४	तद्धम	तद्धर्मौ
४६	३०	येचेव	येच्चैव	५८	५७	नियमाय	नियमाये	७१	७९	निर्गुण	निर्गुणो
								७१	७१	भागेन	भोगेन

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
२१	१	५	चैतन्य	चैतन्यं
२२	१	५	वृत्त्यभिव्यक्तांतत्	वृत्त्यभिव्यक्तांसत्
२३	२	२	कल्प्यना	कल्पना
२४	१	९	मल्पकवादः	कल्पकवादः
२५	१	६	सत्वं	सत्त्वं
२५	१	९	ब्रह्मवणः	ब्रह्मणः
२६	१	३	वैय्यधिक	वैयधिकरण्य
२६	१	८	वनसन्धानानन	वनुसन्धानाननु
२६	२	५	भ्तानि	भूतानि
२६	३	८	तौत्य	तौल्य
२७	१	९	वृहस्यते	वृहस्पते
२७	२	२	एकस्मिन	एकस्मिन्
२७	२	४	त्तुत्यो	त्तुल्यो
२८	१	९	शरीरक	शारीरक
३८	२	६	सम्भवे	सम्भवे
२९	१	१	द्वारव	द्वारैव

शुद्धिपत्रं	पत्र	पृष्ठ	पङ्क्ति	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पङ्क्ति	अशुद्ध	शुद्ध
१	११	१	७	दष्टृत्वा	द्रष्टृत्वा	१५	१	६	प्रमाण्या	प्रामाण्या
	११	२	७	चतन्य	चैतन्य	१५	१	८	प्रमाण्ये	प्रामाण्ये
	१२	१	९	आनन्दो	आनन्दी	१५	२	७	पावल्य	प्राबल्य
	१२	२	३	हङ्कारवाच्छिन्न	हङ्कारावच्छिन्न	१५	२	९	केचिद्रूय	केचिद्रूयु
	१२	२	५	संस्कारर्थं	संस्कारार्थं	१६	२	६	वहिष्यमान	वहिष्यवमान
	१३	१	१	इनि	इति	१६	२	२	रूपत्वावदेकं	रूपत्वावेदकं
	१४	२	५	संसग	संसर्ग	२२	१	२	मपक्ष्य	मपेक्ष्य
	१५	१	४	सद्रप	सद्रूप	२२	१	२	तनापि	तेनापि

पत्र	श्लोक	अशुद्ध	शुद्ध	पत्र	श्लोक	अशुद्ध	शुद्ध	पत्र	श्लोक	अशुद्ध	शुद्ध
२६	२८	स्ववत्तान्तं	स्ववृत्तान्तं	३०	३४	वासिष्टे	वाशिष्ठे	३२	७७	परिविलीयते	परिलीय०
२६	३७	यतास्यत:	यतोस्यत:	३०	३५	वासिष्टवा	वाशिष्ठ०	३२	८४	स्वात्मानं	स्वमात्मानं
२६	३८	पविशति	प्रविशति	३०	४१	इत्यक्त्वा	इत्युक्त्वा	३३	९६	योथिनो	योर्थिनो
२७	४८	नमोच्चाय	नैवमोच्चाय	३१	५६	वासिष्ट	वाशिष्ठ	३३	९६	वासिष्टवा	वाशिष्ठ०
२७	७१	वासिष्ट	वाशिष्ट	३१	६४	विपयांश्च	विषयांश्च	३३	२	वुधे:	बुधै:
२८	८३	वैरच्चाप्रयच्छत:	वैरंचास्या०	३२	७३	वसिष्टेन	वशिष्ठे०	३३	८	शांत्त	शान्त
श्रीराम	श्रीराम	श्रीराम		३२	७४	श्रीवसिष्टेन	श्रीव०	३४	२८	प्रत्यत	प्रत्युत
२९	१७	विटक्रिमे:	विट्क्रि०	३२	७५	वाशिष्टवा	वाशिष्ठ०	३६	१	साधन	साधनै:

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
५	१	२	लक्षण	लक्षणं
५	१	८	शुद्धसत्व	शुद्धसत्त्व
५	१	८	मलिनसत्व	मलिनसत्त्व
५	१	४	प्रतिविंम्ब	प्रतिविम्व
६	२	४	पयुक्त	प्रयुक्त
६	१	५	नेकाविद्या	नैकाविद्या
८	२	३	महांधकारस्यव	महांधकारस्येव
८	२	६	निवृत्तिरेव	निवृत्तिरेवा
८	२	९	निदावत्	निद्रावत्
९	१	२	त्तदप	त्तदव
९	१	७	लक्षणं	लक्षणो
९	२	१	पूवाक्त	पूर्वोक्त
९	२	६	नत्ववर	नत्वावर
९	२	८	तत्तत्व ालो	तत्वकालो
१०	२	१	निवर्त्तते	निवर्त्त्यते
१०	२	५	मेवाजानं	मेवाज्ञानं

मनसाध्यात्वाश्रीगुरुं संप्रणम्यच पाठंसिद्धान्तलेशस्य समग्रहीच्छिवेनकः ॥ १ ॥ समाधिगणनायाञ्चयन्मयासाहसंकृतम्
क्षन्तव्यंतद्बुधैःसर्वैःक्षमाशीलाहितेयतः ॥ २ ॥ तत्संख्यानंस्वबोधार्थंरामतुष्ट्यर्थमेवच जानन्तिहिस्वतस्तज्ज्ञानतदर्थंम
याकृतम् ॥ ३ ॥ यदितेबालबोधार्थं पश्येयुःसंग्रहंत्विमं तदातैरपिशोध्योयंनोपेक्ष्योह्युपकारिभिः ॥ ४॥ इतिश्रीशास्त्र
सिद्धान्तलेशसंग्रहसारफलाभिधश्चतुर्थःपरिच्छेदःसमाप्तिमगात् ॥ ४ ॥ समाप्तश्चायंनिबन्धः ॥

इति श्रीमुमुक्षुसर्वस्वसारसङ्ग्रहा
भिधोग्रन्थः समाप्तः

INSTITUTE OF ADVANCED
Acc. No. 25427
Date 9-8-68
SIMLA.